॥ श्रीहरिः ॥

उत्सवप्रतानः ।

श्रीमद्गोस्वामिश्रीपुरुषोत्तमजीमहाराज-
कृतः

श्रीनाथद्वारस्थ विद्याविलासि गोस्वामि तिलक श्रीगो-
वर्द्धनलालजी महाराजानामाज्ञया
शास्त्रि रमेश भट्टात्मज शीघ्रकवि नन्दकिशोर शर्मणा
प्राचीन-पुस्तकाष्टक-पाठसंवाद पुरस्सरं संशोधितः
सच

श्रीसुदर्शन यन्त्रालये मुद्रितः
पुनर्मुद्रणाद्यधिकाराः
श्रीमदाचार्यैः स्वायत्तीकृताः

श्रीनाथद्वारा.

विद्याविभाग.

संवत् १९७१ वैशाख कृष्ण ११ मंगल.

मूल्यम् २) रु०

॥ श्रीहरिः ॥

उत्सवप्रतानः

श्रीमद्गोस्वामिश्रीपुरुषोत्तमजीमहाराज-
कृतः

श्रीनाथद्वारस्थ विद्याविलासि गोस्वामि तिलक श्रीगो-
वर्द्धनलालजी महाराजानामाज्ञया
शास्त्रि रमेश भट्टात्मज शीघ्रकवि नन्दकिशोर शर्मणा
प्राचीन-पुस्तकाष्टक-पाठसंवाद पुरस्सरं संशोधितः
सच्च
श्रीसुदर्शन यन्त्रालये मुद्रितः
पुनर्मुद्रणाद्याधिकाराः
श्रीमदाचार्यैः स्वायत्तीकृताः

श्रीनाथद्वारा.

विद्याविभाग.

संवत् १९७१ वैशाख कृष्ण ११ मंगल.

मूल्यम् २) रु०



श्रीमद्वेदव्यासविष्णुस्वामिमतवर्तिनामखिलनिगमागमसंमतशुद्धाद्वैतसंप्रदायप्रकाशनपराणां श्रीमद्वल्लभाचार्यमहाप्रभूणामतिमानीये विधृतभगवदंशे वंशे कलितावताराः श्रीमद्गोस्वामिपुरुषोत्तमार्यचरणाश्चतुर्दशाधिकसप्तदशशततमे विक्रमाब्दे स्वजनुषा भुवस्तलमपावयन् । प्रथममनर्गलव्यक्तवाग्ब्रह्माविर्भावास्त एते सहजं भक्तिमार्गीयमुत्कर्षमसहमानैरत्यभिमानैः प्रतिबुधैः कदाचिदभियुज्यमानास्त्र्यहं प्रायोपवेशेन श्रीमद्वल्लभाचार्यान् ,एकतानेन मनसा समाराधयन्तस्तृतीययामिनीपरिणतौ महाकारुणिकैस्तैः क्षणं निद्रामिवोद्भाव्य वत्स किमेवमुत्ताम्यसि गृहाणेदं ताम्बूलचर्वितमित्यमृतायमानोक्तिपुरस्सरमाधिवदनमर्पित एव तस्मिन् सद्यः प्रबुद्धास्तानपश्यन्तः स्वमुखस्थमिदं प्राश्य सहसैवाधिगतनिखिलनिगमागमनिरुपमवैदुष्यविभवास्तदात्व एव तानाहूय विजित्य च क्रमप्यपूर्वं जनमनासि महोत्सवमातेनुः। तदनु विविधदर्शनविमर्शनाविशेषितमदमेदुरमानसाद्यनेकमायावादिमतपराभवकारिणः सकलनिगमागमप्रौढपुस्तकपूगपरिष्कृतसमुच्छ्रितविजयध्वज शकटमेकं सपटुपटहघोषं पुरस्कुर्वन्तः स्वप्रतिबिम्बैरिव समस्तप्रशस्तगुणगणपात्रैः स्वच्छात्रैः परिवार्यमाणास्त एते सुदूरमपनयन्तः शुद्धाद्वैतदिवाकरावरणं प्रायःसर्वामेव वसुमतीं परिचक्रमुः। श्रीमदाचार्यपरिचरितं भगवन्तं श्रीबालकृष्णमखिलात्मभावेन सेवमानाः सरित्प्रवरया श्रीमत्या ताप्या परिष्कृतं गुर्जरजनपदवर्त्ति सूरतनगरमात्मनः संवासेन विभूषयामासुः। भाष्यप्रकाशनामकमणुभाष्यस्य विवरण, सावरणभंगं तत्त्वार्थदीपस्य, प्रकाशं श्रीसुबोधिन्याः, सुवर्णसूत्रं विद्वन्मंडनस्य, विवृतीः षोडशग्रन्थानां, दुर्वादिवदनमंडलप्रमत्तप्रहस्तान् प्रहस्तादीँश्च चतुर्विंशतिमतिप्रौढवादग्रन्थानन्यानप्युत्सवप्रतानद्रव्यशुद्धिप्रभृतीन् बहून्निबन्धान्निबबन्धुः। सर्वसंकलनतो नवलक्षश्लोकात्मिका येषां कृतिर्विजयते। यदुपश्लोकनपरं सद्यः कृतं मदीयं पद्यद्वयं यथा-

श्रीमद्वल्लभदीक्षिताह्वयहरेर्वंश्यान्वये सप्तम-
स्तत्कारुण्यसुधाभिषेकोत्थिकसत्सौभाग्यभूमोदयः ॥
दृप्यद्दुर्मदवादिविद्वद्विभदुष्कूटोक्तिकुम्भस्थली-
सद्योभञ्जनकेलिकेसरिपतिः पीताम्बरस्यात्मजः ॥ १ ॥

ना ऽऽसीद्येन समः समस्तनिगमस्मृत्यादितत्त्वार्थवि-
दुक्त्या चा ऽप्रतिमः सदसु विदुषामद्या ऽपि भूमौ बुधः ॥
यः सर्वं नवलक्षपद्यकमितप्रौढप्रबन्धं व्यधा-
त्स श्रीमान् पुरुषोत्तमो विजयतामाचार्यचूडामणिः ॥ २ ॥

कीदृशमेतेषां वैदुष्यमिति दिदृक्षूणामेतत्कृतःश्रीमद्वल्लभाचार्यप्रणीतब्रह्मसूत्र-भाष्यस्य प्रकाश एव नूनमादर्शपदवीमधिरोहतीत्यवश्यमेष दर्शनीयो भवत्यन-सूयानां महाविदुषाम् ॥ भाष्यदर्शनेन श्रीमद्वल्लभाचार्याणां ’ प्रकाशदर्शनेन च श्रीपुरुषोत्तमानामालेख्यमिव चेतसि सचेतसामुद्भासत इति नांशतोप्यति-शय्य वदामः। सुगृहीतनामधेयैरेतैरेव प्रतीच्यपादैरवगाह्य तत्तन्महानिबन्धमहो-दधिमखिलवार्षिकोत्सवसंदेहसंतमसनिरासवासरमणिरिवायमपरः प्रादुर्भावया-मासे श्रीमानुत्सवप्रताननामा संदर्भः। स्वपूर्वजरत्नश्रीव्रजरायजीमहाराजैः संव-त्सरोत्सवकल्पलतायामाविर्भाविवायां ततः परमभिव्यक्तस्या ऽस्य प्रतान-इत्यन्वर्थमेव युज्यते नाम। इममेवोपजीव्य साम्प्रतमन्येऽपि दृशोर्विषयीभवन्त्यु-त्सवनिर्णयाः। श्रीमद्विट्ठलदीक्षितैः कृतं जन्माष्टमीनिर्णयं सविस्तरं व्याख्याय राधाष्टमीतः स्वतन्त्रतयैव विरचितोयमिति बोध्यम्। तत्तद्वचनबलाबलं विचार्य तथा ऽत्र प्रमेयं निरधारि यथा ऽयमल्पोपि महतामपिनिर्णयग्रन्थानां मूर्धन्यायते। जन्माष्टमीदीपोत्सवदिनत्रयहरिवासराणां निर्णयस्त्वनन्यसाधा-रण एवा ऽत्र। लब्धेष्वपि बहुषु पुस्तकेषु पाठभेदैर्मुह्यमानोप्यहं कथ-ञ्चिदतिप्राचीनपुस्तकसाहाय्येन स्वसमीहितं विधातुमपारयम्। बहुषु पु-स्तकेषु दृश्यमान एव पाठः प्रधानतया ऽत्र रक्षितः। अन्यश्च नीचै-

निर्दिष्टः । यश्चार्थतः संवदते वाक्यरचनतश्च विसंवदते सोऽपि तथैव । दीर्घदीर्घेषु पाठभेदेषु पौर्वापर्यपर्यालोचनेन कथमपि विषयसमीकरणे शोधनादिकर्मणि च सुहृद्वरश्रीवामनाचार्याः श्रीमन्महाराजकुमारमातुलाः श्रीलक्ष्मीनारायणशास्त्रिणश्च लघूकुर्वंति स्म मम परिश्रमम् । एवमतिश्रमेण प्रकाश्यमानस्यास्य वामनाचार्यैः सानुक्रमणं कृतेपि शुद्धिपत्रे यदवशिष्टं परिमार्जनीयं तन्मनीषिभिः स्वमनीषया समीकृत्योपयोक्ष्यते । पुनर्भाविनि मुद्रणे नातिश्रमेणैव तदिदं समीभविष्यतीति सर्वं सुस्थम् ॥

पद्यम्. ।

अन्येषां सहभावतः कलितवानेतस्य संशोधनं-
नैकोऽहं स्खलितेषु तेन विदुषां वाच्योभविष्याम्यलम् ।
मुख्यत्वेन कटाक्षयन्ति यदि मां सन्तोऽपि सन्तोषदा-
स्तेभ्यः सैष निबध्यते विनयतो रम्यः प्रणामाञ्जलिः १

शीघ्रकवि भट्ट नन्दकिशोर शर्मा



अनुक्रमणिका.

श्रीनाथद्वारके टीकेत महाराजनकी-
वंशावली.

१ श्रीआचार्यजी महाप्रभुजी (श्रीवल्लभाचार्यजी)
२ श्रीगुसांईजी (श्रीविठ्ठलनाथजी)
३ श्रीगिरिधरजी.
४ श्रीदामोदरजी.
५ श्रीविठरायजी.
६ श्रीगिरिधारीजी.
७ श्रीबडेदाऊजी.
८ श्रीविठ्ठलेशजी.
९ श्रीगोवर्धनेशजी.
१० श्रीबडेगिरिधारीजी.
११ श्रीदाऊजी.
१२ श्रीगोविंदजी.
१३ श्रीगिरिधारीजी.
१४ श्रीगोवर्धनलालजी.
१५ चि० श्रीदामोदरलालजी.

उत्सव प्रतान ग्रंथकार-
श्रीपुरुषोत्तमजीकी-
वंशावली.

१ श्रीमद्वल्लभाचार्यजी.

२ श्रीविठ्ठलनाथजी (श्रीगुसाँईजी

३ श्रीबालकृष्णजी.

४ श्रीपीताम्बरजी.

५ श्रीयदुपतिजी.

६ श्रीपीताम्बरजी.

७ श्रीपुरुषोत्तमजी. (जन्म सं० १७१४)
भाद्रपद शुक्ल ११

शुद्धिपत्रम्.

पृष्ठे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
८	१९	कालकर्पण	कालःकर्मण
२६	४	शुऽद्धाधि	शुद्धाऽधि
३२	८	षष्ठि	षष्ठि
३४	११	द्वादश्वा	द्वादश्या
३६	१३	त्सवम	त्सवःम
३७	२०	त्रयोदश्या	त्रयोदश्यां
४४	२	दत	दत्तः
४४	१०	कृष्णक्षे	कृष्णपक्षे
४८	१७	वशिष्ट	वशिष्ठः
५४	१	चतुर्दश्या	चतुर्दश्यां
५४	१२	प्रजाज्ञाना	प्रजाज्ञानां
६६	१३	ममाया	ममायां
७०	२	विषययत्वेन	विषयत्वेन
८८	२	काशी	कादशी
९२	८	पूर्णैका	पूर्णैका
९३	९	घटि	घटी
९५	१३	तिथिनां	तिथीनां
९७	१५	श्रावण	श्रवण
१०२	६	फालगु	फाल्गु
१०३	६	हालिका	होलिका
१११	६	स्पृष्ठ	स्पृष्ट
११५	१२	ग्रहणन्तरित	ग्रहणान्तरित
१२०	१८	नवम्या वृद्धौ	नवम्यावृद्धौ
१३५	२	वक्तुमक्य,	वक्तुमशक्य,
१३८	१	तेषा,	तेषां,
१४१	१	पौर्णमास्या,	पौर्णमास्यां,

॥ श्रीहरिः ॥

उत्सवप्रतानः

गोस्वामिश्रीपुरुषोत्तमजीकृतः

तत्र

जन्माष्टमीनिर्णयः

श्रीगोपीजनवल्लभाय नमः

श्रीमदाचार्यचरणान् प्रभुं श्रीविठ्ठलेश्वरम् ॥
नत्वोत्सवानां समयः सोपपत्तिक उच्यते ॥ १ ॥

तत्र तावत्प्रथमं जन्माष्टमीसमय एव निर्णेयः सकलोत्सवमूलभूतत्वादाविर्भावोत्सवस्य । स च प्रभुभिरेव निर्णीत इति प्रथमं तन्निर्णयाशय एव प्रकाश्यते । तथा हि । अथ श्रीमत्प्रभुचरणाः स्वीयानां श्रीगोकुलाधीशप्रादुर्भावदिवसव्रतविषयकं कलिकलितवादिकलिकलितमन्तः करणकलिलमसहमानास्तन्निरासाय प्रादुर्भावतिथिनिर्णयं प्रतिजानते [1]प्रणम्येत्यादि

श्रीविठ्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णयः

श्रीः ॥ [1] प्रणम्य पितृपादाब्जयुगलं विगलन्मधु ॥
जन्माष्टमी काऽष्टमीति संशयान्नाशयाम्यहम् ॥ १ ॥

काष्टमीतिसंशयानिति ॥ काऽष्टमीतिप्रश्नहेतुभूतान्संशयानित्यर्थः । ते च पूज्यातिथिर्विद्धा अविद्धा वा अविद्धा चेत् , क्षये कीदृश्युपोष्येत्यादिरूपा उन्नेयाः ॥ उत्तरे स्फुटिष्यन्ति च ॥ नन्वत्र व्रतस्य नित्यत्वकाम्यत्वादिकं जन्माष्टमीजयन्त्योर्भेदाभेदादिकं च कुतो न विचार्यत इत्यत आहुः ॥ [१] तत्रेत्यादि ॥ तत्र तादृशसंशये नाऽस्माभिः प्रपञ्च्यते ॥ तयोर्यदि व्रतभेदात्तिथिप्रकारभेदाद्वा भेदः ॥ उभयथा ऽपि यस्मिन्वर्षे जयन्तीयोगो नास्ति तस्मिन्वर्षे जन्माष्टम्यैव निर्वाहादनतिप्रयोजनत्वेन मुख्यतया न प्रपञ्च्यत इत्यर्थः ॥ नन्वेवं सति संशयान्तरमपि तत एव नङ्क्ष्यत इति निर्णयारम्भो व्यर्थ इत्यत आहुः ॥ [२] किन्त्वित्यादि ॥ तथा चोक्तविधसंशयस्ततो नाऽपयातीति निर्णयारम्भो न व्यर्थइत्यर्थः ॥ उपोष्यनिर्णयार्थं विप्रतिपत्त्युत्पादकं प्रकारद्वयं प्रथमत आहुः ॥ [३] सा चेत्यादि ॥ तत्र विद्धायाः प्रथमोद्दिष्टत्वात्का विद्धेत्याकाङ्क्षायां वेधं निर्णिनीषन्तस्तद्द्वारा जयन्तीजन्माष्टम्योर्भेदं च निर्णिनीषन्तः प्रथमतः

श्रीविट्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णयः

[१] तत्र जन्माष्टमीव्रतनित्यत्वं जन्माष्टमीजयन्त्योर्भेदश्च माधवाचार्यादिभिः प्रपञ्चित एवास्तीति नास्माभिः प्रपञ्च्यते ॥ [२] किन्तूपोष्या कीदृशी तिथिरिति सन्देहोनिवार्यते [३] साच विद्धा शुद्धा चेति द्विविधा ॥

परमतमनुवदन्ति ॥ [1]तत्रेत्यादि [2]वचनान्युक्तानीत्यन्तम् । व्यवस्थापयन्ति । [3]तत्रेत्यादि [4]अभ्युपेयमित्यन्तम् ॥ ईदृशानां रात्रिप्राधान्यज्ञापकानामित्यर्थः ॥ ननु दिवावेति वाक्ये रोहिण्यभावे रात्रिप्रधानत्वमष्टम्या उच्यते इति कथं सर्वेषां तादृशां जयन्ती परत्वमित्यत आहुः ॥ [5]यत्त्वित्यादि [6]नवदेदित्यन्तम् ॥ तथा च जयन्त्यामर्द्ध

श्रीविठ्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णय :

[1]तत्र केश्चिद्वेधविचारे जन्माष्टम्या जयन्त्याश्च रात्रिप्रधानत्वाद्रात्रिवेधः प्रशस्त इत्युक्त्वा 'अष्टमी रोहिणी युक्ता निश्यर्द्धे दृश्यते यदि । मुख्यकाल इति ख्यात स्तत्र जातो हरिः स्वयम्, इति वसिष्ठसंहितावचनमुक्तम्' रोहिण्यामर्धरात्रे तु यदा कृष्णाष्टमी भवेत् । तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम्, इति विष्णुरहस्यवचनं प्रोक्तम् । ततः 'अर्द्धरात्रादधश्चोर्ध्वं कलयाऽपि यदा भवेत् । जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी, इत्यादिपुराणवचनं च । 'सिंहेऽर्के रोहिणीयुक्ता भवेत्कृष्णाष्टमी यदि । रात्र्यर्द्धे पूर्वपरगा जयन्ती कलयाऽपि च, इति वराहसंहिता वचनं च । एतदग्रे चान्यान्यप्येतादृशानि [2]वचनान्युक्तानि ॥ [3]तत्रादिपुराणे वराहसंहितायां योगीश्वरादिवचनेषु च स्फुटं जयन्ती पदमस्तीति तदेकवाक्यतार्थमन्येषामपीदृशानां वचनानां जयन्ती व्रतपरत्वम् [4]अभ्युपेयम् ॥ [5]यत्तु 'दिवा वा यदिवा रात्रौ नास्ति चेद्रोहिणी कला । रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम्, इति वचनं तदपि जयन्तीपरमिति ज्ञेयम् । तत्रार्द्धरात्रे रोहिण्यष्टमीयोगस्य मुख्यत्वात् । 'प्रतिवर्षं विधानेन मद्भक्तो धर्मनन्दन । नरोवा यदिवा

रात्रे रोहिण्यष्टमीयोगस्य मुख्यत्वात्तत्र चन्द्रार्घदान-स्यावश्यकत्वेनेन्दुसंयुतत्वकथनात् जयन्त्या नित्यत्वज्ञा-पनार्थं रोहिण्यभावेऽपि निशीथव्यापिन्यष्टम्या गौणत-रादिकालत्वज्ञापनार्थत्वाच्चास्य जयन्त्येव विषय इति तादृशामन्येषामपि स एव विषय इत्यर्थः ॥ नन्वेतेषां वचसां जयन्तीपरत्वेन व्यवस्थायां भवतां किमायातामित्यत आहुः ॥ [1]यत्त्वित्यादि [2]ग्राह्य इत्यन्तम्

श्रीविट्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णय :

नारी यथोक्तफलमाप्नुयात्, इतिभविष्योत्तरीय जयन्ती कल्पीयवचनात् " प्राजापत्यर्क्षसंयुक्ता श्रावणस्याऽसिताष्टमी ॥ वर्षे वर्षेतु कर्त्तव्या तुष्ट्यर्थं चक्रपाणिनः ,, इति स्मृत्यन्तरे जयन्तीप्रकरणीय वचनाच्च प्रतिवर्षं कार्यम् । एवं सति यस्मिन्वर्षे मुख्यो जयन्ती योगो नास्ति तस्मिन्वर्षे जन्माष्टम्यामहोरात्रमध्ये मुहूर्तमपि यदा रोहिणी योगस्तदोपवासः कार्य इति जयन्तीपरत्वादेवेन्दुसंयुत-त्वमुक्तम् । तत्र जयंतीव्रते चंद्रार्घदानस्यावश्यकत्वात् ॥ ' मुहूर्तमप्य-होरात्रे यस्मिन्युक्तं तु लभ्यते । अष्टम्यां रोहिणी ऋक्षं तां सुपुण्या-मुपावसेत्, इति विष्णुरहस्यवचनस्याप्ययमेवविषयः । यदा तु जन्माष्टम्यामप्यहोरात्रमध्ये रोहिणीयोगो नास्ति तदा विशिष्टाभावे नि-शीथव्यापिन्यष्टम्येवोपोष्या । ,[1]एकतरसद्भावेऽपिकार्या,। नतु जयन्तीव्रत-विच्छेद : कार्य इत्याशयो द्विव्रतेतिवचनस्य । अतएवेन्दुसंयुतत्व-मुक्तम्, तत्र चन्द्रार्घदानस्यावश्यकत्वात् । अन्यथा सप्तम्यांऽपि न कर्तव्येति वचनाज्जन्माष्टम्यामृक्षयोगस्याप्रयोजकत्वात्तदावश्यकत्व-ज्ञापकरोहिणीकलासत्त्वाभावं निमित्तत्वेन [2]न वदेत ॥ [1]यत्तु जय

१ एतच्चिन्हमध्यगपाठोन्यपुस्तकेषु नास्ति

अत्रायमर्थः। जन्माष्टमीप्रकरणस्थवाक्यान्तरेषूपवासा-तिरिक्ताष्टयामिकव्रतान्तरादर्शनादस्मिन्वाक्ये विद्वाधिकायां पूर्णत्वातिदेशाच्चास्योपवासव्रतत्वे निश्चिते तस्याष्टयामिकत्वेन 'कर्मणो यस्य यः कालस्तत्कालव्यापिनीतिथिः। तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्। उदयादुदयात्प्रोक्ता हरिवासरवर्जिता, इति च वाक्या त्तावद्व्यापिन्येव मुख्यः कालस्तदभावे च पारिभाषिकतावद्व्यापिनी गौणः काल इति सिद्ध्यति। तत्र च गौणकाले कर्मविशेषतिथिसामान्यपुरस्कारेण प्रवृत्ताभ्यां "उदये तूपवासस्य नक्तस्यास्तमये तिथिः। मध्यान्हव्यापिनी ग्राह्या एकभक्तव्रते तिथिः। आदित्योदयवेलायां याऽल्पापि च तिथिर्भवेत्। पूर्णा इत्येव मन्तव्या प्रभूता नोदयं विना, इति बौधायनस्य 'प्रायः प्रान्त उपोष्या हि तिथिर्दैवफलेप्सुभिः, इति शिवरहस्यस्य च वाक्याभ्यां सूर्योदयास्तमयव्यापित्वघटितं

श्रीविट्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णयः

न्तीव्रते यो निर्णयः स एव जन्माष्टम्यामित्युक्तं तन्न विचारक्षमम्। 'पूर्वविद्धाष्टमी या तु उदये नवमीदिने। मुहूर्तमपि संयुक्ता संपूर्णा साऽष्टमी भवेत्। कलाकाष्ठामुहूर्तोऽपि यदा कृष्णाष्टमीतिथिः। नवम्यां सैव ग्राह्या स्यात्सप्तमीसंयुता नहि, इतिपद्मपुराणवचनम्। उदयपदेन जन्माष्टम्यां सूर्योदयकाले सत्वमेव वेधः। जयन्त्यामर्द्धरात्रवेध एव ग्राह्यः[२]

पक्षद्वयमिति प्रकृते क आदरणीय इत्याकाङ्क्षायामनेन प्रातिस्विकवाक्येन जन्माष्टम्यामस्तमयपक्षो ऽपोद्यते। यदि जन्माष्टम्या रात्रिप्रधानत्वं स्यात्स नापोद्येत। तस्मान्न जयन्तीवदस्या अर्द्धरात्रव्याप्त्या निर्णयः। किन्तूक्तरीत्या निर्णय इत्यायातमित्यर्थः किञ्च। 'कलाकाष्ठा,इति वाक्योपन्यासात् नवमीविद्धा नक्षत्रहीना तु मुहूर्त्तमात्रापि ग्राह्या, इति वदन्नपरार्कोऽपि प्रत्युक्तो ज्ञेयः। यत्तु 'कलाकाष्ठा, इत्युक्तवाक्यस्य त्रिमुहूर्त्तस्तावकत्वम्, इति कैश्चिदुक्तम्। तदपि न विचारचारु।' 'नागो द्वादशनाडीभिर्दिक् पंचदशभिस्तथा। भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम्, इतिवदस्य विशेषवचनत्वात्। अतएव नृसिंहपरिचर्यायां हरिवल्लभसुधोदये च 'पलवेधेऽपि विप्रेन्द्र सप्तम्या अष्टमीं त्यजेत्। सुराया बिंदुना स्पृष्टं गङ्गाम्भः कलशं यथा, इति स्कान्दवचनमुक्तम्। अपरार्कोऽपि 'त्रुटिमात्रयापि सप्तम्या विद्धाऽष्टमी सनक्षत्रापि न ग्राह्या, इत्याहेति दिक्। नच निषेधस्य प्राप्तिपूर्वकत्वनियमेन विषयभेदाच्च तदभावेन निषेधानुपपत्तिरिति वाच्यम्। 'भूमावग्निश्चेतव्यो नान्तरिक्षे न दिवि,इत्यादिवन्नित्यानुवादरूपत्वात्। परधर्मकरणवद्भ्रमात्करणप्राप्तेः सुवचत्वाच्च। नच वि-

धिनिषेधयोरुभयप्रकरणस्थत्वदर्शनान्नैवमिति वाच्यम्, यथासंभवं श्रुतिलिङ्गाभ्यां प्रकरणबाधस्य वक्तुं शक्यत्वादिति दिक् । यत्तु कश्चित्, 'जन्माष्टम्या रात्रिप्रधानत्वमङ्गीकृत्य प्रस्तुतविधिनिषेधानां पूर्वोक्तरीत्या व्यवस्थापनमनुचितं सर्ववाद्यसंमतत्वात् इत्याह । तदति तुच्छम् । तेषु नियतविरोधदर्शनात्. [1]नचानियत एव स

पाठान्तरम्. पृष्ठ. ९

'न च निषेध बाधित' इत्यतः पूर्वम्

"[1]नच पूर्वेद्युरेव निशीथव्याप्तौ विध्यवकाशः परेद्युरेव निशीथव्याप्तौ च निषेधावकाशो दिनद्वयेऽपि तद्व्याप्तावव्याप्तौ च विरोध इत्यनियत एव स इति वाच्यम्—अवकाशस्थले कर्मकालशास्त्रेणैव निर्वाहादुभयोरानर्थक्यप्रसङ्गात् । नच सामान्यविशेषभावेनोभयसार्थकत्वमिति वाच्यम् । विशेषशास्त्रेण सामान्यस्यास्य सङ्कोचे चतुर्द्धाकरणावत्कर्मकालशास्त्रस्यान्यत्र प्रवृत्तिप्रतिरोधप्रसङ्गात् । यच्छब्दबोधितसामान्यताबाधप्रसङ्गाच्च ॥ असङ्कोचे विरोधस्यापरिहाराच्च । ननु विरोधस्थले कर्मोपक्रमकालशास्त्रं सङ्कल्पकाले सत्त्वमाधिकव्याप्तिं च यथासंभवमादाय निबन्धकारै र्विधिनिषेधव्यवस्थापनेन सोऽपि परिहृियत इति चेतन । पूजाप्राधान्यवादे अर्द्धरात्रस्थपूजायाः प्रातरुपक्रमाभावेन कर्मकालशास्त्रस्य च क्वचित्तुल्यत्वेन क्वचिदुदासीनत्वेन विरोधतादवस्थ्यादुपवासप्राधान्यवादेऽपि यदा प्रथमदिनेऽधिक निशीथव्याप्तेर्द्वितीयदिने संकल्पकालाल्पनिशीथव्याप्तिस्तदानीं विरोधतादवस्थ्यात्पक्षद्वयेऽप्यव्यवस्थितविकल्पदोषप्रसक्तेः"

इति वाच्यम्। अनियतत्वस्याशक्यवचनत्वात्। तथा हि किमत्र पूर्वेद्युरेव निशीथव्याप्तौ विध्यवकाशः परेद्युरेव निशीथव्याप्तौ च निषेधावकाशो दिनद्वयेपि तद्व्याप्ता-वव्याप्तौ च विरोध उतोभयत्र परेद्युश्च तद्व्याप्तौ निषे-धावकाशः उभयेद्युरव्याप्तौ च विरोधः शेषे विध्यवकाश इति--नाद्यः अवकाशस्थले कर्मकालशास्त्रेणैव निर्वाहा-दुभयोरानर्थक्यप्रसङ्गात्--न द्वितीयः--उभयत्र व्या-प्तिस्थले कर्मकालशास्त्रस्योभयपक्षपातितया विरोधस्यै-वापातात्। अन्यत्र चानर्थक्यस्यैव दर्शितत्वात्। यदि च सामान्यविशेषभावेनोभयसार्थकत्वमिति भाव्यते तथा-पि विरोधस्तु दुष्परिहरएव यदि च विरोधस्थले कर्मोप-क्रमकालशास्त्रस्य निषेधानुग्राहकत्वं विभाव्य +स परिहा-र्य इति विभाव्यते+ तदाप्यर्द्धरात्रस्य पूजाकालत्वमिति तत्रत्यपूजायाः प्रातरुपक्रमाभावेन प्रातस्तत्कालाभा-वात्तद्दोषतादवस्थ्यम्। उपवासस्य त्वहोरात्रभोजनाभा-वरूपस्य कर्मत्वमेव दुर्घटमिति पूर्ववदेव दोषः। यदि च प्रत्यवायप्रागभावपरिपालनस्य कर्मत्वमुच्यते तदापि विद्धाक्षयातिरिक्तस्थले निषेधस्यैव प्राबल्यमिति-

पाठान्तरम्

\+ एतच्चिन्हद्वय मध्यस्थ ग्रंथस्थाने पाठांतरमेतत्.

'स परिह्रियते ' यो यस्य विहितः कालकर्मणस्तदुपक्रमे। तिथिर्या-ऽभिमता सा तु कार्या नोपक्रमोज्झिता,

[1]व्यवस्था वो दुष्टेत्येव (ष) दोषः। सिद्धान्ते तु श्रीमदाचार्यचरणैरेकादश्यतिदेशेनैव जन्माष्टमी निर्णीतेति निमित्तकालस्यैव निर्णयप्रयोजकत्वं न त्वधिकरणकालस्यापीति न कोपि दोष इति दिक्। न च तत्र-रोहिण्या निर्णय इति वाच्यम्—तस्या अप्रयोजकत्वात् 'याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः। तास्वेव तद्व्रतं कुर्याद्विना श्रवणरोहिणीम्, इतिवाक्यात्। न-चाधिकनिशीथव्याप्त्या निर्णय इति वाच्यम्। काल्पनिकत्वात्—समव्याप्तौ तद्दोषतादवस्थ्याच्च। नच निषेधबाधितः कर्मकालो विधिना प्रतिप्रसूयत इति वाच्यम्-निषेधानवकाशप्रसङ्गात्। 'प्रक्षालनाद्धि पङ्कस्य'-इति न्यायेनोभयानर्थक्यप्रसङ्गाच्च। एतेनैव विधिबोधितं निषिध्यत इत्यपि प्रत्युक्तं ज्ञेयम्। न च वारेण निर्णय इति साम्प्रतम्। तस्योपलक्षकत्वादनियतत्वाच्च। एतेनैव चन्द्रोदयो ऽपि प्रत्युक्तो ज्ञेयः। वादिविसंमतिस्तु 'शतमप्यन्धा न पश्यन्ति' इति न्यायात्। 'ज्ञानिनामपि चेतांसि, इति वाक्याच्च परिहरणीया। भगवद्दासेषु तु सा न समर्था—'मामेव ये प्रपद्यन्ते' इति वाक्यात्। तस्मान्नियत एव विरोध इति पूर्वोक्तैव व्यवस्था सदा-

---

[1] तदीयव्यवस्थादुष्टिरेव दोषः। इति क्वचित्पुस्तकेषु पाठान्तरम्।

दरणीयेति * सामान्यविशेषभावात्सर्वसार्थक्यमिति दिक्, (+प्रकृतमनुसरामः) सूर्योदयकाले ऽष्टमीसत्त्वं पुराणान्तरेऽप्यभिप्रेतमित्याशयेनाहुः॥ [1] अतएवेत्यादि ॥ अत एव सूर्योदयवेधस्य परिहार्यत्वादेव। यस्तु द्वैतनिर्णये भगवद्भास्करे चैकमूलकल्पनालाघवलिप्सया 'उदयपदेन तारापत्युदये सति इत्यनेनैकवाक्यत्वाच्चन्द्रोदयो ग्राह्यः, इति एकः पक्ष उक्तः-स तु न संगच्छते। नवमीसाकल्योक्तिविरोधात्। नहि प्रहरषट्कव्यापिन्यष्टम्यपेक्षया प्रहरद्वयव्यापिन्या नवम्याः साकल्यं युज्यते। नच सकलाशब्देन निशीथे सकलेत्यर्थ उच्यत इति वाच्यम्। अनुक्तसिद्धत्वात्। अतएव कालतत्त्वविवेकेऽपि 'अत्र च सूर्योदयप्रतीतिः, इत्येवोक्तम्। तस्मात्तयोर्व्याख्येयवाक्यविरोध एवेति। प्रकृतमनुसरामः ननु वेधविचारस्य व्रतानुष्ठानोपयोगित्वाद्व्रतस्य च प्रत्यक्षोन्नीतान्यतरविध्यधीनत्वाज्जन्माष्टमीजयन्तीविध्योश्च भगवत्प्रादुर्भावप्रयुक्तत्वेन तुल्यतया व्रतभेदस्य बहुवाद्यसंमतत्वान्नाममात्रेण तिथिप्रकारमात्रभेदेऽपि जयन्त्यां गुणफलसंबन्धाङ्गीकाराद्व्रतपदाभावे तदुपयोगिवेधवि-

श्रीविट्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णयः

[1] अतएवस्कन्दपुराणे 'उदये चाष्टमी किञ्चिन्नवमी सकला यदि, इत्युक्तम्

पाठांतरम् * मानहीनो रात्रिप्रधानत्वाङ्गीकारोऽपार्थ एवेति दिक् (+ एतत्क्वचित् नास्ति)

चारो व्यर्थ इत्याकाङ्क्षायां वेधविचारवैयर्थ्यपरिजिहीर्षया प्रयोजकभेदरूपभेदशब्दान्तरैर्व्रत भेदं वक्तुं प्रयोजका-दिभेदबोधकं विष्णुधर्मोत्तरवाक्यमुपन्यस्यन्ति ॥

[1]यत्त्वि (च्चे) त्यादि ॥ तदर्थमाहुः ॥ [2]तत्त्वित्यादि व्रतपरमेवेत्यन्तम् ॥ अत्रायमर्थः संपद्यते "रोहिणी-सहिता कृष्णा मासि भाद्रपदेऽष्टमी । सप्तम्यामर्द्धरात्राधः कलयापि यदा भवेत् । तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः । तमेवोपवसेत्कालं तत्र कुर्याच्च जागरम् । अर्द्धरात्रे तु योगोऽयं तारापत्युदये सति । नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्त्तयेत्" इतिवाक्ये प्रथ-मपादत्रयेण जयन्तीरूपं कालमनूद्य संभावनार्थकलिङ्-टिततुरीयपादेनाग्रिमार्द्धेन चापादकमुक्त्वा तदग्रिमार्द्धे-नापाद्यमुक्तम् । एवंचायमर्थो भवति । उक्तविधकाले यदि भगवान् जातो भवेत् तमेवोपवसेत्तत्र जागरं च कुर्यात् । यतो नैवमतो नैवमिति तर्कनिरूपणद्वारा

श्रीविट्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णय :

[1]यत्तु[च्च] विष्णुधर्मोत्तरवचनम् "रोहिणीसहिताकृष्णा मासि भाद्रपदे-ऽष्टमी। सप्तम्यामर्धरात्राधः कलयाऽपि यदा भवेत् । तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः" इति [2] तत्तु 'अविद्धायां तु सर्क्षायां जातो देवकि-नन्दनः' इति ब्रह्मवैवर्त्तवचनविरोधाद्रोहिण्यष्टमीयोगमात्रपरमिति जयन्ती व्रतपरमेव ॥

तदुभयं निषिध्य तादृशे काले किं कुर्यादित्याकाङ्क्षायां तत्स्वरूपनिरूपणपूर्वकं तत्र कर्तव्यमाह 'अर्द्धरात्रे' इतिपद्येन। अतएव भगवज्जन्मकालत्वशङ्कानिरासकस्तूक्तः एवं सति जयन्तीव्रतं भाद्रकृष्णसप्तम्यष्टमीरोहिण्यर्द्धरात्रादिसमुदायप्रयुक्तं दशहरावत्—पूजारूपकं च—'पूजां प्रवर्त्तयेत्, इति शब्दान्तरप्राप्तं च। जन्माष्टमीव्रतं तु भगवत्प्रादुर्भावप्रयुक्तं उपवासरूपकं 'उपवसेत्, इति शब्दान्तरप्राप्तं चेति तयोर्भेद एव सिद्ध्यति। यद्यापाद्यकोटावुपवासाद्यनुवाद उच्यते तदाऽपि तस्य विध्यनुवादत्वात्तेनापि विधिरुन्नेतुं शक्य इति न कोऽपि दोषः। यदि च " अभिजिन्नाम नक्षत्रं जयन्तीनाम शर्वरी। मुहूर्त्तो विजयो नाम यत्र जातो हरिः स्वयम् „ इति हरिवंशवाक्याज्जयन्तीत्वं जन्माष्टम्यामपि विभाव्यते। तदापि 'अर्द्धरात्रे तु योगोऽयम्, इति वाक्यात्पदप्रवृत्तिनिमित्तभेदाद्भेद एव तयोरिति न दोषः। यस्तु जन्माष्टमीजयन्त्योर्भिन्नत्वे जयन्तीव्रताकर्तॄणां वर्षविशेषे प्रत्यवायः केन चिदाशङ्कितः सोप्यनेनैव समाहितो ज्ञेयः। यदि च योगविशेषप्रयुक्तोपवासस्य नित्यत्वमागृह्णीयात् तदाऽपि पूर्वविद्धायां जन्माभावाद्योगभङ्ग एवेति न नित्योपवासप्राप्तिः। यत्र तु शुद्धाधिकायां जयन्तीयो-

गस्तत्र तु फलातिशयमात्रं न तु नित्योपवास इति वक्ष्यते इति दिक्। यत्तु माधवाचार्यैः। "अर्द्धरात्राद्धश्चोर्ध्वं कलयापि यदा भवेत्। जयन्तीनाम सा प्रोक्ता सर्वपापप्रणाशिनी,, इत्यादि(त्य)पुराणीयं "रात्र्यर्द्धपूर्वा परगा जयन्ती कलयापि च, इतिवराहसंहितावचनंचोक्त्वा कला स्वरूपं च व्याख्याय 'खण्डातिथिरूपा कृष्णाष्टमी द्विधा-पूर्वेद्युः सप्तमीयुक्ता-परेद्युर्नवमीयुक्ताचेति। तत्र सप्तमीयुक्तायाः रात्रिपूर्वार्द्धावसाने कलासद्भावो विधीयते, इत्यादिचोक्त्वा सप्तमीपूर्वार्द्धरात्रावसानाष्टमीकलाभिधायकत्वं विष्णुधर्मोत्तरीयवाक्यस्य दर्शितम्। तदपि तदा संगतं भवति। यदा 'तत्र जातो जगन्नाथः, इत्यर्द्ध मध्ये न भवति,। तत्सत्त्वाच्चानुपदोक्त एवार्थः प्राञ्जलः प्रतिभातीति। यदि च 'रोहिणी'इति पद्यस्य संभावितकालानुवादकत्वं 'तत्र जात,इत्यर्द्धस्य च भूतार्थबोधकत्वेनोपवासादिकं प्रति हेतुत्वमिति विभाव्यते। तदापि संभावितकाले भूतार्थकथनात् कल्पनावैरूप्यापत्तिरनिवार्यैव। यदि च 'यदा स्थिता तत्र जातः अतो यदा भवेत्तमेवोपवसेत्, इत्येवं लाप्यते। तदाप्यध्याहारदोषो मूलद्वयकल्पनाचेत्याग्रहवादिषु जोषंभाव एव सतामुचित इति दिक्। यत्र द्वैतनिर्णय–भगवद्भास्करकाराभ्यां भविष्यविष्णुधर्मोत्तरयोरित्यभि-

धाय "रोहिण्यामर्द्धरात्रे तु„ "प्राजापत्यर्क्षसंयुक्ता „ " अर्द्धरात्रे तु योगोऽयं " "रोहिणीसहिता कृष्णा „ 'अर्द्धरात्रादधश्चोर्ध्वं कलयाऽपि यदा भवेत्। तत्र जातोजगन्नाथः, +इत्यवधिवाक्यक्रमभेदेन पाठभेदोऽलेखि "तमेवोपवसेत्„ इत्यर्धं च नालेखि। तदपि माधवीयादिषु प्राचीनेषु कालतत्वविवेकेऽर्वाचीने च तथा पाठादर्शनात् पुराणवाक्यसाङ्कर्येण लिखनात्पूर्वोक्तदोषापत्तेश्च तदनुसारिणामेव विश्वसनीयमिति ध्येयम्। ननु कल्पभेदेनाविद्धाविद्धयोः प्रादुर्भावाङ्गीकारे को दोष इति चेत्तत्राहुः॥ [1]भगवदित्यादि [2]संयुतेत्यन्तम्॥ तथा च ब्रह्मवैवर्तेन सप्तमीविद्धानिषेधपूर्वकमविद्धायां प्रादुर्भाव उक्तः। श्रीमद्भागवते च भगवत्प्रादुर्भावोत्तरं " यदा बहिर्गन्तुमियेष तर्ह्यजा या योगमायाऽजनि नन्दजायया„ इति मुहूर्त्तानन्तरं योगमायाजन्मोक्तम्। तच्च भविष्ये नवम्यामुक्तम् " नवम्यां योगनिद्राया जन्माष्टम्यां हरेरतः। नवमीसहितोपोष्या रोहिणीबुधसंयुता„ इति

श्रीविट्ठलनाथजी [श्रीगुसाँईजी] कृतजन्माष्टमी निर्णय :

[1]भगवदाविर्भावे जाते मुहूर्तमात्रानंतरं योगमायाया नवम्यामाविर्भावादेवं सति सप्तमीवेधासंभवात्पूर्ववचनेन पूर्वविद्धायामाविर्भावो न

पाठान्तरम् + इत्येवं विधिवाक्यक्रमभेदोऽलेखि।

विष्णुपुराणे पञ्चमेंऽशे प्रथमाध्याये । * ब्रह्मपुराणे * च । " प्रावृट्काले च नभसि कृष्णाष्टम्यां महानिशि उत्पत्स्यामि नवम्यां च प्रसूतिं त्वमवाप्स्यसि ,, इति च नवम्यामुक्तम् । * हरिवंशेऽपि तथा " नवम्यामेव संजाता कृष्णपक्षस्य वै तिथौ,, इति वचनात्* । एवं सति पुराण×पञ्चैकवाक्यतया न पूर्वविद्धायामाविर्भावो वक्तुं शक्यः । * किन्तु योगविशेषमात्रपरत्वमेवाभ्युपेयमित्यर्थः । एतेन कालतत्वविवेके यः कल्पभेदेन जन्मकालभेदोऽङ्गीकृतः सोऽपि प्रत्युक्तो ज्ञेयः । वशिष्ठवचनं तु प्रादुर्भावकालमात्रबोधकत्वाद्विद्धाविद्धयो समानमिति न तेनाप्याग्रहो युज्यते । फलितमाहुः ॥ [1]तस्मादित्यादि द्वैविध्यमित्यन्तम् । तस्मात् उपोष्यतिथे

श्रीविठ्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णयः

वक्तुं शक्यः । * नवम्यां योगमायाया जन्माष्टम्यां हरेरतः । नवमी सहितोपोष्या रोहिणीबुधसंयुता [2] * ॥ [1]तस्मात् सूर्योदयकाले सप्तमी भवति तदुपरि वर्त्तमानाऽष्टमी या सा विद्धा । सूर्योदयमारभ्य प्रवर्त्तमाना या सा शुद्धा । तत्रापि विद्धाऽधिका शुद्धाऽधिका चेति द्वै विध्यम् । तत्रापि निशीथव्यापित्वाव्यापित्वाभ्यां प्रत्येकं २ द्वैविध्यम् ॥

पाठान्तरम् ** एतचिन्हमध्यस्थः पाठः क्वचिन्नास्ति । × चतुष्टय. । * अत्र ' तथैव हरिवंशजन्माष्टम्यां देव्याः प्राकट्यं महता प्रबन्धेन नवम्यामुपपादितम्, इतिपाठः क्वचिदधिको दृश्यते.

र्जन्मसामयिककालानुरोधेन विचार्यत्वात् अत्र विद्धा शुद्धापदाभ्यां विद्धन्यूना-शुद्धन्यूनेउच्येते । शुद्धसमा विद्धसमयोरेकादश्यादौ पुराणसिद्धत्वेऽपीदानींतनज्योतिर्विद्भिः सूक्ष्मकालानवगमेनानङ्गीकारात् । शुऽद्धाधिका-विद्धाधिके चेषदधिकव्याधिन्यौ । तत्रापीति बहुकाल*, व्यापिन्यां विद्धाधिकायां शिष्टौ द्वौ भेदौ । एवं षट् । तत्रापीत्यस्य शुद्धाधिकाविद्धाधिकयोरि (त्यकत्वे+ऽष्टौवा) त्यर्थकत्वेप्याद्याधिक्यस्या * विवक्षितत्वेन षडेव । सर्वेषामपि* निर्णयमाहुः ॥ [१] तत्रेत्यादिना ॥ अत्र द्वयोः कण्ठोक्तत्वेऽपि त्यागात्यागहेतूक्त्या शिष्टानामनुक्तसिद्ध एवेत्याशयो ज्ञेयः । अत्र विद्धाविधीनामुभय (त्र) विषयत्वं मन्वाना उभयाभेदं च मन्वानाः शङ्कन्ते तन्मतमनुवदन्ति ॥ [२] नन्वित्यादि ॥ समादधते ॥

श्रीविठ्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णय :

१ तत्र शुद्धाधिकायां पूर्वदिन एवोपवासो बाधकाभावात् । विद्धाधिकायां तु परदिन एव सः । विद्धायामुपवासनिषेधश्रवणात । तथा हि ब्रह्मवैवर्त्ते " वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी । सऋक्षापि न कर्त्तव्या सप्तमी संयुताष्टमी । अविद्धायां तु सर्क्षायां जातो देवकिनन्दनः„ इति । २ ननु "कार्या विद्धापि सप्तम्यां रोहिणीसहिताष्टमी । तत्रोपवासं कुर्वीत तिथिभान्ते च पारणम्„ इति पद्मपुराणवचनान्नैवं

पाठान्तरम् * बहुकालाव्यापिन्यां इति क्वचित्पाठः । + त्यर्थकत्त्वे इत्यपि क्वचित्पाठः
* ईषदाधिक्यस्य विवक्षितत्वेन । * षण्णामपि ।

[1] मैवमित्यादि [2] तिथिरित्यन्तम् ॥ एवं विधिवाक्यानि व्यवस्थाप्य निषेधवाक्यानि व्यवस्थापयितुं पूर्ववत् [3] नन्वित्यादिना परमतमनूद्य दूषयन्ति ॥ [4] मैवमित्यारभ्योक्तवचनविरोधा [5] दित्यन्तम् ॥ यत्तु द्वैतनिर्णयकारैर्यदा तु पूर्वेद्युर्निशीथादूर्ध्वं परेद्युश्च प्राङ्निशीथादिति

श्रीविठ्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णय ः

निर्णय उचित इति चेत् १ मैवम् । " जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् । तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्वीत पारणम् ,, इति गारुडवचनाज्जयन्तीव्रतविषयत्वादेतादृशानां वचनानाम् ' सत्यृक्षापि न कर्त्तव्या , इति वचनाज्जन्माष्टमीव्रते रोहिणीयोगस्याप्रयोजकत्वात् । तेषु सर्वेषु वचनेषु रोहिणीयोगस्य श्रूयमाणत्वात् । जयन्त्याश्च श्रावणे वा नभस्ये वा रोहिणीसहिताष्टम्यात्मकत्वात् । तदुक्तम् वसिष्ठसंहितायाम् ' श्रावणे वा नभस्ये वा रोहिणीसहिताऽष्टमी । यदा कृष्णा नरैर्लब्धा सा जयन्तीति कीर्तिता , । विष्णुधर्मोत्तरेच ' रोहिणी च यदा कृष्णे पक्षेऽष्टम्यां द्विजोत्तम । जयन्ती नाम सा प्रोक्ता सर्वपापहरा तिथिः , २ । ३ ननु यदा दिनद्वयेऽपि निशीथयोगोऽष्टम्यास्तद्विषयकानि सप्तमीविद्धानिषेधवचनानीति चेत् ४ मैवम् । " पूर्वविद्धाष्टमी या तु उदये नवमीदिने । मुहूर्त्तमपि संयुक्ता संपूर्णा साऽष्टमी भवेत् । कला काष्ठा मुहूर्त्तापि यदा कृष्णाष्टमी तिथिः । नवम्यां सैव ग्राह्या स्यात् सप्तमीसंयुता न हि ,, इति पद्मपुराणवचनविरोधात् । ५ एतेनैव ' नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यते , इति वचनं जन्माष्टम्यतिरिक्तव्रतपरमिति ज्ञेयम् . उक्तवचनविरोधात् ६ ॥

दिनद्वयेऽपि रोहिणीयोगस्तदा त्रैविध्यं—दिनद्वयेऽपि निशीथे ऽष्टमीसत्वं—परेद्युरेव वा—पूर्वेद्युरेव—चेति। तत्राद्ययोः कल्पयोर्द्वितीयैवोपोष्या। तदुक्तम् स्कन्दपुराणे " सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम। प्राजापत्यं द्वितीयेऽन्हि मुहूर्त्तार्द्धं भवेद्यदि। तदाष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरा "। " मुहूर्त्तेनापि संयुक्ता "। इति प्रदर्शितपाद्मवचनाच्चेत्युक्त्वा * यत्तु कैश्चित्पाद्ममित्यलेख्यीति चोक्त्वा * पूर्वविद्धाष्टमीति वाक्यद्वयं (च) धृत्वा तदप्येवं विध एव विषये योजनीयम्। सप्तमीसंयुताष्टम्या नवमीदिने उदयावच्छेदेन मुहूर्त्तादिसंयुक्तत्वस्य संभवादिति कथनादातिदेशिकजयन्तीयोगविषयत्वमस्येति + स्वाशय उद्घाटितः। सोऽप्य+ विचाररुचिर एव। * न च तौल्यमिति वाच्यम्। ऋक्षानुक्तेरेव गमकत्वात्। * परेद्युर्दिनद्वये चाष्टम्या निशीथसत्वविषयकं निर्णयं पुरस्कृत्यैवास्य लिखनात्। पूर्वविद्धाष्टमीत्यादिवाक्यद्वयस्थ-नवमीपदविचारे च सूर्योदयोत्तरप्रवृत्तसंपूर्णनवम्या एव सम्यग्भानेनोक्त-

---

पाठान्तरम्— + त्याशयः। + ऽपि विनिगमकाभावादविचाररुचिरः।

* * एतच्चिन्हमध्यस्थो ग्रन्थः क्वचित्पुस्तके नास्ति। यत्र ' नचेत्यादि-गमकत्वादित्यन्तो ग्रन्थो नास्ति तत्र परेद्युरित्यादि—तत्रालाभादित्यन्तो ग्रन्थोऽस्ति, यत्र च ' नचेत्यादिरस्ति तत्र परेद्युरित्यादिर्नास्ति॥

विधविषयस्य तत्रालाभात् *। यत्तु भगवद्भास्करे-उप-
वासस्य पूजाङ्गत्वस्य प्राक् स्थापितत्वेन न स्वातं-
त्र्येण कालनिर्णयप्रयोजकत्वमित्युक्तम्। यच्च ' सोप-
वासो हरेः पूजां शुचिः सम्यगुपोषितः , इत्यादावुप-
वासस्य गुणत्वप्रतीतेः ' सदतो धावति , इत्यादिवत्
फलसंस्कारः। पूजैव प्रधानम्। एवं चोपवासस्य
पारार्थ्ये*निर्बाधे, ज्ञाते यस्तद्वाक्ये फलोल्लेखः स
केवलं स्तावक एव। पर्णतादिवत्।' अङ्गे फलश्रुतिर-
र्थवादः , इति न्यायात्-इत्युक्तम्। यच्चोक्तयुक्त्या
पूजाया एव फलसंबन्धे ' श्रावणे बहुले पक्षे , इत्या-
दिवाक्येषु कृष्णजन्माष्टमीव्रतशब्देन पूजायाः ग्रहणात्
युक्तोऽकरणनिन्दार्थवादश्रवणान्नित्यत्वोद्घोष इति।
तस्मादुपवासोऽङ्गं पूजैव तु प्रधानमित्युक्तम्। तद-
प्यापातरमणीयमेव।' श्रावणे बहुले , इत्यादौ जन्मा-
ष्टमीव्रतशब्देन पूजाग्रहणसंभवेऽपि " तां सुपुण्यामु-
पावसेत् ,, " उपोष्या सा प्रयत्नतः ,, इत्यादावुपवा-
सस्यैव स्फुटोक्तेः।" जयन्तीवासरे प्राप्ते करोत्युदरपूर-
णम्। संपीड्यते ऽतिमात्रं तु यमदूतैः कलेवरम्।
यो भुञ्जीत विमूढात्मा जयन्तीवासरे नृप ,, इति

पाठान्तरम् * निर्ज्ञाते. । परार्थे निर्बाधे यः ।

माधवधृतस्कान्दे चोपवासाकरणस्यैव निन्दनादुपवासस्यैव नित्यत्वप्रतीतेस्तदेकमूलतया ' श्रावणे बहुले , इत्यादावप्युपवासग्रहणमेवोचितम् न तु पूजाग्रहणम् । न च जयन्तीजन्माष्टम्योर्भेदान्नेदं सांप्रतमिति वाच्यम् । इयं ह्यस्मदुक्तिर्न तु तदुक्तिः । तैस्तु पूजाप्राधान्यमङ्गीकुर्वद्भिर्जन्माष्टमीजयन्त्योरभेद एव द्योत्यते । यदि नेत्थम् तदा तदुपन्यस्तजन्माष्टमीवाक्येषु कुत्र वा पूजोक्तिः येन तत्प्राधान्यमङ्गीक्रियते । ' सोपवासः ' ' सम्यगुपोषितः , इति तु प्राप्तानुवादकम् ' कृत्वा तु पार्वणश्राद्धम् , इत्यादिवत्-नत्वङ्गत्वबोधकम् । अन्यथा ' केवलेनोपवासेन तस्मिन् जन्मदिने मम । शतजन्मकृतात्पापान्मुच्यते नात्र संशयः , इति वाक्ये ' नात्र संशयः , इत्युक्तिबाधापत्तेः । तस्मादङ्गत्वप्रतीतिर्विपर्यास एवेति तस्यापि प्राधान्यमप्रत्यूहम् इति सोऽपि कालनिर्णये प्रयोजक इत्यङ्गीकार्यमेव । अत एव द्वैतनिर्णयेऽप्युपवासमेवोल्लिख्य द्वैतं निरणायि । माधवादयः कालतत्वविवेकादयोऽपि तस्य प्राधान्यमूचुरिति दिक् । एवं द्विविधवाक्यगतिमुपपाद्य जन्माष्टम्या रात्रिप्रधानत्ववादिनः प्रति वदन्तो वाक्यान्तरव्यवस्थामाहुः ॥ [५] एतेनैवेति ॥ अविद्वायां जन्मानिश्चयादुक्तवाक्यव्यवस्थापनेनेत्यर्थः

५—१७ सप्तदशे पृष्ठे ।

एवं वेधरहितैवोपोष्येति प्रतिपाद्य वक्ष्यमाणभृगुवाक्यदर्शनज-विद्धाकार्यत्वभ्रमभङ्गाय भृगुवाक्यमुपन्यस्य तदर्थमाहुः ॥ [1] यत्त्वित्यारभ्य [3] तथेत्यर्थ इत्यन्तम् ॥ न [2] परदिने इति ॥ न द्वितीयदिने निशीथव्यापिनीत्यर्थः । अत्र यथा 'श्रावणे' इत्यादिग्रंथेन "श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् „ इत्यादौ श्रावणशब्दव्रतशब्दयोः श्रवणात् " तिथिकृत्ये च कृष्णादि व्रते

श्रीविट्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णयः

१ यत्तु " जन्माष्टमी जयन्ती च शिवरात्रिस्तथैव च । पूर्वविद्धैव कर्त्तव्या तिथिभान्ते च पारणम् „ इति भृगुवचनम् । तस्यायमर्थः । ' श्रावणे वा नभस्ये वा ' इति वाक्यान्मासद्वये ऽपि जयन्ती व्रतं संभवति—तत्र पूर्वविद्धायामेवाष्टम्यां रोहिणी यदा भवति न २ परदिने तदा " सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम । प्राजापत्यं द्वितीये ऽन्हि मुहूर्त्तार्द्धं भवेद्यदि । तदाष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरा „ इति स्कन्दपुराणवचनात् ' पूर्वविद्धाष्टमी या तु उदये नवमीदिने । मुहूर्त्तमपि संयुक्ता संपूर्णा सा ऽष्टमी भवेत् ' इति पद्मपुराणवचनाच्च परदिने ऽप्यातिदेशिको जयन्तीयोगो [ऽप्य] स्तीति जन्माष्टमीवज्जयन्त्यपि परदिन एव कार्येति भ्रमः स्यात्तन्निवृत्त्यर्थमाह । जन्माष्टमीत्यादि । चो ऽप्यर्थे । यथा श्रावणे पूर्वविद्धैव जयन्ती कार्य्यैवमेव जन्माष्टम्यां या जयन्ती सा (ऽपि) पूर्वविद्धैव कार्येति । यदा रोहिणीति पाठस्तदा जन्माष्टम्यां या रोहिणी जयन्तीति यावत् सा ३ तथेत्यर्थः ।

शुक्लादिमेव च „ इति श्रवणाच्च तिथिकृत्यत्वात्कृष्णादि-श्रावणे जन्माष्टमी कार्येति कस्य चिद्भ्रमः स्यात्स न कार्यः-किन्तु तिथिकृत्यत्वेऽपि व्रतत्वस्याक्षतत्वाज्जयन्तीवत्कालान्तराविधानाच्च शुक्लादिरेव ग्राह्यः। जयन्त्यां तूभयोरपि ग्रहणादुभौ कृष्णादी ग्राह्या ×वित्यप्युक्तं ज्ञेयम्। ननु स्कान्दपाद्मवचनयोरपि जयन्तीपरत्वोक्तौ किं बाधकमित्यत आहुः॥ [1]जन्माष्टमीत्यादि॥ रोहिणीपदतात्पर्यमाहुः॥ [2]जयन्त्यामित्यादि॥ ननु विद्धाधिकायां भवत्वयं निर्णयः। शुद्धाधिकायां तु "विहीनिशल्यापि विवर्जनीया यद्यग्रतो वृद्धिमुपैति पक्षः„ इति "यथा मलिम्लुचः पूर्वो दैवो मासस्तथोत्तरः। त्याज्या तिथिस्तथा पूर्वा वृद्धौ ग्राह्या तथोत्तरा „ इति वाक्यात् द्वितीयैव कार्येति पूर्वोक्तः शुद्धाधिकानिर्णयो न साधुरित्यत आहुः॥ [3]पूर्वेत्याद्यभावा[4]दित्यन्तम्॥ तथा

श्रीविठ्ठलनाथजी (श्रीगुसांईजी) कृत जन्माष्टमी निर्णयः

१ जन्माष्टमीप्रकरणस्थत्वादेतयोर्वचनयोर्न जयन्ती परत्वं वक्तुं शक्यम्। २ जयन्त्यां रोहिणीयोगस्य प्राधान्यात्तस्या मुख्यतया निर्देशः कृतः। ३ "पूर्वविद्धाष्टमी या तु उदये नवमीदिने। मुहूर्तमपि संयुक्ता संपूर्णा साऽष्टमी भवेत् „ इति ×वाक्यात्पूर्ववेधाभावे नवम्यामुदय *समयेऽष्टमी सद्भावेऽपि न सा ग्राह्या। किन्तु

पाठान्तरम् ×ग्राह्याविति ज्ञेयम्। ×इत्यादि। *येऽष्टमी।

च तेषां सामान्यत्वान्न तैरेतन्निर्णयः किन्तु प्रातिस्विकेनानेनैव निणर्य इति पूर्वोक्तं साध्वेवेत्यर्थः । * वस्तुतस्तु ते द्वे अपि वाक्ये एकादशीविशेषविषये इति नचाशङ्का नचोत्तरम् * । फलितमाहुः ॥ [१] तदेवमित्यादिकार्ये [२] त्यन्तम् ॥ तत्-तस्मात् उक्तहेतोः । "पुरा देवैर्ऋषिगणैःस्वपदच्युतिशङ्कया। सप्तमीवेधजालेन गोपितं चाष्टमीव्रतम्। तस्मात्सर्वप्रयत्नेन त्याज्यमेवाशुभं बुधैः । वेधे पुण्यं क्षयं याति तमः सूर्योदये यथा ,, इति स्कान्दात् । " पञ्चगव्यं यथा शुद्धं न ग्राह्यं मद्यसंयुतम् । रविविद्धा तथा त्याज्या रोहिणीसहिता यदि ,, इति पाद्माच्चेत्यर्थः ॥ [३] एतावानित्यादि [४] मुक्तिदेत्यन्तो ग्रन्थः स्पष्टः ॥ ननु

श्रीविट्ठलनाथजी (श्रीगुसांईजी) कृत जन्माष्टमीनिर्णयः

पूर्वेव । त्यागहेतोर्वेधस्याभावात् ४ ॥ १ तदेवं सप्तमीवेधरहिता जन्माष्टमी निशीथयोगे तदयोगे च नक्षत्रयोगे तदयोगेऽपि सदा कार्या २ । ३ एतावान् परं विशेषो वेधरहितायामेव चेन्नक्षत्रयोगो निशीथे बुधस्य सोमस्य वा वारश्च भवति तदा तत्प्रयुक्तः फलविशेषो भवति। तदुक्तम् स्कन्दपुराणे "उदये चाष्टमी किञ्चित् नवमी सकला यदि । भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता । अपि वर्षशतेनापि लभ्यते वाऽथ वा न वा ,, । पद्मपुराणेऽपि " प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः । यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता । किं पुनर्बु-

---

* * एतच्चिन्हमध्यस्थः पाठः क्वचिन्नास्ति ।

(पूर्व) विद्धाक्षये किं कार्यमित्याकाङ्क्षायां प्राचोर्वादिनोर्मतद्वयमनुवदन्ति ॥ [1]पूर्वेत्यादि [2]वदन्तीत्यन्तम् ॥ इतीत्यन्तं मतमपरार्ककृष्णपण्डितादीनां द्वितीयं विष्णुभक्तिचन्द्रोदयादीनां ज्ञेयम् । एवं मतद्वयमनूद्य सिद्धान्तमाहुः ॥ [3]तत्रेत्यादि ॥ [4]नोचेत् ॥ वचन + मूलालाभे ॥ * पूर्वोक्तरीतिरनुसर्त्तव्या [5] ॥ अव्यवहितपूर्वोक्तः एकादश्या दशमीवेधे शुद्धद्वादशीवदिति प्रकारोऽनुसर्त्तव्यः । यद्वा । पूर्वविद्धाष्टमीति वाक्यस्य या अगत्याऽन्यग्रहणरूपा रीतिर्विद्धाक्षये परैरादृता सा रीतिर्नवम्यामनुसर्त्तव्या ।

श्रीविट्ठलनाथजी (श्रीगुसांईजी) कृत जन्माष्टमी निर्णयः

धवारेण सोमेनापि विशेषतः । किं पुनर्नवमीयुक्ता कुलकोट्यास्तु ४ मुक्तिदा ,, इति ॥ १ " पूर्वविद्धाष्टमी या तु उदये नवमीदिने ,, इति वाक्यात्पूर्वविद्धायाः परदिने मुहूर्त्तमपि सत्त्व एव पूर्वविद्धायास्त्यागो न त्वसत्वेऽपीति । केचित्तु " जन्माष्टमीं पूर्वाविद्धां स (ऋक्षां) र्त्तां च सकलामपि । विहाय नवमीं शुद्धामुपोष्य व्रतमाचरेत् ,, इति व्यासवचनात्पूर्वविद्धायाः क्षये (तु) शुद्धैव नवम्युपोष्या वचनबलात् । एकादश्या-दशमीवेधे शुद्धद्वादशीवदिति वदन्ति २ । तत्र ३ यद्येतद्वचनं समूलकं तदा तथैव । ४ नोचेत्पूर्वोक्तरीतिरेवानुसर्त्तव्या ५ ॥ ॥

पाठान्तरम् । × वचनालाभे. । * अत्रक्वचित्पुस्तके -- ' पूर्वं यथा विद्धाधिकायां विद्धानिषेधश्रवणात् परोपोष्या तथा विद्धाक्षयेऽपि विद्धानिषेधश्रवणात् परैवोपोष्येत्यर्थः , । इत्यधिकोग्रन्थो दृश्यते ॥

अयमर्थः । " पूर्वविद्धा यथा नन्दा वर्जिता श्रवणान्विता । तथाऽष्टमीं पूर्वविद्धां सनक्षत्रामपि सन्त्यजेत् ,, इत्यपरार्कधृत- पाद्मवचनेनाष्टमीत्याग एकादशी (त्याग) वदतिदिश्यते । एकादशीत्यागप्रकारश्च " दिनक्षये तु शुद्धैव द्वादशी मोक्षकाङ्क्षिभिः । उपोष्या दशमीयुक्ता नोपोष्यैकादशी तिथिः ,, इति सुमन्तुना द्वादशीं गौणकालं गृहीत्वा मोक्ष (काङ्क्षा) कामपरत्वेन व्यवस्थापितस्तथैवाष्टमीं * त्यजेत् * । नवमीं गौणकालं गृहीत्वा त्यजेदिति प्रकारोऽनुसर्त्तव्य इति । * हरिवल्लभसुधोदये * कूर्मपुराणेऽपि । " दिनक्षये तु संप्राप्ते उपोष्या द्वादशी भवेत् । दशमीशेषसंयुक्तां न कुर्वीत कदाचन ,, इति । यद्यपि " अर्द्धरात्रमतिक्रम्य दशमी दृश्यते यदि । तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् ,, इत्यपि कूर्मपुराणेऽस्ति तथापि स त्यागो नात्रातिदेशविषयः " । उदयादुदयात्प्रोक्ता "इतिवाक्येन प्रति (षि) बद्धत्वात् । तस्मादयमेव विषय इति दिक् । न च भवत्वष्टमीत्यागस्तथा । तथापि द्वादशीवन्नवमीप्रापकवचनाभावान्नवम्युपोषणं नसांप्रतमिति वाच्यम् । विद्धानिषेधैरेव त्यागस्य सिद्धावतिदेशस्या-

पाठान्तरम् * * एतच्चिन्हान्तर्गतः पाठः क्वचिन्नास्ति ।

नारभ्यत्वापातात्। अथ ग्रहिलतया विधिवाक्य एव चेदाग्रहः क्रियते तदा तथैव विधिवाक्यमपि सोपपत्तिकमुदाह्रियते ॥ तथा हि " विना ऋक्षेण कर्त्तव्या नवमी संयुताऽष्टमी। सऋक्षापि न कर्त्तव्या सप्तमीसंयुताष्टमी " इति हरिवल्लभसुधोदये स्कान्दमवधारय। कथमत्र विधिलाभ इति चेत् इत्थम्। अमिश्रणार्थक-यु- धातुप्रयोगेण सम्यक्- लेशमात्रेणापि. युता अमिश्रिता अष्टमी यस्यां सा संयुताष्टमी तादृशी नवमी कर्त्तव्या उपोष्या तत्र हेतुरुत्तरार्द्धादवधेय इत्येवं वचनव्यक्तेरिति ज्ञानीहि। न चात्र विनिगमकाभावः शङ्क्यः। तर्कैस्तन्निश्चयात्। तथा हि। प्रस्तुतनवमी यदि स्वानुगुणातिथिगौणकालत्वेनोपोष्या * न स्यात् तत्तिथ्यदूषकवेधनिरूपणयोग्या न स्यात् * तत्ति (थ्य) थिदूषकवेधानिरूपणायोग्यत्वे सति यद्यदूषकवेधनिरूपणयोग्या न स्यात् तत्तिथिवेधानिरूपणयोग्यैव न स्यादिति। किंचानेन व्याप्तिमूलभूतेन तर्केणोपोष्यत्वमनुमातुमपि शक्यम्। तथा हि। प्रस्तुतनवमी स्वानुगुणातिथिगौणकालत्वेनोपोष्या तत्तिथ्यदूषकवेधानिरूपणयोग्यत्वात् यदेवं तदेवं द्वादशीवत् यन्नैवं तन्नैवं

पाठान्तरम् ** एतच्चिन्हान्तर्गतः पाठः क्वचित्पुस्तके नास्ति। अग्रेच तत्तिथ्यदूषकत्याद्यस्ति।

दशमीवत् । अनुगुणत्वं चात्र तद्वेधघटितत्वे सति तन्निरूपितदोषरहितत्वं तन्निरूपितगुणवत्वं वा । वेधत्वं च गुणदोषान्यतरप्रयोजकसंबन्धविशेषत्वं बोध्यम् । विषयशोधकाश्च तर्काः सन्ति । प्रस्तुतनवमी यदि जन्माष्टमीगौणकालत्वेनोपोष्या न स्यात् प्रातिस्विकवाक्येषु तद्विद्धजन्माष्टमीप्रशंसा (पि) न स्यात् । इत्थं प्रशंसा यदि योगविशेषजफलविशेषसूचनमात्रफलिका स्यात् । बुधसोमादिवदुपलक्षणविधा (न) मात्रेणैव स्यात् । किंच नवमी यदि तथोपोष्या न स्यात् भगवज्जन्मतिथिर्नवमीसहिता न स्यादित्येवं रूपा अन्येऽप्युन्नेयाः । तस्माददूषकवेधघटकत्व प्रशस्तवेधघटकत्वोत्सवाधिकरणत्वरूपानुकूलतर्कत्रयेण " यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः „ इति वाक्येन चोक्तवाक्यार्थो नवम्युपोषणविधायक एव विनिगन्तव्यः । उत्सवाधिकरणत्वं (च) सुबोधिन्यां पुत्रोत्सवादिकं च शुद्धनवम्यामेवजातमिति श्रीमदाचार्यचरणोक्तिभिरवगन्तव्यम् ॥ यत्तु कैश्चिद्विद्धाक्षये विद्धोपवासोऽगत्या कर्त्तव्य इति प्रत्यपादि । तत्व[द]प्रयोजकत्वात् विद्धानिन्दार्थवादान्निबन्धेषु परस्परं व्यवस्थाकलहदर्शनाच्चानवधानविजृम्भितमेव । प्रकृतमनुसरामः । यद्वा ।

अत्र रीतिशब्दः संप्रदायवाची । तथा च [पि] प्राचीनशिष्टवैष्णवोक्तसंप्रदायो ऽनुसर्त्तव्य इत्यर्थः । न चैवमन्धपरंपरापत्तिः । सदाचारस्यापि धर्ममूलत्वात् । "श्रुतिः स्मृतिः सदाचारः" इति वाक्यात् । न च स्मृत्यपेक्षया सदाचारो निर्बल इति वाच्यम् । "साधूनां समयश्चापि प्रमाणं वेदवद्भवेत्" इति वाक्ये वेदव (द्) दित्य-तिदेशेन स्मृत्यपेक्षया कलौ तस्य स (म) बलत्वबोधनात् । न चेदं वाक्यं "यत्र सायं गृहत्वं च मुनिभिस्तत्वतत्परैः । एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः । निवर्त्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः" इति कलिवर्ज्यमुपक्रम्य पठनात्तत्रैव प्राबल्यं बोधयतीति नान्यत्र तस्य प्राबल्यमिति वाच्यम् । वचनस्य स्मार्त्तत्वेन स्मृत्यैव निवृत्तिसंभवे एतानीति सार्द्धपद्यवैयर्थ्यापातात् । तस्मात्तत्प्राबल्यबोधनायैव तदुक्तिरिति दिक् । अत एव माधवोपि गौरीतृतीयानिर्णये मुहूर्त्तमात्रायां विद्धाधिकायां व्रतकरणे शिष्टाचारमेव शरणीचकार । न च शिष्टानामपि बहुविधत्वात्पुनर्विनिगमनाविरह इति वाच्यम् । अवतारकालिकशिष्टानामत्र विवक्षितत्वात् । ते तु शुद्ध नवम्यामेव जन्मोत्सवादिकं चक्रिरे । नवम्यामेव ज्ञानात् ।

यदि च विद्धाक्षये कदाचिद्विद्धायां तैः कृतः स्यात्तथेतिहासोपि क्वापि भवेदेव। तदभावाच्चैवमेव निश्चीयत इति न काप्यनुपपत्तिः। ननु यद्येवं तदा निर्णये स्फुटमेव कुतो नोक्तमिति चेत्। इतः। व्रते हि निमित्तं भगवज्जन्म तत्तु विद्धायामेव नवम्यामपि न प्राप्यते लोकन्यायेन प्राप्तः कालस्तु " वर्जनीया प्रयत्नेन „ इति वाक्ये हेतूक्तिपुरःसरं वर्ज्यते तथा सति व्रताभावे प्रसक्ते उत्सवाधिकरणकालमादायैव व्रतं कार्यम्। उत्सवान्ते पारणवि [णाभि] धानाद्व्रते उत्सवाङ्गत्वस्यापि शक्यवचनत्वात्। उत्सवस्तु श्रीनन्दादिकृतः स्फुट एव नवम्यामिति प्रकृते त एव शिष्टाः पूर्वशब्देन परामृष्टाः भक्तिमार्गस्य गोप्यत्वाच्च स्फुटं नोक्ता इति जानीहि। अत एव श्रीमदाचार्यचरणैः " यदा बहिर्गन्तुमियेष „ इत्यस्य व्याख्याने " मुहूर्त्तानन्तरं सा जातेति ज्ञायते। नवम्यां च सा जाता। रोहिणी तु तुल्या। अतो रोहिण्याः कृत्तिकावेधो न दोषाय। सप्तमीवेधस्तु दोषायैव „ इति विद्धात्यागबीजमुक्त्वा " पुत्रोत्सवादिकं च शुद्धनवम्यामेव जातमिति शुद्धाष्टम्यभावे केवला नवम्युपोष्या „ इति केवलनवम्युपोषणे बीजमुक्तमिति

पूर्वोक्त [सर्व] मनवद्यमिति दिक् । ननु व्रतस्य पारणान्तत्वनियमात्तद्विचारः कुतो न कृत इति चेत् । विद्धात्यागे कृते द्वितीयदिने तिथ्यभावेन ऋक्षाप्रयोजकत्वस्य च साधितत्वेन तदोत्सवान्तस्यापि जातत्वेनानुक्तसिद्धत्वादेवेति जानीहि । उपसंहरन्ति ॥ [१] इत्थमित्यादि ॥ यद्वैवं योज्यम् ॥ श्रीगोकुलाधीशप्रादुर्भावदिनव्रतं इत्थम् । एवं प्रकारकमेव नान्यथेत्यर्थः । अस्माभिः ए [व] तन्निरणायि । एवं निर्णयकरणे किं बीजमित्याकाङ्क्षायामाहुः ॥ [२] पदेत्यादि ॥ पदं सुप्तिङन्यतरविशिष्टवर्णसमुदायः तदेवांभोजमिवाम्भोजमाह्लादकारित्वादिना तत्प्रसादतः तदाशयस्फुटीकारादित्यर्थः । तथा च " पदद्वयं सुप्तिङन्तं ताभ्यां चलति वाक्पतिः „ इति तत्वदीपोक्तेर्नामात्मकस्य भगवतश्चरणरूपमिदमिति तत्प्रसाद एवं लक्षण एवोचितः । यथा मनसो हर्षलक्षणो दिशां दूरदर्शनलक्षणो नीरस्य नैर्मल्यलक्षण आकाशस्य व्यभ्रत्वलक्षणस्तथा शब्दस्य तात्पर्यवैशद्यलक्षणस्तस्मादिति भाव इति दिक्

श्रीविठ्ठलनाथजी [श्रीगुसाँईजी] कृत जन्माष्टमी निर्णय :

१इत्थं श्रीगोकुलाधीशप्रादुर्भावदिनव्रतम् । अस्माभिर्निरणाय्येतत २पदाम्भोज प्रसादतः ॥ इति श्रीविठ्ठलदीक्षित विरचितो जन्माष्टमीनिर्णयः ॥

इति सत्तर्कसहस्रैस्तदुपोद्बलकैरमीभिरपि वाक्यैः । बाधेऽपि वादभाजां धीराः किं नेह लज्जते धीवः ॥ १ ॥ सद्भिर्विचारचातुर्यविद्भिर्विद्धातिथिक्षये । शास्त्रोक्तिबलमाश्रित्य नवम्येवमुपोष्यताम् ॥ २ ॥ इति प्रभुपदाम्भोजमधुव्रततया मया । कृपाबलमुपाश्रित्य विवृतो निर्णयाशयः ॥ ३ ॥ यदत्र सदसद्वापि जीवबुध्या मयोदितम् । प्रभुभिस्तत्त्वदीयैश्च क्षम्यतां बालचापलम् ॥ ४ ॥ इति श्रीवल्लभनन्दनचरणैकतानश्रीपीताम्बरसूनुपुरुषोत्तमविरचितो जन्माष्टमीनिर्णयप्रकाशः ॥

श्रीकृष्णायनमः ॥ [1]अतः परं स्वतन्त्रतया निर्णीयन्ते ॥ अथ भाद्रपदशुक्लाष्टम्यां श्रीमत्स्वामिन्युत्सवः ॥ * स च पाद्मोत्तरखण्ड उक्तः ॥ वृषभानुरितिख्यातो गोपो ज्ञातिमतां वरः ॥ तस्य पत्नी महाभागा नाम्ना सौभाग्यसुन्दरी ॥ तावुभौ ब्रह्मसावित्र्यौ स्वांशेन जगतीं गतौ ॥

---

१ जन्माष्टमीनिर्णयः श्रीविट्ठलेशप्रभुभिः कृतस्तस्य टीका श्रीगोस्वामिपुरुषोत्तमचरणैः कृता सेयमुत्सवप्रतानैकदेशरूपा समाप्ता । अतः परं श्रीविट्ठलेशप्रभूणां मूलं नास्ति किन्तु श्रीपुरुषोत्तमचरणानामुत्सवप्रतान एव स्वतन्त्रोऽस्तीति ज्ञेयम् ॥ शुभं भवतु ॥

पाठान्तरम् * * एतच्चिन्हमध्यगतः पाठः क्वचिन्नास्ति ।

तयोर्गेहे महालक्ष्मी प्रादुर्भूता सुरेश्वरी ॥ अयोनिजा विशालाक्षी कृष्णस्यानन्दकारिणी । मासि भाद्रपदे ऽष्टम्यां भौमे मूलर्क्षमण्डिते * „ इति स तु लोकन्यायेन विद्धायामेव कार्यो विद्धाक्षये। अन्यथात्वौदयिक्येव तिथिर्ग्राह्या * " युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ॥ रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता „ इति निर्णयसिन्धौ कृत्यतत्वार्णववचनात् ॥ दिनद्वये तद्व्याप्तौ तु पूर्वैव । " षष्ठिदण्डात्मिकायास्तु तिथेर्निष्क्रमणं परे । अकर्मण्यं तिथिमलं विद्यादेकादशीं विना „ इति ज्योतिर्निबन्धे वाक्यात् * अयं भक्तिमार्गसंप्रदायप्राप्तत्वादावश्यको न विशेषतो मार्यादिकपदवीमधिरोढुमर्हतीत्युपरम्यते ॥

अत्रैकादश्यां द्वादश्यां वा परिवर्त्तनोत्सवः ॥

स च संप्रदायाभावान्न विवे (वि) च्यते। श्रद्धया कश्चित्करोति चेद्वक्ष्यमाणप्रबोधिनीवत्तिथिं गृह्णातु ॥

—o—

भाद्रपदशुक्लद्वादश्यां श्रवणयुतायां वामनोत्सवः ॥ तदुक्तं निर्णयसिन्धौ श्रीभागवते ऽष्टमस्कन्धे ॥ " श्रोणायां श्रवणद्वादश्यां मुहूर्त्ते ऽभिजिति प्रभो । सर्वे नक्षत्रताराद्याः-

---

पाठान्तरम् ** एतच्चिन्हमध्यगतः पाठः क्वचिन्नास्ति । किन्तु स तु लोकन्यायेनेति-अयं भक्तिमार्गेत्यादि चेति पंक्तिद्वयमात्रमस्ति ।

ध्वकुम्भजन्म दक्षिणम्। द्वादश्यां सविता तिष्ठन्मध्यं दिनगतो नृप। विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः,, इति। हेमाद्रिदिनकरोद्योतयोस्तु भविष्ये। " एकादशी यदा सा स्याच्छ्रवणेन समन्विता। विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा,, इत्युपक्रम्य " अथ काले बहुतिथे गते सा गुर्विणी भवत्। सुषुवे नवमे मासि पुत्रं सा वामनं हरिम्,, इत्यादि चोक्त्वा " एतत् सर्वं समभवदेकादश्यां युधिष्ठिर। तेनेष्टा देवदेवस्य सर्वथा विजयातिथिः,, इत्युपसंहारादेकादश्यामङ्गीकृतः [म।] एवं कल्पभेदेन तिथिद्वयेऽपि मध्यान्ह एव वामनाविर्भावः। " अन्हो मध्ये वामनो रामरामौ,, इति पुराणसमुच्चयात्। एवं च श्रीभागवते श्रवणद्वादशीशब्देन श्रवणलाभेऽपि पुनः श्रोणापदोक्त्या श्रवणस्यावश्यकता प्राप्यते। तिथी चोभे अप्यविरुद्धे। " एकादशी द्वादशी च वैष्णव्यमपि तत्र चेत्। तद्विष्णुश‍ृङ्खलं नाम विष्णुसायुज्यकृद्भवेत्,, इति विष्णुधर्मोत्तरात्। " द्वादशीं श्रवणर्क्षं चेत्स्पृशेदेकादशीं यदि। स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञकः। तस्मिन्नुपोष्य विधिवन्नरः प्रक्षीणकिल्बिषः। प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम्,, इति मात्स्याच्च।

श्रवणस्य तिथिद्वयस्पर्शि (र्शि) त्वेन शृङ्खलाघटकत्वे विष्णुशृङ्खल (लो) योगः। स च पुण्यातिशयजनक इति तादृशयोगसंभवे तत्रैवोत्सवः कार्यस्तदङ्गभूतं व्रतमपि तदैव। यत्तु हेमाद्रौ "द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि,, इति श्रवण (स्य) (प्रान्तभागीय) द्वादशीस्पर्शमात्रे (ण) ऽपि विष्णुशृङ्खलमुक्तम्। तद्भ्रमसात्। स्पर्शस्य भावित्वेन (तदानीं) शृङ्खलास्वरूपाभावात्। कल्याणरायैस्तु तदनू (नु) दितमिति न दोषः। वाक्यं तु द्वादशीश्रवणयोरेककालावच्छिन्नैकादशीस्पर्शाभिप्रायमिति दिक्। यदा तु केवलायां शुद्धाधिकायां वा द्वादश्यामेव श्रवणयोगस्तदा तु सर्क्षायां द्वादश्यामेवोत्सवः। श्रीभागवतवाक्यात्। "तिथिनक्षत्रयोर्योगो (ग) योगश्चैव नराधिप। द्विकलो यदि लभ्येत स ज्ञेयो ह्याष्टयामिकः,, इति श्रवणद्वादशीप्रकरणीयभविष्योक्तेश्च। "उदयव्यापिनी ग्राह्या श्रवणद्वादशी व्रते,, इति नारदीयस्यापि यमेव विषयः। अत्र व्रतकरणेऽपि न पूर्वव्रतलोपः। "एकादशीमुपोष्यैव द्वादशीमप्युपोषयेत्। नचात्र विधिलोपः स्यादुभयोर्दैवतं हरिः,, इति भविष्योक्तेः। यदा चैकादश्यामेव श्रवणयोगो न द्वादश्यां न वा विष्णुशृङ्खलं तदैकाद-

स्यामेवोत्सवादिकम् । श्रीभागवतवाक्येन श्रोणावश्यकताप्राप्तेर्भविष्येनाविर्भावप्राप्तेश्च । " यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् । एकादशी तदोपोष्या पापघ्नी श्रवणान्विता । उभयोर्देवता विष्णुः पुराणपुरुषोत्तमः । विभेदोऽपि न कर्त्तव्यो विभेदात्पतते नरः ,, इति नारदीयवाक्याद्व्रतेऽप्यानुगुण्याच्च । कल्याणराया अप्येवमाहुः । यदि च दशमीविद्धायामेव श्रवणयोगस्तदा तु द्वादश्यामेवोत्सवादिकम् । श्रीभागवते द्वादश्यामेव प्रादुर्भावोक्तेः । " एकादश्यां नरो भुक्त्वा द्वादश्यां समुपोषणात् । व्रतद्वयकृतं पुण्यं सर्वं प्राप्नोत्यसंशयम् ,, इति वाराहाद्व्रतद्वयफलाप्तेश्च । * न तु विद्धायाम् । विद्धादूषणबीजस्य सर्वत्र ' तौल्यात् , । * यत्तु दिनकरोद्योतादौ । " दशम्यैकादशी यत्र सा नोपोष्या भवेत्तिथिः । श्रवणेन तु संयुक्ता सा चेत्स्यात्सर्वकामदा ,, इति वह्निपुराणाद्विद्धोपोष्येत्युक्तम् । तत्सकामपरम् । सर्वकामदा इत्युक्तेः । यदा तु प्रथमेऽन्हि न विष्णुशृङ्खलं द्वितीयदिने च द्वादश्याः मध्यान्हाव्याप्तिः उभयत्र समविषमैकदेशव्याप्तिर्वा तदा [पि] पूर्वदिनमेव ग्राह्यम् । " रुद्रेण द्वादशी ,, इति युग्मवाक्यात् । यदा तु दिनद्व-

* * एतच्चिन्हमध्यगतः पाठः क्वचित्पुस्तके नास्ति । ' तुल्यत्वात् , इति च पाठः ।

येऽपि न श्रवणयोगस्तदाऽपि द्वादश्यामेवोत्सवः ।* श्रवणरहितायामपि द्वितीयदिने एव मध्यान्हव्यापिन्यामित्यर्थः । 'अन्हो मध्ये वामनो रामरामौ, इति वचनात् ।* उपवासस्तु शक्तस्योभयत्र । अशक्तस्य द्वादश्यामेव । यद्यपि " द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि । उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिम् „ इति मात्स्ये । " श्रवणेन सिते यत्र द्वादशी लभ्यते क्वचित् । उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिम् „ इति यमेन च पूजामात्रमुक्तम् । तथाऽपि तत्र मासानुल्लेखात्तद्वामनजयन्तीभिन्नद्वादशीपरम् । अत एव श्रीमदाचार्यचरणैस्तत्वदीपे " तथा वामनजयन्त्युत्सवकरणे एकादश्यामुपोषणमकृत्वाऽपि द्वादश्यामुपोषणं कार्यम् किं बहुनोत्सव प्रधानभूतः । भुक्त्वा चोत्सवो निषिद्धो भगवदावेशाभावात् „ इत्येवोक्तम् । तस्मादेष एव व्रतनिश्चयः । अत्र केचनैकादशीव्रतमात्रं कृत्वा द्वादश्यामुत्सवोत्तरं पारणं कुर्वन्ति । तदाशयो नृसिंहजयन्तीनिर्णये विवेच्यः ॥ अथ पारणा विचार्यते ॥ तत्र तावत् श्रवणद्वादशीवामनजयन्त्योरविरोधतस्तन्त्रेणानुष्ठानादुभयोः पारणं यथासंभवमुभयान्ते ऽन्यतरान्ते वा

पाठान्तरम् * * एतच्चिन्हमध्यगतः पाठः केषु चित्पुस्तकेषु नास्ति ।

कार्यम् ॥ तत्रायं विषयविवेकः ॥ यदा शुद्धन्यूनायां विद्धन्यूनायां वा द्वादश्यां श्रवणयोगो द्वितीयदिने च स्वल्पं श्रवणं तदा त्रयोदश्यां पारणानिषेधस्याभावेन "एकादशी कलां प्राप्ता येन द्वादश्युपोषिता। पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणम्„ इति विष्णुरहस्यात्। "द्वादश्यैकादशी यत्र संगता त्रिदशाधिप। तामुपोष्य ततः कुर्यात्त्रयोदश्यां तु पारणम्„ इति तत्वसागराच्च पुण्यातिशयजनकत्वेन चोभयान्ते पारणं कार्यम्। यदा च शुद्धाधिका विद्धाधिका वा द्वादशी श्रवणं च पूर्वदिने स्वल्पं सत् द्वितीयदिवसे वर्द्धते तदा एकादशीव्रतमपि तन्त्रतस्तत्रैव सिद्ध्यति। "पूर्णा भवेद्यदा नन्दा भद्रा चैव विवर्द्धते। तदोपोष्या तु भद्रा स्यात्तिथिवृद्धिः प्रशस्यते„ इति गारुडात्। "निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदा। प्रातर्भवतु वा मा वा द्वादशी च द्विजोत्तम„ इति स्कान्दाच्च। तादृशस्थले व्रतत्रयस्यापि पारणं श्रवणान्तनैरपेक्ष्येण स्वल्पद्वादश्यामेव कार्यम्। "विशेषेण महीपाल श्रवणं वर्द्धते यदि। तिथिक्षये न भोक्तव्यं द्वादशीं नैव लङ्घयेत्„ इति निर्णयामृते मार्कण्डेयोक्तेः। क्षये अन्ते इत्यर्थः। "एकादशीमुपोष्यैव द्वादश्यां पारणं स्मृतम्। त्रयोदश्या

न तत्कुर्यात् द्वादश द्वादशीक्षयात् „ इति मात्स्यात् कौर्माच्च । * यदि च तादृशस्थले श्रवणस्य मध्यभागस्तथापि स उपेक्षणीयः । द्वादशीत्यागे द्वादश द्वादशीक्षयात् । मध्यभागमध्ये पारणे एकक्षयात् । ‘ आभाका „ इत्यस्य समूलत्वेऽपि दोषस्योभयत्र तौल्यादिति । * यदा तु शुद्धोनायां विद्धोनायां वा स्वल्पं श्रवणं द्वितीयदिने च भूयस्तदा श्रवणमध्यभागस्त्याज्यः । “ मैत्राद्यपादे स्वपितीह विष्णुः पौष्णान्त्यपादे प्रतिबोधमेति । श्रुतेश्च मध्ये परिवृत्तमेति सुप्तप्रबोधपरिवर्त्तनमेव वर्ज्यम् „ इति विष्णुधर्मवाक्यात् । “ आभाकासितपक्षस्य मैत्रश्रवणरेवती । सङ्गमे नैव भोक्तव्यं द्वादश द्वादशीर्हरेत् „ इति वाक्यं तु केचिन्निर्मूलमित्याहुः । यदि समूलं तदाऽपि पूर्वोक्तविष्णुधर्मवाक्येनोपसंहारात्पूर्वोक्तैव व्यवस्थेति दिक् ॥ इतिभाद्रपदोत्सवाः ॥ अथाश्विने नवरात्रारंभ औदयिक्यामेव प्रतिपदीति तत एव [१]व्यवस्थेति विशेषप्रयोजनाभावाच्च न विचार्यते ॥ अथाश्विने शुद्धदशम्यां विजयोत्सवः ॥ तन्निर्णयार्थं प्रतापमार्त्तण्ड-निर्णयामृत-भगवद्भास्कर-दिन-

---

पाठान्तरम्- ** एतच्चिन्हमध्यगः पाठः क्वचिन्नास्ति । १ पर्वमन्तव्यम्- ‘ व्यवस्थेति, इत्यक्षराणि केषुचित्पुस्तकेषु नसन्ति किंतु ‘ पर्वमन्तव्यम् , इत्यस्याग्रे ‘ विशेषत्याद्यस्ति ॥

करोद्योत-हेमाद्रि-निर्णयसिन्धु-प्रभृतिस्थानि वचांसि पूर्वं सङ्गृह्य न्ते । पुराणसमुच्चये " दशम्यां च नरैः सम्यक् पूजनीया ऽपराजिता । ऐशानीं दिशमाश्रित्य अपराण्हे प्रयत्नतः । या पूर्णा नवमीयुक्ता तस्यां पूज्या ऽपराजिता । क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः । आश्विनस्य सिते पक्षे दशम्यां पूजयेन्नरः । एकादश्यां न कुर्वीत पूजनं चापराजितम् „ इति । ग्रन्थान्तरे । " मूलेनागमनं देव्याः पूर्वाषाढासु पूजनम् । उत्तरासु बलिं दद्याच्छ्रवणे चापराजिता „ इति स्कान्दे । " दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नृपः । तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत् „ इति भृगुरपि । " आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु । सायंकाले शुभा यात्रा दिवा वा विजयक्षणे । एकादशो मुहूर्त्तोऽपि विजयः परिकीर्त्तितः । तस्मिन्सर्वैर्विधातव्या यात्रा विजयकाङ्क्षिभिः „ इति । विश्वरूपः । " आश्विनस्य सिते पक्षे सीमातिक्रमणोत्सवः । विजयाय मुहूर्त्ताय कर्त्तव्यो विजयक्षणे । नवम्या सहिता कार्या दशम्याश्वयुजे सिता । एकादश्या युता जातु न कार्या जयकाङ्क्षिभिः „ इति । रत्नकोशे नारदः । " ईषत्संध्यामतिक्रान्तः किंचिदुद्भिन्नतारकः । स कालो विजयो ज्ञेयः

सर्वकार्यार्थसिद्धिदः „ इति । नारदः । “ सूर्योदये यदा राजन् दृश्यते दशमी तिथिः । आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः । इषस्य दशमीं शुक्लां पूर्वविद्धां न कारयेत् । श्रवणेनापि संयुक्तां राज्ञां पट्टाभिषेचने „ इति । धर्मविवृतौ । “ आश्विने दशमी शुक्ला श्रवणेन समन्विता । विजयादशमी प्रोक्ता सैव चात्यन्तदुर्लभा „ इति । कश्यपः । “ उदये दशमी किंचित्संपूर्णैकादशी यदि । श्रवणर्क्षे यदा काले सा तिथिर्विजयाऽभिधा । श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः । उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो नराः „ इति । गोपथब्राह्मणे भविष्ये पुराणसमुच्चये च “ वास्त्वादिपूजनखंजनालोकनादिरूपमनुष्ठेयान्तरमपि बहुवाक्यसमाजेनापरार्कादावुक्तम् । तत्र तिथिद्वैधे पट्टाभिषेचने तु सर्वमते परैव । इतरेषु तु श्रवणस्य कर्मकालव्याप्त्या केचन निर्णयमाहुः । अपरे च तिथिस्पृक्श्रवणस्य कर्मकालव्याप्त्या । इतरे च दशम्यां कर्मकालव्याप्त्या । श्रवणयोगाभावे तु सर्वेऽपि लल्लवाक्यमुदाहृत्य तिथिमेव प्रधानयन्ति । तत्कालं बहवोऽपराण्हमेवाहुः । अपरे त्वीषत्संध्यामतिक्रान्तं प्रदोषमाहुः । आद्यमप्येके त्रेधा विभजन्ते । अन्ये तु पञ्चधा । विजयमुहूर्तमपि के-

चनेकादशमाद्रियन्ते । इतरे तु पञ्चदशीं । अपरे च प्रदोषमिति । तत्र किमादरणीयम् । तत्तदाद्यमेवेति वदामः । कुतः नक्षत्रप्राबल्याद्वचनस्वारस्याद्व्यवस्थितिसामञ्जस्यात्सकलानुष्ठेयकरणसौकर्याच्चेति । तथा हि । "यत्पुण्यं नक्षत्रं तद्वट्कुर्वीतोपव्युषं । यदा वै सूर्य उदेति अथ नक्षत्रं नैति । यावति तत्र सूर्यो गच्छेत् । यत्र जघन्यं पश्येत् । तावति कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते । एवꣳह वै यज्ञेषु च शतद्युम्नं च मात्स्यो निश्चसाययांचकार " । इति श्रुतिर्हि पुण्याहे कर्मकरणं विदधाना नक्षत्रस्वल्पतायां कथं महत्कर्मकरणं संभविष्यतीति जानाना च " तद्वट्कुर्वीतोपव्युषम् " इत्यनेन पुण्यनक्षत्रस्य प्रत्यक्षीकरणं सोपायं विधत्ते । " एवꣳह वा " इत्यनेन निदर्शनं शिष्टाचारं च (प्र) दर्शयति । यदि नक्षत्रस्य फलोपधायकत्वरूपं प्राबल्यं नाभिप्रेयात् किमितेयं विदध्यादिति नक्षत्र (मन्या) मितरा--पेक्षया प्रबलमेव । न चेदं नक्षत्रेष्टिविषयकमिति वाच्यम् - "यां कामयेत दुहितरं प्रिया स्यादिति तां निष्ट्यायां दद्यात् इत्यादिभिः स्वात्याभिजिद्व्रतीषु कन्यादान जयोद्यम पशुकार्यकरणानामग्रे विधानदर्शनस्यासंगतत्वापत्तेः । "यत्किंचार्वाचीनꣳसोमात " इत्यनेनान्येषामपि कर्मणां रेवत्यां विधानाच्चेति । पुण्यत्वं चात्र तत्तत्कार्योपयोगित्वेन

विहितत्वमेव। नतु देवनक्षत्रत्वम्। अभिजिद्देवत्त्ये।र्यमनक्षत्रत्वेनाग्रे व्यवस्थापनात्। नन्वेवं सति पुराणसमुच्चयस्कान्दादिवचसां का गतिरिति चेत्। तत्तिथियुक्तेऽन्हि नक्षत्रयोगाभावो यस्मिन्वर्षे तद्विषयकत्वमेव। अत एव कश्यपेन तद्दिनर्क्षे इत्युक्तम्। नचात्रोत्तरपदलोपी समासोऽस्तु। तथा सति न केवलमृक्षस्यैव प्राधान्यमत्रायातीति वाच्यम्। तादृक्समासेऽपि तिथेः सहभावप्रतीत्या तत्प्राधान्यस्य दुर्घटत्वादिति। तत्कालश्च विजयमुहूर्त्तद्वयघटितस्त्रेधा विभक्तो ऽपराण्ह एवोचितो राज्ञाम्। तदैव गोपथब्राह्मणोदितयावत्कर्मकरणसौकर्यसंभवात्। अन्येषां तु प्रदोषः पञ्चदशो विजयमुहूर्त्तश्च। भृगुवाक्ये एकादशस्य मुहूर्त्तस्य स्फुटं गौणतरत्वसूचनात्। एवं सतीदमत्र संपद्यते। पट्टाभिषेकस्तावत् शुद्धाधिकायां प्रथमेऽन्हि श्रवणे प्रथमदिन एव। द्वितीयेऽन्ह्येव श्रवणयोगे द्वितीयदिन एव। अतिदुर्लभयोगविशेषलाभात्। तदभावेऽपि तु पूर्वदिन एव। * एकादश्यतिरिक्तवृद्धौ उत्तरस्या निषेधात् *। विद्धाधिकायामपि द्वितीयैव। विद्धानिषेधात्। विद्धाक्षये

पाठान्तरम्. १ द्वितीयदिन एव। वृद्धौ उत्तरस्या एवौचित्यात्। -* *एतचिन्हमध्यगतः पाठः कचित्पुस्तकेनास्ति। ' विद्धानिषेधात्-, इयंपङ्क्तिरपि---प्रतिप्रसवाभावादित्यस्याग्रेऽस्ति। २ तथैव।

तु न भवत्येव । प्रतिप्रसवाभावात् । अपराजितापूजनसीमोल्लङ्घनादि तु पूर्वेद्युरेव श्रवणस्य कर्मकालव्याप्तौ पूर्वयुतायाम् । परदिन एव तथात्वे परस्याम् । दिनद्वये समविषमैकदेशव्याप्तौ पूर्वत्रैव । पूर्वविद्धाप्राशस्त्यात् । यत्तु निषेधशास्त्रम् । तदपराजितापूजनविषयं राजविषयं च न त्वन्यविषयम् । तेन भगवति यवनवदलार्पणं उक्तविधायामेव कार्यमिति न कोऽपि शङ्कावकाशः ॥

आश्विनशुक्लपौर्णमास्यां रासोत्सवः ॥ स च राकायामेव कार्यो न त्वनुमत्यां अखण्डमण्डलस्येन्दोस्तदैव दर्शनात् । युग्मवाक्याच्चेति दिक् ॥ इत्याश्विनोत्सवाः ॥

॥ अथ कार्तिकोत्सवाः ॥ तत्र हेमाद्रि– निर्णयामृत– निर्णयसिन्धु– निर्णयदीप– समयालोक–दिनकरोद्योत- भगवद्भास्कर- स्थदीपोत्सवसंबन्धिवाक्यसङ्ग्रहः ॥ तथा हि ज्योतिर्निबन्धे नारदः । “आश्विने कृष्णपक्षे तु द्वादश्यादिषु पञ्चसु । तिथिषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः„ । स्कान्दे । “कार्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे । यमदीपं बहिर्दद्यादपमृ-

---

पाठान्तरम्- १ इदं वचनम् ** एतच्चिन्हगतम्-श्रीकृष्णावतारावसरे. इत्यादि अग्रिम-
४४ पृष्ठस्थम् पाठान्तरं च क्वचित्पुस्तके नास्ति.

त्युर्विनश्यति „ * श्रीकृष्णावतारावसरे नरकनामाऽसुरः संजातस्तस्मै श्रीकृष्णेन वरो दत्तस्तेन कार्तिककृष्णचतुर्दश्यां नरकचतुर्दश्यां मलस्नानं निरयप्राप्त्यभावाय प्रयत्नेन कर्तव्यम् । तथा चोक्तं पद्मपुराणोत्तरखण्डे । श्रीकृष्णचरित्रे शिवेनोमां प्रति "अन्यलोकहितार्थाय वृणेऽहं वरमुत्तमम् । मृते ऽहनि तु मे कृष्ण ईश भूतमहेश्वर । ये नरास्तु मलस्नानं कुर्वन्ति मधुसूदन । न तेषां निरयप्राप्तिर्भवत्वेव यदूत्तम । एवमस्त्विति गोविन्दो ददौ तस्मै वरं प्रभुः„ इति । * (भविष्योत्तरेब्राह्मेच) । " कार्तिके कृष्णपक्षे तु चतुर्दश्यामिनोदये । अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः „ । तिलतैलेन कर्त्तव्यं स्नानम् „ इत्यपि क्वचित्पाठः । अत्र इनोदये दिनोदये इवोदये विधूदये इति पाठचतुष्टयं पुस्तकपुराणभेदेन दृश्यते । तत्रैव । " तैले लक्ष्मीर्जले गङ्गा दीपावल्याश्चतुर्दशीम् । प्रातः स्नानं तु यः कुर्यात् यमलोकं न पश्यति" । अत्र "प्राप्येति शेषः „ इति निर्णयसिन्धुः । सप्तम्यर्थे द्वितीयेति दिनकरोद्योतः । कश्यपसंहितायाम् । " इन्दुक्षयेऽपि सङ्क्रान्तौ रवौ पाते दिनक्षये । अत्राभ्यङ्गो न दोषाय प्रातः पापापनुत्तये „ । स्मृत्यन्तरे ।

पाठांतरम् १ (स्कान्दे) इतिक्वचित्पाठः । २ तत्रतैलेनेति क्वचित्पाठः ।

" भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः। तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु"। भविष्योत्तरे। " पूर्वविद्धचतुर्दश्यामाश्विनस्य सितेतरे। पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः। ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः"। ज्योतिर्निबन्धे भविष्योत्तरे। " अपामार्गं भ्रामयित्वा के कुर्याद्यमतर्पणम्। नरकाय प्रदातव्यो दीपः संपूज्य देवताः"। कश्चित्तु गार्ग्यवचस्त्वेनेदमुदाजहे। दिवोदासीये च भविष्ये। " अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः। तस्याब्दिकभवो धर्मो नश्यत्येव न संशयः"। सर्वज्ञनारायणः। " तथा कृष्णचतुर्दश्यामाश्विनेऽर्कोदयात्पुरा। यामिन्याः पश्चिमे यामे तैलाभ्यङ्गो विशिष्यते"। यत्तु " त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी। रात्रिशेषे त्वमावास्या तदाऽभ्यङ्गे त्रयोदशी" इति वचनम्। तन्निर्मूलमिति निर्णयसिन्धुः। प्रामाणिकमिति भगवद्भास्करः। क्वचिच्च। " स्निग्धस्नानं न कर्त्तव्यं द्वितीयायां सदैव हि। दशम्यां च त्रयोदश्यां वर्जयित्वा तथाऽऽश्विनम्"। लैङ्गे। "माषपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः। प्रेताख्यायां चतुर्दश्यां सर्वपापैः प्रमुच्यते"। क्वचित्तु पाद्मे इत्युक्त्वा " ततः प्रदोषसमये दीपान्

दद्यान्मनोरमान् „ इत्यादिवचोनिचयेन दीपदानमाहुः नक्तं चाहुः ॥ अथामावस्या ॥ कालादर्शे । “ प्रत्यूष आश्वयुग्दर्शे कृताभ्यङ्गादिमङ्गलः । भक्त्या प्रपूजयेल्लक्ष्मीमलक्ष्मीविनिवृत्तये „ । भविष्योत्तरादित्यपुराणयोः अभ्यङ्गमभिधाय “ एवं प्रभातसमये अमायां च नराधिप । स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च । कृत्वातु पार्वणश्राद्धं दधिक्षीरघृतादिभिः दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात् । प्रदोष समये लक्ष्मीं पूजयित्वा यथाक्रमम् । दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च । चतुष्पथे स्मशाने च नदीपर्वतवेश्मसु । वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च । वस्त्रैःपुष्पैः शोभितव्याः क्रयविक्रयभूमयः । दीपमाला परिक्षिप्ते प्रदेशे तदनन्तरम् । ब्राह्मणान्भोजयित्वाऽऽदौ संभोज्य च बुभुक्षितान् । अलंकृतेन भोक्तव्यं नववस्त्रोपशोभिना „ । स्कान्देऽपि । “ ततः प्रदोषसमये दीपान् दद्यान्मनोरमान् । ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च । प्राकारोद्यानवापीषु प्रतोलीनिष्कुटेषु च । मन्दुरासु च सर्वासु हस्तिशालासु चैव हि „ । * स्कान्दे पुरुषोत्तममाहात्म्ये तु । उत्थापनमहोत्सवप्रसङ्गे । “ पूजयित्वा जगन्नाथं कौमुद्याख्ये महोत्सवे ।

---

* * एतच्चिन्हमध्यस्थः पाठः क्वचित्पुस्तके नास्ति

अक्षक्रीडादिभिः पुष्पवस्त्रमाल्यानुलेपनैः „। इत्यप्यनूदितम् * । भविष्योत्तरे । “ कार्तिके कृष्णपक्षस्य पञ्चदश्यां निशामुखे । यथेष्टचेष्टं दैत्यानां राज्यं तेषां महीतले „ । इत्युपक्रम्य “ ततोऽपराह्णसमये घोषयेन्नगरे नृपः । अद्य राज्यं बलेर्लोको यथेष्टं चेष्टतामिति । लोकश्चापि पुरे हृद्ये सुधाधवलिताजिरे । गीतवादित्रसंघुष्टे प्रज्वालितसुदीपके । अन्योन्यप्रीतिसंहृष्टदत्तताम्लानके जने । ताम्बूलहृष्टवदने कुङ्कुमक्षोदचर्चिते । दुकूलपट्टवसने नेपथ्यस्वर्णभूषणे । मित्रस्वजनसंबन्धिस्वगोत्रज्ञातिपूजिते „। व्रजेदिति शेषः ।“ ततोऽर्द्धरात्रसमये स्वयं राजा व्रजेत्पुरम् । अवलोकयितुं रम्यं पद्भ्यामेव शनैः शनैः । महता तूर्यघोषेण ज्वलद्भिर्हस्तदीपकैः । हर्म्यशोभासु (मु) खं यायात् कृतकैरश्वकैर्नरैः । बलिराज्यप्रमोदं च द (घु) ष्ट्वा स्वगृहमाव्रजेत् । एवं गते निशीथे तु जने निद्रार्धलोचने । तावन्नगरनारीभिः शूर्पडिंडिमवादनैः । निष्काश्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गणात् „ । ज्योतिर्निबन्धे भविष्योत्तरे । “ अमायामाश्विने मासि पितृकर्म विधाय च । दीपदानं ततः कुर्यात् प्रदोषे च तथोल्मुकम् „ ।अन्यच्च “ अपराण्हे प्रकर्त्तव्यं श्राद्धं पितृपरा-

यणे:। प्रदोषसमये राजन् कर्त्तव्या दीपमालिका „। क्वचित्तु "आदित्यपुराणे।" अमायां चैव देवास्तु कार्त्तिके मासि केशवात्। अभयं प्राप्य सुप्तास्तु सुखं क्षीरोदसानुषु। लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ताऽम्बुजोदरे अतोर्थं विधिवत्कार्यातुष्ट्यै तु सुखसुप्तिका। अर्धरात्रे भ्रमत्येव लक्ष्मीराश्रयितुं गृहान्। अतः स्वलंकृता लिप्ता दीपजाग्रज्जनोत्सवाः। सुधाधवलिताः कार्याः पुष्पमाल्यो (लो) पशोभिताः „। अत्र गृहाः कार्याः इति शेषः। अन्यच्च। " नारिकेलोदकं पीत्वा अक्षक्रीडां समाचरेत्। निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी। तस्मै वित्तं प्रयच्छामि अक्षक्रीडां करोति यः „। क्वचिच्च।* "स्त्रीसेवा जागरं रात्रौ पूजनं परिदेवनम्। पिण्डदाने कृते सर्वमाश्विनान्ते न दुष्यति,, इत्यप्युच्यते*। तथा। कुबेरपूजा-निशीथे लक्ष्मीपूजाऽप्युच्यते॥ प्रतिपदि च॥ ज्योतिर्निबन्धे। " नन्दायामुदयेऽभ्यङ्गं कृत्वा नीराजनं ततः सुबेशः (षः) सत्कथागीतैर्दानैश्च दिवसं नयेत् „। वशिष्टः। " वत्सरादौ वसन्तादौ बलिराज्ये तथैव च। तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते „। ब्राह्मे। " कार्तिके शुक्लपक्षे तु विधानद्वितयं भवेत्। नारीनीराजनं प्रातः सायं मङ्गलमालिका „। स्कान्दे। " प्रात-

* * एतच्चिन्ह मध्यस्थः पाठः क्वचित्पुस्तके नास्ति।

गोवर्द्धनः पूज्यो द्यूतं चापि समाचरेत्। भूषणीयास्तथा गावः पूज्याश्चा (स्त्वा) वाहदोहनाः „ । आदित्यपुराणे । " शंकरस्तु पुरा द्यूतं ससर्ज्ज सुमनोहरम्। कार्तिके शुक्लपक्षे तु प्रथमेऽहनि सत्यवत्। जितश्च शंकरस्तत्र जयं लेभे च पार्वती। अतोऽर्थे शंकरो दुःखी उमा नित्यं सुखोचिता । तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः । तस्मिन् द्यूते जयो यस्य तस्य संवत्सरं जयः। पराजयो विवृद्धश्च लाभनाशकरो भवेत्। श्रोतव्यं गीतवाद्यादि स्वनुलिप्तैः स्वलंकृतैः । विशेषवच्च भोक्तव्यं प्रशस्तैर्बान्धवैः सह। तस्यां निशायां कर्त्तव्यं शय्यास्थानं सुशोभनम् । गन्धैः पुष्पैः स्तथा वस्त्रैर्दिव्यरत्नैरलंकृतम्। दीपमालापरिक्षिप्तं तथा धूपेन धूपितम् । दयिताभिश्चसहितैर्नेया सा च भवेन्निशा । नवैर्वस्त्रैश्च संपूज्या द्विजसंबन्धिबान्धवाः„। दुःखी वस्त्रादिहीनः। भविष्योत्तरे। " ततः प्रबुद्धे सकले जने प्राप्तमहोत्सवे। द्विजाभिवादनपरे सुखरात्र्यादिवादिनि । प्रभातसमये राज्ञा तोषणीयास्ततोजनाः। सुवासिनीभ्यो देयानि वस्त्राण्याभरणानि च। सद्भावनैव संतोष्या दानेन च तथा द्विजाः। इतरे चान्नपानेन सन्मानेन च पण्डिताः।

वस्त्रैस्ताम्बूलदानैश्च पुष्पकर्पूरकुङ्कुमैः । तथा संपूजयेन्मानैरन्तःपुरविलासिनीः । पदातिजनसंघातान् ग्रैवेयैः कटकैः शुभैः । स्वनामाङ्कैः स्वयं राजा तोषयेत्स्वजनान् पृथक् । वृषभान् महिषांश्चैव युध्यमानान्परैः सह । गजानश्वांश्च योधांश्च पदातीन्समलंकृतान् । मञ्चारूढः स्वयं पश्येन्नटनर्त्तकचारणान् । क्रुद्धापयेत्त्रासयेच्च गोमहिष्यादिकं ततः । एतद्गोक्रीडनं कार्यं प्रातर्नन्दादिने नरैः । ततोऽपराह्णसमये पूर्वस्यां दिशि भारत । मार्गपालीं प्रबध्नीयात्तुङ्गे स्तम्भेऽथ पादपे । कुशकाशमयैर्दिव्यां लम्बकैर्बहुभिर्नृप । दर्शयित्वा गजानश्वान्मार्गपाल्यास्तले नयेत् । नीराजनं च तत्रैव कार्यं राष्ट्रजयप्रदम् । मार्गपालीतलेनेत्थं यान्ति गावो वृषा गजाः । राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः । मार्गपालीं समुल्लङ्घ्य नीरुजः स्युः सुखान्विताः । कृत्वैतत्सर्वमेवाह्नन् रात्रौ दैत्यपतेर्बलेः पूजां कृत्वा नृपः साक्षाद्भूमौ वै मण्डले कृते [१]" । अह्नन् अह्नीत्यर्थः । " बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः । सर्वाभरणसंपूर्णं विंध्यावल्या सहासितम् । द्विभुजं दैत्यराजानं कारयित्वा नृपः स्वयम् । गृहस्य

१ पाठांतरम्---भूमौ मण्डलके कृते -इति च पाठः

मध्ये शालायां विशालायां ततोऽर्चयेत् । लोकश्चापि गृहस्यान्तः शय्यायां शुक्लतन्दुलैः । संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत्" । पञ्चरङ्गकृतां मूर्तिं राजा पूजयेत् । लोकस्तु शुक्लतन्दुलकृतामित्यर्थः । "बलिमुद्दिश्य दीयन्ते दानानि कुरुनन्दन । यानि तान्यक्षयाण्याहुर्मयैतत्संप्रदर्शितम् । यदस्यां दीयते दानं स्वल्पं वा यदि वा बहु । तदक्षयं भवेत्सर्वं विष्णोः प्रीतिकरं परम् । कौ मुत्प्रीतिर्बलेर्यस्माद्दीयतेऽस्यां युधिष्ठिर । अतोऽर्थे पार्थिवैः पार्थ तेनैषा कौमुदी स्मृता । यो यादृशेन भावेन तिष्ठत्यस्यां युधिष्ठिर । हर्षदैन्य दिरूपेण तस्य वर्षं प्रयाति हि । तस्मात्प्रहृष्टैस्तुष्टैश्च कर्तव्या कौमुदी नरैः । दीपोत्सवे जनितसर्वजनप्रमोदे कुर्वन्ति ये सुमतयो बलिराजपूजाम् । दानोपभोगसुखऋद्धिशताकुलानां राजन् प्रयाति सकलं प्रमुदैव वर्षम्" । आदित्यपुराणे । "कुशकाशमयीं कुर्याद्वृष्टिकां[1] सुदृढां नवाम् । तामेकतो राजपुत्रा हीनवर्णास्तथाऽन्यतः । गृहीत्वा कर्षयेत्पुंसां यथासारं मुहुर्मुहुः । जयेऽत्र हीनजातीनां जयो राज्ञस्तु वत्सरम् । जयचिन्हमिदं राजा विदधीत प्रयत्नतः" । समसंख्याकाः समबलाश्च

---

१ वृष्टिकाम् – रज्जुम ।

कर्षयेयुरित्यर्थः । अथ दिनद्वयमधिकृत्य कृत्यम् । ज्योतिषे । "तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितृणां मार्गदर्शनम्" । दिवोदासीये ब्राह्मे । "अमावास्याचतुर्द्दश्योः प्रदोषे दीपदानतः । यममार्गान्धकारेभ्यो मुच्यते कार्तिके नरः" । अथ दिनत्रयमधिकृत्य । पृथ्वीचन्द्रोदये ब्राह्मे । "इषे भूते च दर्शे च कार्तिके (क) प्रथमे दिने । यदा स्वाती तदाऽभ्यङ्गस्नानं कुर्याद्दिनोदये । ऊर्जशुक्लद्वितीयान्ततिथिषु स्वातियुक्प्रगे । मानवो मङ्गलस्नायी नैव लक्ष्म्या वियुज्यते । दीपैर्नीराजनादत्र सैषा दीपावली स्मृता" । ज्योतिर्निबन्धे नारदः । "इषासितचतुर्द्दश्यामिन्दुक्षयतिथावपि । ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली भवेत् । कुर्यात्संलग्नमेतच्च दीपोत्सवदिनत्रयम्" । क्वचित्तु । "संलग्नमेव कर्त्तव्यं दीपोत्सवदिनत्रयम् । विभेदं कुरुते यस्तु नरके स निमज्जति, इतिदोषोऽपि पठ्यते। भविष्योत्तरे। 'पुरा वामनरूपेण प्रार्थयित्वा धरामिमाम् । ददावतिथिरिन्द्राय बलिं पातालवासिनम् । कृत्वा दैत्यपतेर्दत्त्वा अहोरात्रत्रयं बुधः" । ज्योतिर्निबन्धे । "आश्विने मासि भूतादितिथयः कीर्तितास्त्रयः । दीपदानादिकृत्येषु ग्राह्या मध्यान्हकालिकाः । अर्द्धोदयात्सहस्रांशोः प्रातः स्या

त्रिमुहूर्त्तकः । संगवस्त्रिमुहूर्त :स्यान्मध्यान्हस्त्रिमुहूर्त्तकः। शारदास्त्रिमुहूर्त्तः स्यात्सायान्हस्त्रिमुहूर्त्तकः। यदि स्युः संगवादर्वागेते च तिथय स्त्रयः । दीपदानादिकृत्येषु कर्त्तव्याः पूर्वसंयुताः । अथ चेत्संगवादूर्ध्वमेते च तिथयस्त्रयः ॥ ४ ॥ भवन्ति वृद्धिगामित्वे कर्त्तव्याः परसंयुताः,।क्वचित्तु।'अमायामाश्विने मासि' इत्याभिधाय। "रिक्तायुक्ते यदा दर्शे श्राद्धकालो न लभ्यते । तदाऽपरेऽन्हि कर्त्तव्यं श्राद्धं दीपोल्मुकं तथा ॥ १॥ श्राद्धकाले यदा दर्शो ऽपराण्हे प्रतिपद्यदि । दीपदानादिकं कर्म तत्प्रदोषे न दुष्यति ॥ २ ॥ दर्शश्राद्धं विना यस्मिन् राष्ट्रे दीपोल्मुकं भवेत् ॥ तद्राष्ट्रं नाशमायाति परचक्राग्नितस्करैः" ॥३॥ क्वचित्तु॥ "नैकः श्राद्धद्वयं कुर्यादानिमित्ते कदाचन। निमित्ते सति कर्त्तव्यं विना वृद्धिमहालयम्"। इत्यपि मध्ये पठन्ति॥ "पूर्वं नीराजनं कृत्वा दीपान्दत्वा तथैव च। पश्चाद्यः कुरुते श्राद्धं तत्सर्वमासुरं भवेत्"। इत्युक्त्वा ततः। "आश्विने मासि दर्शादि" इत्येवं सार्द्धपद्यचतुष्कं लिखन्ति। क्वचित्तु।" सायान्हे च चतुर्दश्याममा यत्र प्रदृश्यते। तत्र श्राद्धं तथा दीपं पितृणामक्षयं भवेत् ॥ १ ॥

१ भूतादीति युक्तम् ।

आश्विनान्ते चतुर्दश्यां तुलासंस्थे दिवाकरे । दिनान्ते दृश्यते चामा कलामात्राऽपि कर्हिचित् ॥ २ ॥ तदाऽपराह्णे श्राद्धं स्यात्सायं दीपोल्मुकादिकम् । प्रातर्गोक्रीडनं कार्यं दर्शे नन्दायुते सदा ॥३॥ क्रीडन्त्यमा प्रातिपदि गावश्चेल्लोकमातरः । अश्वव्याधिभयं नैव राज्ञः शस्त्रभयं न हि ॥४॥ प्रतिपद्दर्शसंयोगे गावो यत्र प्रपूजिताः । तत्राऽऽयुर्वर्द्धते नित्यं राज्यं पुत्रा धनं तथा ॥ ५ ॥ कार्तिकस्याऽसिते पक्षे तुलाभानुर्यदा भवेत् ॥ यत्नेन वर्जयेद्भद्रां गवां क्रीडनकर्मणि " ॥ ६ ॥ तत्रैव ब्रह्माण्डे ॥ " नन्दा किंचिद्युता यत्र दृश्यते च द्वितीयया । बलेर्दिनं न कर्त्तव्यं चन्द्रदर्शनसंभवात् ॥ १ ॥ गवां क्रीडादिने नन्दा द्वितीयामिश्रिता यदा ॥ क्षतिरायुः प्रजाङ्गना छत्रभङ्गो नराधिपे „ ॥ २ ॥ तत्र निर्णयभास्करे च ब्राह्मे ॥ " आश्विने ऽशुक्लपक्षे तु तुलाभानुर्यदा भवेत् । स्त्रियः क्रीडन्तु दर्शे तु गावो नन्दासु कार्तिके ॥ १ ॥ पाद्मे । " पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनम् „ ॥ तथा । " या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृपः । पूजनात्त्रीणि वर्द्धन्ते प्रजा गावो महीपतिः „ ॥ १ ॥ देवलः । " प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम् । परविद्धासु यः कुर्यात्पुत्रदारधनक्षयः " ॥ पुराणसमुच्चये

" गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः । सोमो राजा पशून् हन्ति सुरभीपूजकांस्तथा ,, ॥ तथा ॥ " नन्दाया दर्शने रक्षा बलिदानं दशासु च । भद्रायां गोकुलक्रीडा स देशो वै विनश्यति ॥ प्रतिपद्यग्निकरणं द्वितीयायां तु गोर्चनम् । भूपच्छेदं करिष्येते वित्त नाशं कुलक्षयम् ,, ॥ अथ अमाविद्धानिषेधः ॥ ब्राह्मे ॥ " कार्तिके शुक्लपक्षे तु तुलाभानुर्यदा भवेत् । यत्नेन वर्जयेद्दर्शे गोक्रीडायां तु भूतले ॥ गावः संक्रीडमानास्तु नाशं यान्ति न संशयः । आयुःक्षतिः प्रजानाशश्छत्रभङ्गो नराधिप ॥ प्रतिपत्सद्वितीयाचेद्गवां चैव प्रपूजनम् । आयुर्वृद्धिः प्रजावृद्धी राज्यवृद्धिस्तथा भवेत् ॥ अमावास्यायां क्रीडन्ते गावो लोकस्य मातरः । अश्वव्याधिर्भवेत्तत्र राज्ञां शस्त्रभयं भवेत् ,, ॥ शिवरहस्ये ॥ " प्रतिपद्दिवसे कुर्यात्पूजां गोवर्द्धनस्य तु । पूर्वविद्धा न कर्तव्या या च दृश्या दिवोदया ॥ नन्दा यामे मोदमाना भद्रा नष्टा प्रजायते । पूतं भवति तद्वर्षं राज्यदं सुखवर्द्धनम् " ॥ (स्कान्दसमुच्चये) ॥ " त्रियामिकादर्शतिथिर्भवेच्चेत्सार्द्धत्रियामा प्रतिपद्विवृद्धौ । दीपोत्सवे ते मुनिभिः प्रदिष्टे इतोऽन्यथा पूर्वयुते विधेये ॥ वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामि-

का । द्वितीया वृद्धिगामित्वादुत्तरा तत्र चोच्यते " ॥ ब्राह्मे विधानद्वितयमभिधाय ॥ " अथचेत्प्रातिपत्स्वल्पा नारीनीराजनं भवेत् । द्वितीयायां तदा कुर्यात्सायं मङ्गलमालिकाम् "॥ भविष्यपुराणे ॥ " लभ्येत यदि वा प्रातः प्रतिपद् घटिकाद्वयम् । तस्यां नीराजनं कार्यं सायं मङ्गलमालिका " ॥ देवीपुराणे ॥ " प्रातर्वा यदि लभ्येत प्रतिपद् घटिका शुभा । द्वितीयायां तदा कुर्यात् सायं मङ्गलमालिकाम् ॥ आश्विनान्ते यदा दर्शे नारीनीराजनं भवेत् । नारीणां तत्र वैधव्यं देशे दुर्भिक्षमेव च ॥ कार्तिके शुक्लपक्षादावमावास्याघटीद्वयम् । देशभङ्गभयान्नैव कुर्यान्मङ्गलमालिकाम् " इति । ईदृशानि वचांसि निर्णयामृत-प्रतापमार्तण्ड- विश्वप्रकाश-चन्द्रप्रकाशादिष्वन्यान्यपि सन्ति । एवमेतेषु चतुर्दश्यामुदये नित्यं काम्यं चाभ्यङ्गस्नानं ततो यमतर्पणं शैवद्विजभोजनं माषपत्रशाकभोजनं च यथावसरं नक्तं च । प्रदोषे च दीपदानोल्मुके । पूर्वरात्रे च नीराजनम् ॥ दर्शे च प्रत्यूषे मङ्गलस्नानं प्रातश्च देवादिपूजाप्रणामाद्यस्ततो ऽपराण्हे पार्वणश्राद्धं प्रदोषे च नीराजनलक्ष्मीपूजनदीपदानानि ॥ एषां पौर्वापर्यं च । पितृदीपदानमुल्मुकं च । रात्रौ च जागराद्यनेकोत्सवगीत-

वाद्यादिश्रवण स्त्रीसेवनादि—यथेष्टचेष्टाः। निशीथे च लक्ष्मीभ्रमणं लक्ष्मीपूजा कुबेरपूजा च॥ अपररात्रे चालक्ष्मीनिस्सारणं, प्रतिपदि चोदयेऽभ्यङ्गनीराजने, पूर्वाह्णे गोवर्द्धनपूजा द्यूत गोपूजन जनतोषण गोक्रीडन वृषगजादियोधन नारीनीराजनानि॥ अपराह्णे मार्गपालीसमुल्लङ्घन नीराजने। सायं मङ्गलमालिका रज्वाकर्षणं चानियतकालं, किंचित्प्रक्रम्य तदनन्तरं च रात्रौ बलिपूजा शय्यास्थानमण्डन स्त्रीसाहित्यादयो विधीयन्ते॥ भूतादित्रयस्य बलिराज्यसंबन्धित्वं चोच्यते॥ संलग्नकर्त्तव्यताकत्वं च विधीयते॥ इति तिथिकृत्यसंग्रहः॥ तन्निर्णये तु केचन श्राद्धदीपदानयोः पूर्वापरभाववैपरीत्यजदोषबोधकशास्त्रकांदिशीकास्तयो रङ्गाङ्गिभावमङ्गीकृत्य तिथिद्वैधे पूर्वापरभावनिर्वा[१]हाय दिनान्ते दर्शे चतुर्दश्यां श्राद्धविधिमवतारयन्तस्तत्फलस्तावकं शास्त्रं प्रतिपद्युल्मुकानिषेधशास्त्रं च दर्शयन्तो वक्ष्यमाणमप्रमाणयन्ति॥ अन्ये च तद्दोषभीताः पूर्वोक्तमप्रमाणीकृत्य वैपरीत्यमङ्गीकुर्वन्तस्तिथिद्वैधे पूर्वापरभावानिर्वा[२]हाय भूतादित्रयस्य

पाठान्तरम्.

१ तन्निर्वाहायेति क्वचित्पाठः॥　२ तन्निर्वाहायेति च पाठः॥

* वक्ष्यमाणप्रकारकत्वमङ्गीकृत्य तदर्थं * मध्यान्हकालि-
कतावाक्यं सङ्गवादर्वाङ्निवृत्त्यूर्ध्वगमनयोः पूर्वपरयुता-
त्ववाक्यद्वयं चावतार्य दर्शस्य श्राद्धकालव्याप्तौ प्रतिपदि
दीपदानादिशास्त्रं ('उदाहरन्ति,) प्रतिपद्युल्मुकप्रति
प्रसवशास्त्रं च दर्शयन्ति ॥ केचन च मध्यान्हकालि
कादिशास्त्रगतदीपदानादिपदमतद्गुणसंविज्ञानबहु
व्रीहिणा समस्य + प्रथमदिन एव प्रदोषव्या
पित्वे + तत (पूर्व) कर्मविषयत्वं शास्त्रस्याहुः। + यु
क्तं तु पंचमीतत्पुरुषेण (तदर्थं) समस्तव्यमिति॥
अथ बहवस्तु तत्तच्छास्त्रं निर्मूलमित्युक्त्वा श्रा
द्धोल्मुकादिवैपरीत्यदोषापेक्षका उभयविधाङ्गा
भावनिरादरास्तत्रापि केचिद्वैपरीत्यदूषकं तन्निव
हकशास्त्रमलिखन्तः प्रतिपद्युल्मुकनिषेधशास्त्रं
विषयविशेषे सावकाशयन्तः केचन चालिखन्त
पूर्णतिथावेव तत्पूर्वापर्यमाद्रियन्ते नेतरत्र ॥ प्रतिप
च बलिपूजायां पूर्वविद्धात्वं नारीनीराजनमङ्गलमालि

---

* * एतच्चिन्हमध्यस्थः पाठः क्वचित्पुस्तके नास्ति । तदग्रे च 'आश्विने मा
भूतादीति वाक्यं सार्द्धचतुष्कं ज्योतिर्निबन्धीयम्' इत्येतावदधिकं दृश्यते । ततो मध
न्हेत्यादि ॥ १ एतत्पदं क्वचिन्नास्ति । + + एतच्चिन्हमध्यगतः पाठः केषु चित
स्तकेषु नास्ति । ÷ ÷ एतच्चिन्हमध्यगतः पाठः केषु चित्पुस्तकेषु नास्ति
वदामीत्यधिकं च दृश्यते । २ दूषकतत्तन्निर्वाहकेत्यादि क्वचित्पाठः ॥

कयोश्च परात्वं गोक्रीडने तु चन्द्रदर्शनपरविद्धात्वयो-स्तिथिक्षयसाम्याभ्यां च पूर्वयुतात्वमन्यथा परयुतात्वं बहव आहुः । के चन चाश्विनकृष्णकार्तिकशुक्लयोस्तु-लासंक्रमेण पूर्वपरयुतात्वं गोक्रीडायामाहुः ॥ संलग्न-ताशास्त्रस्य च मलमासनिवृत्त्यर्थकत्वं के चनाहुः ॥ अपरे च दीपदानमात्रविषयत्वमिति ॥ तत्र किं किमा-दरणीयं दोषाद्यजनकं सत् यद् व्यवस्थितिसमञ्जसम् वचनस्वरसास्तं वा तदादर्त्तव्यमुच्यते ॥ तथा हि ॥ श्राद्धदीपादिपूर्वापरभावविघटनजदोषभीततया[2] यदि-तयोरङ्गाङ्गिभाव[3] आद्रियते तदा—दीपदानाङ्गभूत-पार्वणश्राद्धं दार्शिकातिरिक्तमङ्गीकार्यम् ॥ " कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः " इति वाक्ये द्रव्य-विशेषस्य परिसंख्यानात्[4] । आदिशब्देन द्रव्यान्तर-ग्रहणेऽप्यनुक्तस्य गौणत्वात् ॥ पार्वणशब्दश्च त्र्युद्दे-श्यकश्राद्धपरः ॥ " एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं विदु-र्बुधाः ॥ त्रीनुद्दिश्य तु यच्छ्राद्धं पार्वणं तत्प्रचक्षते " इति भगवद्भास्करे वचनात् । " चत्वारः पार्वणाः कार्याः" इत्यादिषु तथा दर्शनाच्च । युक्तं चैतत् ॥ अ-

१ वृद्धिभ्यां चेति कचित्पाठः ॥ २ दोषभीतभीततया ॥ ३ त (दं) दांगांगि-भावादरणे ॥ ४ द्रव्यान्तरपरिसंख्यानात् ॥

न्यथा दार्शिकश्राद्धमित्येव ब्रूयात् । तथा च पूर्वत्र सायं कलामात्रदर्शसत्त्वे द्वितीयदिने च प्रदोषे तदसत्त्वे पूर्वत्र दीपोत्सवकर्म ॥ तत्पूर्वदिने तत्र भूतासत्त्वे तु तद्दीपदानमपि प्रासङ्गिकं तांत्रिकं वा स्वकाल एव द र्शे॥ दार्शिकश्राद्धं तु द्वितीयदिने स्वकाल एव । एवं सति "सायान्हे च चतुर्दश्याम्" इति वाक्यं च यस्य (च) प्रथमदिनमात्रप्रदोषव्यापिदर्शविषयत्वं कार्त्तिककृष्णे तुलासंक्रमे॥ "रिक्तायुक्ते" इत्यादिवाक्यद्वयस्य च कार्त्तिकशुक्ले तुलासंक्रमे प्रथमदिन एव प्रदोषव्यापि-दर्श (याग) विषयत्वं । "दर्शश्राद्धं विना" इति "पूर्वं नीराजनं" इति च वाक्यद्वयस्य प्रदोषद्वयव्यापि-दर्शविषयत्वमुचितम् । मध्यान्हकालिक-वाक्यस्वारस्यात् ॥] तेन "सायान्हे च चतुर्दश्याम्" इत्युक्ते काले दीपदाने ऽपि न दोषसंचारः [। उल्मुकनिषेधस्य द्वितीयदिन एव प्रदोषैकदेशव्यापिप्रतिपद्वकाशलाभाच्च ॥] तेन 'रिक्तायुक्ते' इत्याद्युक्ते द्वितीयपक्षे ऽपि न दोषसंचारः [। कश्चित्तु ("प्रतिपद्यग्निकरणम्" इति) निषेधशास्त्रेण [रिक्तायुक्तेति] विधिशास्त्रसमूलतामनुमिनोति स्म । तदसाम्प्रतम् । उक्त-

१ तदादर्शे ॥] [एतच्चिन्हमध्यगतः पाठः क्वचित्पुस्तके नास्ति ॥

व्यवस्थाया बहुवादिसंमतत्वात् ॥ विहितप्रतिषिद्धत्वे विकल्पप्रसङ्गाच्च ॥ निषेधस्य विध्यनुमापनव्यग्रतया निषेध्याभावे सति वाक्यार्थभङ्गप्रसङ्गाच्च ॥ वस्तुतस्तु—पार्वणदीपदानयोः पृथक् कर्मत्वमेव साधीयः ॥ सौर्य[1] यमणप्राजापत्यादिवद्भिन्नप्रयोगविधिपरिगृहीतत्वात् । पूर्वोक्तव्यवस्थाया अङ्गाङ्गिभावमन्तरेणाऽपि शास्त्रमात्रसंगतेर्नित्यस्य नैमित्तिकाङ्गताऽनौचित्यात्कल्पनालाघवाद्बहुवादिसंमतत्वाच्चेति । श्राद्धदीपदानक्रमश्च पूर्णातिथावेव प्राप्तोऽनूद्यते इत्येव मन्तव्यमिति दिक् ॥ काश्चत्तु ॥ "नह्यत्रक्रमानुवादः ॥ तथात्वे वचनवैयर्थ्यापातात् ॥ एवं सति भिन्नप्रयोगविधिपरिगृहीतत्वेऽपि "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इत्यादिवत् श्राद्धानन्तर्यस्य दीपदानाङ्गत्वे तु न किंचिद्बाधकम् । न च कर्मकालशास्त्रं बाधकमिति वाच्यम् ॥ अमावास्याशब्दस्य सन्धिवाचित्वेन सन्धिदिने प्रदोषे दीपदानेऽपि तदविरोधात् ॥ अङ्गीकृतं च सन्धिदिनस्य पूर्णस्याप्यमावास्यात्वं नारायणवृत्तिकारैः "अमावास्यायामपराह्ले" इत्यत्र । "चन्द्रक्षयाविशेषेण साऽपि दर्शा-

1 मूर्या-

त्मिका स्मृता" । इति देवलवचनाच्च ॥ त्रियामिका-स्थले मदनरत्नादिभिः प्रतिपदि दीपदानाङ्गीकाराच्चेति दिक्" इत्याह ॥ सत्वाऽऽग्रहवाद एवेति जानीमः ॥ सर्व-निबन्धवैसंमत्यात् ॥ नारायणवृत्तिकारोक्तेः पिण्डपि-तृयज्ञविषयत्वात् ॥ "अमावस्यायामपराण्हे पिण्डपितृ-यज्ञेन चरन्ति" इति व्याख्येयवाक्ये तथा दर्शनात् । देवलस्मृतेः पक्षश्राद्धमारभ्याधीतत्वेन तद्विषयत्वात् । "अहः षोडशकं यत्तु शुक्लप्रतिपदा सह" इति तत्पूर्वार्द्धेद-र्शनाच्च॥'त्रियामिका'इतिवाक्यं तु स्वविषय एव नियामकं नान्यत्र ॥ अन्यथाऽतिप्रसङ्गापत्तेर्दुर्वारत्वादिति। किंचैव-मुल्मुकनिषेधवैयर्थ्यापत्तिः॥ तथा हि पूर्णतिथौ विषया-भावादन्यदा च श्राद्धोत्तरत्वेन तत्प्राप्तया ऽनवसरपराह-तेः । तच्छास्त्रप्रामाण्यावश्यकत्वे तु ताद (ग्) श-विषये दीपोल्मुकादिलोप एवेति । न च क्रमबोधक-वाक्यवैयर्थ्यापत्तिः ॥ " एवंप्रभातसमये " इत्यादौ यथा नित्यस्नानानुवादेनाभ्यङ्गक्रमयोर्देवपूजानुवादेनभ क्तिक्रमयो (श्चोत्सवाङ्गत्वेन) र्यथा विधानं तथा नित्य-श्राद्धमनूद्य तत्तद्द्रव्यविशिष्टसदैवत्वादेर्विधानमित्यङ्गी-कार उपपत्तेः । पूर्णतिथौ दार्शिकेनैव प्रसङ्गसिद्धेश्च ॥ न च तदकर्त्तुरनधिकारापत्तिरिति वाच्यम् ॥ तत्कर्त्तारं

प्रत्येव तादृशाधिकारसंचारात् । अन्यथा गुर्विणीपति-
जीवत्पितृकादेरप्यनधिकारापत्तेः ॥ नचेष्टापत्तिः । प्रसि-
द्धिविरोधादिति दिक् । एवं चोक्तप्रथमकल्पोक्तगौर-
वमपि निरस्तं बोध्यम् ॥ * दीपदानाङ्गभूतपार्वणश्राद्धं
दार्शिकातिरिक्तमङ्गीकार्यमिति प्रथमपक्षोक्तगौरवम् * ॥
वस्तुतस्तु क्रमानुवाद एव शास्त्रकारानुशयगोचर इति
ज्ञायते ॥ अन्यथा [हृदयस्याग्रेऽवद्यति-अथ जिव्हा-
या-अथ वक्षस इति वत्] विदध्यादेव नानुवदेदि-
त्यलं प्रसक्तानुप्रसक्त्या ॥ तथैव गोक्रीडायां * यदा-
तिथिवृद्धौ सत्यामपि सार्द्धत्रियामत्वं न भवति तदा*
तु त्रियामिका' इतिवाक्ये 'इतोन्यथा पूर्वयुते विधेये' इति
कथनात्-" गवां क्रीडादिने यत्र " इति " परविद्धासु
यः कुर्यात् " इति वाक्याभ्यां च तिथिवृद्धौ सार्द्ध-
त्रियामात्वाभावेन (चन्द्रदर्शनसंभावनया) परवे-
धानुकल्पसंभवेन च पूर्वयुता ॥ न च वृद्धौ पूर्वस्याः
सामान्यतो निषेधान्नैवमिति वाच्यम् ॥ मासातिदेशेन
तस्य त्रिस्पृक्तिथिविषयत्वावगमात् । * एकादशी-
विषयत्वाद्वा * ॥ अस्य प्रातिस्विकत्वाच्च ॥ तिथिसा-
म्य-ह्रासयोः सार्द्धत्रियामात्वेऽपि वृद्ध्यभावेन पूर्वयुता ।

पाठान्तरम् १ संचारेगुर्विणी । * * इदं क्वचिट्टिपणम् । * * अयंपाठः क्वचिन्नास्ति ।

उभयसत्वे चन्द्रदर्शनेन पूर्वयुता ॥ (वृद्धौपरानिषेध-स्य दत्तोत्तरत्वात्) + तस्य विशेषवाक्यत्वात् + ॥ परं " कार्तिके शुक्लपक्षे " इति वाक्यात्कार्तिकशुक्ले तुला संक्रमे दर्शग (त) पूर्वाह्णकालमात्रातिक्रमः कार्य-स्तस्य विशेषवाक्यत्वात् । एवं सति यावन्तः पूर्ववि-द्धाविधय उत्तरविद्धानिषेधाश्च ते सर्वे ईदृशविषय ए-वोपसंहृता बोध्याः । न च निषेधानामुपसंहारो ना-स्तीति वाच्यम्। वृन्ताकश्वेतवृन्ताकनिषेधादौ माधवादि-भिस्तस्याङ्गीकारादिति ॥ उभयसत्वे चन्द्रादर्शने तु परयुतैव प्रतिपद् ग्राह्येति निष्कर्षः ॥ अत्र बलिपूजा पूर्वभावित्वं यद्यपि गोक्रीडायाः न सिद्ध्यति ॥ तथा ऽपि कालबाधापेक्षया कदाचित् कर्मबाधापेक्षया च क्रममात्रबाध एव साधुरिति न कोऽपि दोषः ॥ उत्त-रविद्धाविधीनां पूर्वविद्धानिषेधानां अत्रोपसंहाराच्चेति । न च सार्द्धत्रियामात्वमविवक्षितमिति वाच्यम्। प्रमाणा भावात् । न च चन्द्रदर्शनपरवेधदोषदर्शकशास्त्रमेव तत्र प्रमाणमिति वाच्यम्।अप्रयोजकत्वात्' विनिगमना-विरहात्। अन्यथा वृद्धेरप्यविवक्षितत्वापातात्। न चेष्टा पत्तिः ॥ वाक्यवैयर्थ्यापातात् ॥ किन्तु पूर्वतिथेः त्रिया-

++ इयंपंक्तिः क्वचिन्नास्ति ॥

मात्वमेवाविवक्षितम् । अत एव “ वर्द्धमानतिथौ ” इति वाक्ये तस्यानुपादानं युज्यते । बलिपूजायां तु पूर्वविद्धैव । “ पूर्वविद्धैवकर्त्तव्या ” इत्यादिवाक्यात् । “ तिस्रोह्येताः पराः प्रोक्ताः ” इत्यत्र परशब्दे उत्कृष्टवाचकत्वस्य शक्यवचनत्वाच्च । दिनकरोद्द्योते वाक्यस्य कृष्णप्रतिपद्विषयत्वव्यवस्थापनाच्च ॥ नारीनीराजनमङ्गलमालिकयोस्तु बहुवादिसंमतमुचिततरम् । व्याख्यानक्लेशस्तु न प्रामाणिकजनगोचरः । ज्योतिर्विदाभरणेऽप्येवमेव सिद्ध्यति । तत्र हि “ इषान्तदर्शो रजनीमुखाधिको दीपोत्सवोऽसौ गदितो बुधैरिह । श्राद्धं विधाय द्युदलक्षणत्रये सायं सदैवोल्मुकमाहृतं ततः ॥ १ ॥ रिक्तानिशीथे किल विष्णुमायामभ्यर्च्य दीपोत्सवमप्यमायाम् ॥ कृत्वा बलेश्च प्रतिपद्युतस्य पूजा तु गोक्रीडनमृद्धये स्यात् ॥ २ ॥ अमा यदा भूतदिने ऽपराण्हे प्रदृश्यते तद्दिवसे ऽक्षयं स्यात् ॥ श्राद्धं पितॄणां तदनूल्मुकाख्यं तमीमुखे लोकनृपार्थकारि ॥ ३ ॥ प्रातश्च संगवश्चैव मध्याह्नः शारदस्तथा ॥ सायाह्नमर्द्धोदयतः पंचशो द्युमिते क्रमात् ॥ ४ ॥ पंचधा

---

१ ७ ज्योतिर्विदाभरणेऽप्येवमेव सिध्यतीति ग्रन्थमारभ्य ६८ पृष्ठस्थ—पूर्वोक्तमविरुद्धमिति दिक् ७ इत्यन्तो ग्रंथः केषु चित्पुस्तकेषु नास्ति ॥

भागकालोऽसौ त्रिधा पूर्वाह्णिकं ततः ॥ मध्यान्हमपराह्णं तु द्वेधा पूर्वापराह्णिके ॥ ५ ॥ दिनावसाने क्षणमप्यमा चेत् श्राद्धं विधायोल्मुकमत्र कुर्यात् ॥ क्षये ऽथ वृद्धौ प्रतिपद्युपेते दर्शे ततोऽग्रे बलिपूजनं स्यात् ॥ ६ ॥ श्राद्धे कृते शारदगामिदर्शे नन्दोल्मुकं दूषणकृन्न राज्ये ॥ तदा निशीथे सुरशक्तिपूजा दर्शेऽपि लोकेश्वरसौख्यदा स्यात् ॥ ७ ॥ सूर्यास्तकालोल्मुकमाङ्गि कर्म स्यादङ्गकर्माण्यपराणि चात्र ॥ दर्शोदरः पञ्चदिनात्मकोऽसौ दीपोत्सवस्तद्व्यवहारसिद्धः ॥ ८ ॥ इत्यादि श्लोकद्वयेन पूर्णतिथौ क्रमप्राप्तानि श्राद्धोल्मुकलक्ष्मीपूजनदीपोत्सवरूपाण्यमाकृत्यानि बलिब्रह्मपूजागोक्रीडनानि प्रतिपत्कृत्यान्युक्त्वा ततः "अमायदा" इति पद्येन भूतदिने ऽपराण्हमारभ्य प्रवृत्तायाममायां श्राद्धोल्मुकादि पौर्वापर्यस्वरसप्राप्तमुत्तममित्युक्त्वा "प्रातश्च" इत्यादिश्लोकद्वयेन दिवसस्य पञ्चधा त्रेधा द्वेधा विभागं प्रासङ्गिकं दिनान्तस्यापराह्णत्वाय बोधयित्वा "दिनावसाने क्षणमप्यमाचेच्छ्राद्धं विधायोल्मुकमत्र कुर्यात् क्षये" इत्यन्तेन पैतृके सूर्यास्तव्यापितिथिसाकल्यशास्त्रस्य तदनुसारिणः "आश्विनान्ते चतुर्दश्याम्" इत्यादिशास्त्रस्य चानुग्रहाच्च-

तुर्दश्यां श्राद्धं विधाय तदुत्तरमुल्मुककरणं "इतोऽन्यथा पूर्वयुले विधेय" इति शास्त्रानुसारेणोक्त्वा तत्राप्यमाया अभावे "अथ वृद्धौ प्रतिपद्युपेते दर्शे" इत्यादिना "त्रियामिका दर्शतिथिः" इतिशास्त्रानुसारेण श्राद्धोत्तरं प्रतिपद्युल्मुकं न दुष्टमिति बोधयित्वा लक्ष्मीपूजामप्यदर्शे सौख्यदामुक्त्वा "सूर्यास्तकालोल्मुकमङ्गिकर्म स्यादङ्गकर्माण्यपराणि च" इत्यनेनोल्मुकानुरोधेन श्राद्धादीनां पैतृकाणां गौणकालेऽपि करणं नानुचितमिति बोधयित्वा अत्र "दर्शोदरः पंचदिनात्मकोऽसौ दीपोत्सवस्तद्व्यवहारसिद्धः" इत्यनेन दीपोत्सवस्य व्यवहारसिद्धत्वेन दर्शोदरस्य पञ्चदिनात्मकत्वं पञ्चात्मकदर्शोदरव्यवहारसिद्धत्वं वा दीपोत्सवस्येत्युक्तम् । एवं चोभयथा पौर्वरात्रिकनीराजनस्य वा अमास्थदीपदानस्य वा दीपोत्सवत्वं सिद्ध्यति ॥ तत्र नीराजनस्य द्वादश्यादौ दैवदिनत्वान्न श्राद्धोत्तरत्वापेक्षा नापि दीपदानस्य, लक्ष्मीजागरणोत्सवरूपत्वेन तत्प्रीत्याद्यर्थत्वात् ॥ अत एवात्र सन्दर्भे श्राद्धोत्तरत्वमुल्मुकमात्रस्यैवोक्तं नेतरस्य । "दर्शश्राद्धं विना" इतिवाक्ये दीपपदं तूल्मुकसाहचर्यात्पितृदीपपरम् । "पूर्वं नीराजनं कृत्वा"

इतिवाक्यं तु दिनद्वयप्रदोषव्याप्यमायां प्रथमाया-स्त्याज्यत्वायेति पूर्वोक्तमविरुद्धमिति दिक् ॥ अथेदं विचार्यते ॥ संलग्नताशास्त्रं मलमास दीपोत्सव निवर्त्तनविषयकं दीपदान (मात्र) विषयकं वा । दीपदानशब्दोऽपि किं नीराजनपरो दीपदानपरो वा । नीराजनमपि पौर्वरात्रिकमौदयिकं वेति ॥ तत्र न तावदाद्यः ॥ " मलेऽनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं क्रियाम् " इति वाक्ये (न गत्यन्तराभाव एव नैमित्तिककरणविधाने नेह च) गत्यन्तरसत्वेन मले तत्प्राप्त्यसंभवात् । "इषासित" इति प्राथमिकवाक्ये ऊर्जादिपदसमभिव्याहारादेवाश्विनसंसर्प्प [एतस्य] निवृत्त्या संलग्नतावाक्यवैयर्थ्यापत्तेश्च । कार्तिकसंसर्प [त्वे तत्] निवारणे विश्लेषस्यैवापाताच्च । वस्तुतस्तु [सांप्रतं] कार्तिकादित्रयसंसर्पस्यैवासंभवान्न किंचिदेतत् ॥ तदंहस्पतौ च तार्त्तीयी (य) कदिनालाभेनासंभवाच्च । यदि च स्वातियोगेन दीपावलीत्वमङ्गीकृत्य तत्र संलग्नता नियम्यत इति विभाव्यते । तदाऽपि सूर्यभोग्यस्वातिग्रहणे तु मलासंभव एव । अन्यदाऽपि त्रिस्पृङ्नक्षत्रविषयत्वे [च]

पाठन्तरम् १ अंहस्पतिः क्षयमासः

प्रायिकत्वापत्त्या कादाचित्कत्वमेव स्याद्रोहिण्यष्टमीज-यन्तीवत् । प्रसिद्धिविरोधश्चान्धपरंपरा च स्यात् ॥ तस्य त्रिस्पृक्त्वाभावे तु सिद्धान्तकुक्षिगतत्वमेव । द्वितीये ऽपि नाद्यः । द्वादश्यादिपञ्चकसंलग्नतापातात् । " तत्समानत्वादितरेषु तथात्वम् " इति न्यायात् । न चेष्टापत्तिः । तथा वाक्यानभिव्यक्तेः । बहुवाद्य (द) संमतत्वाच्च । नेतरः । चतुर्दश्यां प्रातर्नीराजनप्रापकवचनाभावात् ॥ " स्वातिस्थिते रवाविन्दुर्यदि स्वातिगतो भवेत् ॥ पञ्चत्वगुदकस्नायी कृत्वा ऽभ्यङ्गविधिर्नरः ॥ नीराजितो महालक्ष्मीमर्चयन् श्रियमश्नुते " इति पुष्करपुराणोक्तकालस्य च प्रायिकत्वात्। न च तद्विषयत्वमेवास्तु। (अतएव) 'त्रियामिका' इतिवाक्ये द्वयोरेव दीपोत्सवत्वमुक्तमितीष्टापत्ते (त्ति)रिति वाच्यम्। उत्सवपदासङ्गतिप्रसङ्गात्। नह्युत्सवपदेन नीराजनमात्रमुच्यते ऽपि तूत्सवरूपाणि सर्वाण्येव कर्माणीति। किंच। 'दीपैर्नीराजनादत्र सैषा दीपावली स्मृता' इति वाक्यात् " तदा दीपावली भवेत् " इत्यत्र नीराजनपरिसंख्यानेन स्वातियोगाभावे तत्करणाभावेन पूर्वोक्तदूषणापत्तेः। नान्त्यः। प्रतिपदि तत्प्रापकवचनाभावात् ॥ " संरुध्य मेव " इति " त्रियामिका " इतिशा-

स्त्रयोस्तु संलग्नकर्त्तव्यताकत्वपूर्व (योग) परयोग-
व्यवस्थापकत्वयोरेव विषयत्वेन भानाच्च । किंच ।
यदा त्रयोदशीप्रदोषे, चतुर्दशी-तत्प्रदोषेच, दर्शः-स च
द्वितीयेऽन्हि दण्डमात्रस्तादृग्विषये व्यभिचारापत्तेश्च
" दण्डैकरजनी " इति वाक्यात् श्राद्धोत्तरत्वोक्तेश्च
परेद्युरेव तत्करणात् । दार्शिकदीपावृत्तिस्तु नोचितैव ।
प्रसिद्ध (द्धि) विरोधादुक्तहेतुभ्यां च ॥ कस्तर्हि विषय
इति चेत् । वदामः ॥ भविष्योत्तरे ॥ " पुरा वामन-
रूपेण प्रार्थयित्वा धरामिमाम् ॥ ददावतिथिरिन्द्राय
बलिं पातालवासिनम् ॥ कृत्वा दैत्यपतेर्दत्वा अहोरात्र
त्रयं बुधः " ॥ इति वाक्यदर्शनात्तदेकमूलकल्पनया त-
त्तिथित्रयं प्रक्रम्य पठितानि उत्सवपदोक्तेरुत्सवरूपाणि
कर्माणि विषय इति । उचितमप्येतत । परस्परविरु
द्धानामेकत्र विधानदर्शनाद्विरुद्धयोर्देवासुरयोरैक्यश्र
वणादुत्साहाच्चोत्सवरूपत्वस्य स्फुटत्वात् । विवरवा
सिनः पुना राज्यप्राप्तेरपि । अत एव " अद्य राज्य
बलेर्लोको यथेष्टं चेष्टतां " इत्यादिवाक्योक्तराजप्रयुक्त
बलिराज्यघोषलोककर्तृकयथेष्टचेष्टादेरपि संगच्छते ।
अत्रेदंबोध्यम् ॥ " सैषा दीपावली स्मृता " इतिब्राह्मे
एकवचनात्प्रसिद्धश्चामाया एव दीपोत्सवत्वात् " दी

पोत्सवदिनत्रयम् " इत्यत्र दिनशब्देन तत्पौरस्त्यपाश्चात्ययोस्तस्य च कृत्यं लक्ष्यत इति मन्तव्यम् । तिथ्यहोरात्रोक्तौ तु तयोरनुक्तसिद्धत्वाद्वचनवैयर्थ्यापत्तिर्दुर्वारैव स्यात् । एतेन " दीपोत्सवे ते मुनिभिः प्रदिष्टे " इत्यत्रापि दीपोत्सवशब्दः सप्तम्यन्तो बोध्यः । तथा च दीपोत्सवे विवृद्धौ सत्यां ते त्रियामासार्द्धत्रियामे ऽमाप्रतिपत्तिथी प्रदिष्टे कर्मनिमित्तकालतया ग्राह्यत्वेनोक्ते इतो ऽन्यथा तिथिवृद्धावपि त्रियामत्वसार्द्धत्रियामत्वयोरभावे तिथिसाम्यन्ह्रासयोश्च त्रियामत्वसार्द्धत्रियामात्वे सति पूर्वयुते भूतयुता ऽमा ऽमायुता प्रतिपत् इत्येवं विधेये कर्मकालत्वेन ग्राह्ये इत्यर्थो निष्प्रत्यूहः स्फुटति । एवं सत्यत्रेय व्यवस्था । यदा तिथिवृद्धौ सार्द्धत्रियामत्वाभावे पूर्वयुता प्रतिपत् तदा गोपूजाक्रीडयोर्दर्शस्य प्रशस्तत्वाद्धौतिकदार्शिकदीपदानयोर्बलिपूजायास्तदङ्गानां च स्वस्वकाल एव यथाक्रममनुष्ठानम् । अभ्यङ्गे तिथेस्तात्कालिकत्वस्य विशेषवाक्यगोचरत्वेन व्युत्क्रमो दिनत्रयबहिर्भावश्च न दुष्टः । नारीनीराजनादिवत् । परं दार्शिकश्राद्धं कदाचित् द्वितीयेऽन्हि । दिनद्वये वा (दर्श) श्राद्धं तदुपपादितं पूर्वम् । वृद्धौ पूर्वानिषेधस्तु दत्तोत्तरो विशेष-

वाक्यबाध्यश्च । परं तु कार्तिकशुक्लपक्षे तुलासंक्रमे गोक्रीडायाः कालो दर्शपूर्वाह्णो बोध्यः । गवां कर्णजागरणं च न कार्यम् । गोपूजनं तु न निषिद्धमिति भवत्येव । तथैव गोवर्द्धनपूजान्नकूटादिकमपि । * दर्शस्य तत्कालत्वेन वक्ष्यमाणत्वात् । प्रतिपदि गोवर्द्धनपूजावाक्यस्य केवलपूजापरत्वात् । अन्नकूटस्याद्रिगोद्विजमखत्वेन त्र्युद्देश्यकतया गोपूजासाहचर्यलाभाच्च ॥ पूर्णातिथौ प्रतिपदादरस्तु " कृत्वैतत्सर्वमेवाहन् " इति वाक्यान्तरे बलिपूजापूर्वभावानुरोधात् । दीपोत्सवोत्तरमेव शिष्टाचाराच्चेति दिक् * ॥ यदा च तिथिसाम्ये सार्द्धत्रियामत्वे पूर्वयुता । तदापि सर्वं पूर्ववदेव । यदा च तिथिह्रासे सार्द्धत्रियामत्वे पूर्वयुता । तदाऽपि भूतदर्शयोः प्रदोषद्वयाव्यापित्वं चेद्गौणकालव्याप्तिमादाय कर्म विधेयमिति सर्वं पूर्ववदेव । यदा तु भूतस्य प्रदोषद्वयव्यापित्वोत्तरं दर्शह्रासस्तदापि दर्शस्य गौणप्रदोषे सत्त्वात्पूर्ववदेव कामरात्रौ भूतदीपदानं भूते प्रातरभ्यङ्गो रात्रौ च दार्शिकम् दीपदानम् । दर्शदिने अन्नकूटादि रात्रौबलिपूजादि । यदा च दर्शस्य प्रदोषद्वयव्यापित्वोत्तरं प्रतिपदो(त्तरं)

---

* * एतत्चिन्हमध्यस्थः पाठः केषु चित्पुस्तकेषु नास्ति ॥

न्हासस्तदापि द्वितीयदिने दर्शस्य दण्डमात्रत्वाऽभावे पूर्वघदेव । द्वितीयदिने दण्डमात्रत्वे तु " दण्डैकरजनीयोगे दर्शः स्यात्तु परेऽहनि । तदा विहाय पूर्वेद्युः परेऽन्हि सुखरात्रिका " इति तिथितत्त्वे ज्योतिर्वचनात्परयुता कार्या। अन्यथैतद्बाधापत्तेः ॥ "इतोऽन्यथा " इत्यस्य पूर्वोक्तविषयेषु सावकाशत्वाच्च । न च बलिपूजायां दोषसंचारः । " नन्दा किंचिद्युता यत्र दृश्यते च द्वितीयया ॥ बलेर्दिनं न कर्त्तव्यं चन्द्रदर्शनसंभवात् " इति वाक्ये चन्द्रदर्शनस्यैव दोषप्रयोजकत्वोक्तेः । एवं सति मध्यान्हकालिकशास्त्रमादाय भूतदीपदानं भूतप्रदोषे ऽमायां भवतीति विशेषः । शेषं यथास्थानमिति ज्ञेयम् ॥ यदा चैतादृशे विषये चन्द्रदर्शनसंभावना कार्त्तिककृष्णे तुलाभानुर्वा तदा तु पूर्वेद्युरेव सुखरात्रौ बलिपूजाऽपि गोक्रीडाऽपि रात्रौ प्रतिपदि । तथाच गवां कर्णजागरणमात्रं कार्यं नान्यदिति फलति । अन्नकूटगोपूजागोवर्द्धनपूजादिकं तु द्वितीय एव दिने प्रतिपत्पूर्वाग्हे । श्रीमद्भागवते " वयं गोवृत्तयोऽनिशम् ' 'तस्मात्सं पूजयेत्कर्म' 'तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः। अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः " इत्यादि भगवद्वाक्येषु गवादी-

नां प्राधान्यप्रतीतेर्बलिपूजाङ्गत्वभ्रमभङ्गात् । यदा च "वर्द्धमानातिथौ" इति वाक्योक्तो यथाश्रुतः कालस्तदाप्यनुपदोक्त एव प्रकार इति सर्वमनवद्यम् ॥ नन्वन्नकूटोत्सवः कुत्रोक्त इति चेत् । पाद्मोत्तरखण्डे इति जानीहि ॥ तथाहि ॥ "ततो बलिगृहद्वारि स्थाप्यो गोमयमूर्तिमान् । पुनः श्रीबालगोपालस्तथा गोवर्द्धनोमहान् । बलिराजद्वारपालो भवानद्य भवप्रभो । निजवाक्पालनार्थं त्वं सगोवर्द्धनगोपते । इति संस्थाप्य गोपालं गोवर्द्धनसमन्वितम् । प्रतिष्ठापूर्वकं धीमान् भक्त्या संपूजयेन्मुने । गोपालमूर्त्ते विश्वेश शक्रोत्सवविभेदक । गोवर्द्धनकृतच्छत्र पूजां मे गृण्ह गोपते । गोवर्द्धनधराधार गोकुलत्राणकारक । विष्णुबाहुकृतच्छाय गवां कोटिप्रदो भव । इति संपूज्य विधिना भक्ष्यभोज्यैः शुभावहैः । ज्ञातीन्बन्धून् जनान्सर्वान् क्रमशो भोजयेत्ततः । भक्ष्यं चात्महितं भोज्यं तथान्तःपुरचारिभिः । वस्त्रैस्तांबूलदानैश्च पुष्पचन्दनकुंकुमैः । एलालवङ्गकर्पूरकस्तूरीभिश्च तान् यजेत् । कृत्वैतत्सर्वमेवं हि पुनः कुर्यान्महोत्सवम् । अन्नकूटमिति ख्यातं विष्णोर्भक्त्या सुशोभनम् " इति वाराहपुराणे मथुरामाहात्म्ये चान्नकूटो निरुक्तः । " अन्नकूटस्य सांनिध्ये

तीर्थं कृष्णविनिर्मितम् । तत्र कृष्णेन पूजार्थमिन्द्रस्य विहतो मखः । महानिन्द्रस्य चोत्थानं भक्ष्यभोज्यसमन्वितम् । कृत्वा तुष्टिकरं साक्षादिन्द्रेण सह संकथाः । इन्द्रस्य वर्षतोऽत्यन्तं गवां पीडाकरं जलम् । तासां रक्षार्थं संस्तभ्य धृतो गिरिवरस्तदा । सोऽन्नकूट इति ख्यातः सर्वतः शक्रपूजितः" इति । अत्रान्नकूटोत्सवाङ्गत्वेन क्रियमाणोऽपि गोवर्द्धनोत्सवो व्रतदिनकरे बलीवर्दकथायाम् (कालान्तरे [मासान्तरे] ऽप्युक्तः) "गोवर्द्धने च नन्देन कृतोऽयं सुमहोत्सवः । दर्शे च श्रावणे मासि गोपैः सुबहुलीकृतः ॥ इत्युक्त्वा "इन्द्रो महेन्द्रो विमृधो दर्शेष्टौ श्रुतिचोदितः । कथं शक्रो वेदितव्यः श्रुतौ गुणविभागतः ॥ तस्मादत्र विधातव्यो गोवर्द्धनमहोत्सवः" इति श्रीनन्दं प्रति भगवद्वाक्यात्सोपि दर्शेष्टिकाल एव कार्य इति ज्ञायते । तत्रापि श्रीभागवते "अपर्त्तावुल्बणं वर्षम् ।" इति कथनाच्छरद्गम्यते ॥ हरिवंशे शरदः कण्ठत उक्तेश्च ॥ शिष्टाचाराच्चेदानीं शरदेव मुख्येति गम्यते । तत्र च

१ अत्र "भगवदीयैर्भगवदुक्तत्वेनैव क्रियते न तु बलिपूजाङ्गत्वेनेति तां विनाऽपि तत्करण मुचिततरम् किंच" इति एतावान् ७६ पृष्ठे वक्ष्यमाणो ग्रंथःक्वचित्पुस्तकेषु अत्रैव लिखितो दृश्यते ॥ २ अत्र "इत्यादिना (पृथगप्युक्तः ।) तेन कालान्तरेऽपि गोवर्द्धनपूजनम् सांप्रदायिकानां युक्तमिति सर्वमनवद्यमिति दिक्" एतावानेव ग्रंथोऽस्ति ॥

भगवदर्थैर्भगवदुक्तत्वेनैव क्रियते । न तु बलिपूजाङ्गत्वेनेति तां विना ऽपि तत् करणमुचिततरम् । किंच दर्शादिने असौकर्ये द्वादश्यन्तमपि करणं शिष्टानामुचितमेव । इन्द्रयागसंभारोपयोगायैव दर्शग्रहणात् । अन्यदा तेषां वैरस्यसंभवात् ॥ अत एव तिथौ आग्रहाभावात्प्रतिपदप्युक्ता ॥ तस्मात्सर्वमनवद्यामिति दिक् ॥ इति श्रीमद्वल्लभनन्दनचरणरजोनुरागपूरितहृदय-पुरुषोत्तमकृतो दीपोत्सवनिर्णयः संपूर्णः ॥ ॥ ७ ॥

अथ कार्तिकशुद्धद्वितीया भ्रातृद्वितीया ॥ सा चोत्सवे भोजनकालव्यापिनी ग्राह्या ॥ यद्यपि भोजनस्य यमप्रीत्यर्थत्वाद्यमस्य च पितृत्वेनापराह्ने एव पूज्यत्वात्तद्व्यापिनी तिथिर्ग्रहीतुमुचिता ॥ सर्ववादिसंमता च ॥ तथापि " देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता " इति वाक्येन देवत्वस्यापि सत्त्वेन केवलपितृत्वाभावात् । " आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः " इति द्वेधाविभक्तापराण्हस्य भोजनकाले ऽपि संभवात्तमादायैव ग्राह्या ॥ यमपूजाया अकरणाद्वा तथा ऽस्तु ॥ इति यमद्वितीया निर्णयः ॥ ॥ ॥

अथ कार्तिकशुक्लाष्टमी गोपाष्टमी ॥ तथोक्तं व्रतदिनकरे पाद्मे ॥ "शुक्लाष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः ॥ तद्दिने वासुदेवोऽभूद्गोपः पूर्वं तु वत्सपः । तत्र पूजां गवां कुर्याद्गोग्रासं गोप्रदक्षिणाम् ॥ गवानुगमनं कार्यं सर्वकामार्थसिद्धये " इति ॥ अत्रो दयव्याप्त्या निर्णयः । विद्धाक्षये त्वगत्या विद्धैव कार्येति ॥ इति गोपाष्टमीनिर्णयः ॥

अथ कार्तिकशुक्लैकादशी प्रबोधोत्सवः ॥ तदुक्तं हेमाद्रौ ब्राह्मे ॥ " एकादश्यां तु शुक्लायां कार्तिके मासि केशवम् । प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥ नृत्यैर्गीतैस्तथा वाद्यैर्ऋग्यजुः साममङ्गलैः । वीणापटहशब्दैश्च पुराणपठनेनच " इत्यादिना ॥ तत्रैव भविष्योत्तरे ऽपि ॥ " कार्तिके शुक्लपक्षे तु एकादश्यां पृथासुत । मंत्रेणानेन राजेन्द्र देवमुत्थापयेत् द्विजः ॥ ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वन्दितवन्दनीय ॥ बुध्यस्व देवेश जगन्निवास मंत्रप्रभावेण सुखेन देव ॥ इयं च द्वादशी देव प्रबोधार्थं विनिर्मिता ॥ त्वयैव सर्वलोकानां हितार्थं शेषशायिना ॥ त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम् । उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ

माधव" इत्यादिना च ॥ अन्यच्च तत्र भविष्योत्तरे ॥ " आभाकासितपक्षेषु मैत्रश्रवणरेवती ॥ आदिमध्याव-सानेषु प्रस्वापावर्त्तनोत्सवाः ॥ निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ॥ अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत्" इत्यादि । + स्कान्दे चातुर्मास्य-व्रतकल्पे तु विशेष उक्तः ॥ जागरं च प्रबोधिन्यां कुर्याद्वै नियतेन्द्रियः ॥ गुरोर्गोमिथुनं दत्वा द्वादश्यां भोजयेत् द्विजान् ॥ आसायाह्नं पुराणाद्यैरहः संक्षपयेद्-बुधः ॥ अस्तङ्गते दिनकरे पुनः स्नायाद्यथाविधि ॥ वृन्दावने ततः कुर्यात् मण्डपं चतुरस्रकम् ॥ पुष्पमाल्यैः फलैर्दिव्यैर्नालिकेलादिभिः शुभैः ॥ पूगीफलैरिक्षु-दण्डैरम्भास्तम्भैश्च शोभितम् ॥ तत्र देवं प्रतिष्ठाप्य सुघो-षैर्मंत्रपूर्वकम् । " इदं विष्णुः" इति मंत्रेण वाराहो-क्तमंत्रैश्चोत्थापयेदिति शेषः । स्कान्दे पुरुषोत्तममाहा-त्म्ये तु पञ्चामृतस्नापनमुत्थापनोत्तरमुक्तम् । "सुग-न्धतैलेनाभ्यज्य स्नापयेत्पुरुषोत्तमम् । पञ्चामृतैर्नारिके-लरसैः फलरसैस्तथा" इति + ॥ एवं चात्र द्विविधै-र्वाक्यैस्तिथिद्वयं रात्रिर्दिनं (सन्ध्या) च यथायथं कालः इति बहूनां मतम् ॥ मम तु द्वादशीशब्द एका-

+ + एतच्चिन्हमध्यगतः पाठः केषुचित्पुस्तकेषु नास्ति ।

दशीपर इत्येवप्रतिभाति ॥ भविष्योत्तरे " एकादश्यां मंत्रेणानेन ' इत्युपक्रम्य 'इयं च द्वादशीदेव प्रबोधार्थं विनिर्मिता" इतिमंत्रोक्तेः ॥ द्वादशीपदस्यैकादशीवाचकत्वं पवित्रोत्सवनिरूपणे स्फुटीकार्यम् ॥ मंत्राणां वाराहीयत्वे द्वादशीमुपक्रम्य पाठे तु तिथिद्वयमपि प्रबोधकालोऽस्तु न कापि क्षतिः ॥ एवंचोत्थापनस्य दिवा रात्रौ च विधानादुभयमपि प्रबोधकालः ॥ तेनायं विशेषः ॥ एकादश्यामुत्थापने विद्धा त्याज्यैव ॥ आसुरीत्वात् । युग्मवाक्यानुरोधाच्च । भद्रापि त्याज्यैव । कालान्तरस्यापि लाभात् । द्वादश्यामुत्थापने च ऋक्षपादयोगौ नात्यन्तावश्यकौ । " द्वादश्यां संधिसमये नक्षत्राणामसंभवे ॥ आभाकासितपक्षेषु शयनावर्त्तनादिकम् " इति वाराहात् ॥ अथात्र प्रसङ्गाद्वेधो विचार्यते ॥ स च (हरिवल्लभसुधोदयादौ) स्थूलतया चतुर्विधो विष्णुधर्मोत्तरे निरूपितः ॥ " पञ्चचत्वारिंशता स्पर्शः सङ्गः पञ्चाशता मतः । पञ्चपञ्चाशकः शल्यो वेधः षट्पञ्चाशकः स्मृतः ॥ स्पर्शे तु घटिकाः पञ्च पञ्च सङ्गे तथैव च । शल्ये पञ्च तथा वेधे पूर्णवेधश्चतुर्विधः ॥ स्पर्शादिचतुरो वेधान्वर्जयेद्वैष्णवो नरः " इति ॥

व्यवस्थापितश्च तत्रैव ॥ "स्पर्शादिश्चतुरो वेधाः सुप्रसिद्धाः कृते युगे। सङ्गादयस्तु त्रेतायां शल्याद्यौ द्वापरे कलौ" इति। * अस्मिन्वाक्ये "शल्याद्यौ" इत्यत्र वेधस्याद्यत्वाभावाद् द्वंद्वेनार्थासिद्धेर्द्विवचनेन तद्गुणसंविज्ञानबहुव्रीह्यवगमादुभयोर्युगद्वये प्राप्तेः सांप्रदायिकैः सशल्यैकादशी त्यज्यते ॥ अतद्गुणसंविज्ञानपक्षेतु * (तेन) इदानीं वेध एव वैष्णवैस्त्याज्यः। तत्प्रकारश्च श्रीमदाचार्यचरणैर्निबन्धे निरूपितः ॥ "एकादशीव्रतं च षट्पञ्चाशद्वेधरहितं कर्त्तव्यम् ॥ पूर्वमन्यथा करणेऽपि भगवन्मार्गप्रवेशानन्तरं पञ्चपञ्चाशद्घटिका दशमी चेत्तदैकादशी त्याज्या" इति ॥ अत्रेदं हृदयम् ॥ "नाडिकाः षट् च पञ्चाशत्प्रातस्त्वेकोऽधिकोऽरुणः। उषः कालोऽष्टपञ्चाशत् शेषः सूर्योदयः स्मृतः" इति वाक्ये एकोनषष्टिघटिकोत्तरमपि पारिभाषिकः सूर्योदयो भवतीति तमादाय "उदयात् प्राक् चतस्रस्तु नाडिका अरुणोदयः" इत्युक्ते पारिभाषिकेऽरुणोदये गृहीते पञ्चपञ्चाशद्घटिकाऽपि दशमी (पाक्षिकं) अरुणोदयवेधं विधत्ते इति

---

* * एतच्चिन्हमध्यगतः पाठः केषुचित्पुस्तकेषु नास्ति ॥

सोऽपि दोषः परिहरणीयः" इति ॥ +यत्तु "उषः कालो ऽष्टपञ्चाशत्" इत्यष्टपञ्चाशत्तमायाः घटिकायाः उषः कालत्वविधानात्तच्छेषद्विघटिकस्य सूर्योदयत्वं शङ्कितम्। तदबोधात् ॥ "अष्टपंचाशत्" इत्यत्र पूरणप्रत्ययाभावेन तस्यार्थस्यानुपस्थितेः। अतः षट्पञ्चाशच्च नाडिका यदा व्यतियन्ति ततः प्रातरित्येवार्थः साधीयान् ॥ एवमग्रेऽपि ॥ उचितं चैतत् । षट्पञ्चाशदुत्तरं शिष्टनाडीनां चतुःसङ्ख्याकत्वात्प्रातरादिनाम्नां तथात्वाच्च +॥ नचेदमप्रयोजकम् । प्रत्यक्षारुणोदयस्य सार्द्धद्विघटिकावशेषे त्रिघटिकावशेषे वोपलंभाच्चतुरवशेषे यो ऽरुणोदयः स पारिभाषिक एवेति तत्र तादृशस्यैवौचित्यात् ॥ मुख्येनैव सर्वत्र निर्वाहे परिभाषावैयर्थ्यापत्तेरिति । * यत्तु यामयामार्द्धादिगणानायाः सर्वत्र प्रत्यक्षसूर्योदयमारभ्यैव दृष्टत्वात् "निशि प्रान्ते तु यामार्द्धे देववादित्रवादने । सारस्वतानध्ययने अरुणोदय उच्यते" इति हेमाद्रिधृतस्मृतौ पारिभाषिकसूर्योदयावधिकयामार्धप्रतीत्यभावाच्च पारिभाषिकसूर्योदयावधिकारुणोदयग्रहणमयुक्तम् इत्यु-

पाठान्तम्　　+ + एतच्चिन्हमध्यगतः पाठः केषु चित्पुस्तकेषु नास्ति ॥

* ८ यच्चिन्हस्यारभ्य ८५ पृष्ठस्थ इतिनिश्चयः *, इत्यन्तोग्रन्थः केषुचित्पुस्तकेषु नास्ति।

त्तम् । तन्न । नियमाभावात् । "सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम्" इत्यादौ व्यभिचारात् । अतो यत्किंचिदवध्यपेक्षत्वेनोक्तस्मृतावपितत्प्रतीतेरनिवार्यत्वान्न दोषः । न च 'चतस्रो घटिकाः प्रातररुणोदयनिश्चयः' । इति ब्रह्मवैवर्तीये "नाडिकाः षट् च पञ्चाशत्प्रातः" इति वाक्ययोक्तप्रातरात्मकघटिकाचतुष्टयस्यारुणोदयत्वकथनात्पारिभाषिकसूर्योदयावधिकारुणोदयग्रहणे मूलद्वयकल्पनागौरवापत्तिः । सा च संभवत्येकमूलत्वे अन्याय्या ॥ अत एव चतुर्दण्डमुहूर्त्तद्वयादिवाक्येषु यामार्द्धोपलक्षकत्वमेव तद्धिया निबन्धकृद्भिरङ्गीकृतमिति न पूर्वोक्तं साधीयइति वाच्यम् । "नाडिकाः षट् च" इतिवाक्य एव 'एकोऽधिकोऽरुण' इत्यग्रे दर्शनात्रिघटिकाविशेषेऽप्यरुणोदयप्राप्तेरेकमूलत्वस्य कथमप्यसंभवात् ॥ सिद्धे चतुर्दण्डादिपदानामुपलक्षकत्वे यामार्द्धपदस्य विवक्षितार्थत्वसिद्धिस्तत्सिद्धौ च तदेकमूलकल्पनया चतुर्दण्डादिवाक्यानां तात्पर्यानुपपत्तौ चतुर्दण्डादिपदानामुपलक्षकत्वसिद्धिरिति चक्रकापत्तेश्च । अतः प्रामाणिकत्वेन मूलद्वयकल्पनागौरवस्यादुष्टत्वात् "स्पर्शे तु घटिकाः पञ्च" इत्यादीनामरुणोदयवेधनिन्दामात्रप्रतिपादनपरत्वकथनमप्यनालंबनमेव । यत्तु माध-

वाचार्यैः " अर्द्धरात्रेऽपि केषांचिद्दशम्या वेध इष्यते । अरुणोदयवेलायां नावकाशो विचारणे । कपालवेध इत्याहुराचार्या ये हारिप्रियाः । न तन्मम मतं यस्मात्त्रियामा रात्रिरिष्यते " इत्यादेः कैमुतिकन्यायेनारुणोदयवेध निन्दार्थत्वमुक्तम् । तद्रीत्यापि विचारे ऽरुणोदयवेधस्य सर्वथा त्याज्यत्वमेवायातीति तद्वेलानिर्णयस्यावश्यकत्वात्सूक्ष्मेक्षकाणामस्मदुपदर्शितसरणिरादरणीयैव । उक्तशौनकवाक्ये रात्रेस्त्रियामात्वस्य हेतूकरणेन तस्य च रात्रिपूर्वोत्तरार्द्धयामयोः संध्यायां निवेशेन सिद्ध्या सूक्ष्मेक्षिकावश्यकत्वस्य सूचितत्वात् । न चानेन वाक्येन हारिप्रियाचार्याणां स्थूलदर्शित्वं शङ्क्यम् । उत्तरायणस्य देवार्द्धरात्रत्वेन तत्र सूर्यसंक्रमे दैवादिशुभकार्यस्य दर्शनात्सूर्यस्योदयकरकपाले प्रातावुदयोद्योगात्तस्य विद्धत्वे दैत्यबलसंभवेन सूक्ष्मेक्षिकया तैस्तत्त्यागस्यादरणात् । सांप्रतं तु युगस्यासुरत्वेन विष्णुधर्मोत्तरे कलौ वेधस्यैव त्याज्यत्वबोधनाच्छौनकेनापीदानीं तमेवादाय तथा बोधनादुभयत्राप्यदोषात् ॥ यत्तु । " अर्द्धरात्रे तु " इति वाक्यस्य " दशम्याः सङ्गदोषेण अर्द्धरात्रात्परेण तु ॥ वर्जयेच्चतुरो यामान् संकल्पार्चनयोस्तदा ॥ विद्धोपवासे

ऽनश्नंस्तु दिनं त्यक्त्वा समाहितः ॥ रात्रौ संपूजये-
द्विष्णुं संकल्पं च तदाऽऽचरेत्" इति नारदीयवाक्या-
त्पूर्वचतुर्यामे व्रतसंकल्पपूजावर्जनार्थत्वमुक्तम् ॥ त-
दपि न रोचिष्णु । उक्तवाक्ये सङ्गदोषपदात् संङ्गदो-
षस्य च पञ्चाशता भवनादर्द्धरात्रात्परेणेत्यनेन तस्या-
त्र विवरणाच्च । "प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः"
इति वाक्यदर्शनात्संकल्पाकरणे तदानीं व्रतानारंभाद्य-
थेष्टचेष्टाप्रसक्तेश्चेति । यत्तु पारिभाषिकसूर्योदयग्रहणे
निशाप्रान्तयामार्द्धस्य तदानीं समाप्तौ तस्य कालस्य
कुत्राप्यनिवेश इत्युक्तम् । तदपि न । प्रदोषस्य रज-
नीमुखत्ववत्प्रत्यूषस्याहर्मुखत्वेन तत्र सुखेनान्तर्भावात् ।
त्रियामारात्रिरिति पक्षे प्रान्तार्द्धयामस्यैवास्यापि प्रत्य-
क्षरात्रावपि निवेशस्य शक्यवचनत्वाच्च । किंच प्रत्य-
क्षसूर्योदयग्रहणे ऽपि मदनरत्ने "आदित्योदयवेलायाः
प्राङ् मुहूर्त्तद्वयान्विता ॥ एकादशी तु संपूर्णा विद्धा-
ऽन्या परिकीर्तिता" इति मुहूर्त्तद्वयस्यारुणोदयत्वसू-
चनात् । "लघूनि वै समाम्नाता दश पञ्च च नाडि-
काः । ते द्वे मुहूर्त्तः" इति तृतीयस्कन्धे नाडिकाद्व-
यस्य मुहूर्त्तत्वकथनाच्चतुर्दण्डात्मक एवारुणोदयो युक्तो
न तु यामार्द्धरूपः । तस्यानियतत्वेन सर्वदा मुहूर्त्तद्व-

यवाक्यविरुद्धत्वात् । यामार्द्धवाक्यस्य तदुक्तकर्माङ्ग-भूतारुणोदयमात्रप्रतिपादनेनापि सावकाशत्वाच्चतुर्द-ण्डादिवाक्यस्यैकादशीप्रकरणस्थत्वाच्च तदादरस्यैवौ-चित्यात् ॥ पञ्चदशैव दिनादिमुहूर्ताः इति पक्षेऽप्य-रुणोदयावधावेव विवादो न तु माने । अवधिस्तु वा-क्यप्राप्तत्वान्न प्रतिक्षेपार्ह इत्यतोऽपि न दोषः । किञ्च "अरुणोदयवेलायां दशागन्धो भवेद्यदि" इत्यादौ वेलापदाद्वेलायाश्च ततः पूर्वकाल एव व्यवहारदर्शना-द्गन्धस्य च सन्निधौ व्यवहारदर्शनात्प्रत्यक्षसूर्योदय-मादायापि चतुर्दण्डाद्यन्यतमारुणोदयग्रहणे अरुणो-दयवेलादशमीगन्धसंबन्धेनापि घटिकामात्रं त्याज्यमेवे-त्यपि ज्ञेयम् । तस्मादस्मदुक्त एव पक्षो नान्य इति निश्च-यः * । एवं च विष्णुधर्मोत्तरीयवाक्यमपि 'शल्ये पञ्च त-था वेधे' इति वेधेऽपि पञ्चघटिका अतिदिशत् "षट्पञ्चा-शता वेधः" इति च वदत् वेधस्य द्वैविध्यं व्यनक्तीति बोध्यम् । तेन यथाधिकारं यथाशिष्टाचारं च व्यवस्थिति-र्भवति । किञ्च । 'कामविध्वंसिनी शल्या विद्धा मोक्षविघा-तिनी' । इति विष्णुधर्मवाक्यादपि पाक्षिकविद्धात्याग उचित एवेति निगूढाशयः । किंचैवं "विष्णुधर्मेषु

* ८१ पृष्ठस्थ ६ यत्त्वित्यारभ्य ९ 'इति निश्चयः' इत्यन्तोऽयंग्रन्थः केषुचित्पुस्तकेषु नास्ति

सर्वेषु ग्राह्या आर्यैर्द्भवातिथिः" इत्यपि संगृहीतं भवति । "विवादेषु च सर्वेषु द्वादश्यां समुपोषणम्" इत्यादीनामपि संग्रहो भवतीति ज्ञेयम् । विंशतिदोष-शोधनमपि युगान्तरीयत्वेनैव फलतीति नात्र विशेषतो निरूप्यते । कदाचित्तु वेधाभावेऽप्येकादशीत्यागस्तथा-सति यदोपवासस्तदैवोत्थापनं कार्यम् । द्वादश्यामपि विधानात् । त्यागनिमित्तानि तु प्रोक्तानि । तथा हि । तत्रैकादश्याधिक्ये नारदः । "संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी । द्वादश्यां लङ्घनं कार्यं त्रयो-दश्यां तु पारणम्" इति । मार्कण्डेयोऽपि "संपूर्णै-कादशी यत्र प्रभाते पुनरेव सा । पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां वसेत्" इति । द्वादश्याधिक्ये तु गारुडे । "पूर्णा भवेद्यदा नन्दा भद्रा चैव विवर्द्धते । तदोपोष्या तु भद्रा स्यात्तिथिवृद्धिः प्रशस्यते" इति । स्कान्देपि । "एकादशी भवेत्पूर्णा परतो द्वादशी यदा । तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्" इति । उभयाधिक्ये तु भृगुराह । "संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या द्वितीया तु परतो द्वादशी यदि" इति । * किंचैता एवोन्मीलिनीत्यादि-

* किंचैता एवेत्यादिग्रंथमारभ्य ९७ पृष्ठस्थ 'अथ प्रकृतमेवानुसरामः' इत्यन्त उन्मी-लिन्यादि विचारग्रन्थः केषुचित्पुस्तकेषु नास्ति ॥

संज्ञाः प्राप्नुवन्तीति प्रसङ्गात्ता अपि विचार्यन्ते। यतः पतिव्रतानां विष्णुपञ्चकव्रतमावश्यकम्। तदुक्तं पाद्मोत्तरखण्डे द्वारकामाहात्म्यसमाप्तौ ॥ "गोविंदं परमानंदं माधवं मधुसूदनम्॥ त्यक्त्वा नैव विजानाति पातिव्रत्यव्रतः स च ॥ कृष्णजन्माष्टमी रामनवम्येकादशी व्रतम् ॥ वामनद्वादशी तद्वन्नृहरेस्तु चतुर्दशी ॥ विष्णुपञ्चकमित्येवं व्रतं सर्वाघनाशनम्॥ नित्यं नैमित्तिकं काम्यं विष्णुपञ्चकमेत्र हि ॥ न त्याज्यं सर्वथा प्राज्ञैरनित्यं सर्वथा वपुः" इति पातिव्रत्यव्रतमुपक्रम्य सावधारणतदत्यागकथनात्। यद्यप्यत्र 'नित्यं नैमित्तिकं काम्यम्' इति विष्णुपञ्चकविशेषणत्वेन प्रतीयते तथापि त्रिविधैकादशीव्रतकथासमाप्तौ "नित्यं नैमित्तिकं काम्यं त्रिविधैकादशीव्रतम् ॥ नित्यं प्रावाहिकं पुण्यं नैमित्यमभयाव्रतम् ॥ काम्यमष्टदिनं प्रोक्तं जयादि कथितं हि मे" इत्युपसंहारवाक्यादेकादशीविशेषणमेव ज्ञेयम् ॥ तत्रारुणोदये दशमीवेधरहितं प्रावाहिकपदेनोच्यते इति पूर्वग्रन्थादवगम्यते। तत्रैकादशीव्रते ऽरुणोदयवेधं दुष्टत्वेनोक्त्वा "शुक्रेण मोहिताः सर्वे दैत्यानां विजयाय च। अतो विद्धं प्रकुर्वन्ति वासरं विष्णुदैवतम् ॥ यमविद्धं व्रतं त्याज्यं सर्वथा

मोक्षकाङ्क्षिभिः" इति कथनात्। तच्चोपवासव्रतमेक-
दिनसाध्यमेव। अभयैकाशीव्रतं तु दिनत्रयसाध्यम्॥
क्वचित्तु 'उभयोः' इति पाठः। तच्च पूजाप्रधानकं
दशम्यादिदिनत्रयनियमानुक्त्वा मार्गशीर्षशुक्लैकादशी-
मारभ्य यावद्वर्षं तत्पूजाविधानं चोक्त्वा "एवमेकाद-
शीपूजाव्रतं कुर्वन्ति ये नराः॥ चतुर्वर्गफलं तेषां
प्रददाति हरिः स्वयम्" इत्युपसंहारात्। उपवा-
सस्तु नित्योऽनुक्तसिद्धोऽप्येतदङ्गत्वेनानुक्तत्वादङ्गतां
न तेन रूपेण प्राप्नोति। अष्टवासरव्रतं तूपवा-
सपूजाप्रधानकम्। उभयोस्तत्र विधानदर्शनात्।
तत्स्वरूपं तु तत्रैवोक्तम्॥ "अथाष्टवासरं वक्ष्ये व्रतं
पापप्रणाशनम्॥ जया च विजया चैव जयन्ती पाप-
नाशिनी॥ उन्मीलिनी व्यञ्जुलिनी त्रिस्पृशा पक्षव-
र्द्धिनी॥ पुनर्वसौ जया नाम श्रवणे विजया मता।
जयन्ती रोहिणी युक्ता पुष्ये पापप्रणाशिनी॥ सम्पू-
र्णैकादशी भूत्वा द्वितीयेऽहनि वर्द्धते॥ उन्मीलिनी
समाख्याता पापपङ्कौघनाशिनी। द्वादश्यामुपवासश्च
द्वादश्यां चैव पारणम्॥ व्यञ्जुली नाम सा प्रोक्ता
हत्यायुतविनाशिनी। आदावेकादशी स्वल्पा ततोऽपि
द्वादशी भवेत्॥ त्रयोदशी दिनान्ते च त्रिस्पृशा सा

हरेः प्रिया । पूर्णमासी यदा शुक्ले वर्द्धते प्रतिपद्दिने ॥ कृष्णपक्षे तथा दर्शः कलया वर्द्धते यदि । पक्षवर्द्धिनी सा प्रोक्ता सर्वाशुभहरा स्मृता " इति ॥ तत्र जयाजयन्तीपापनाशिनीष्व विद्धात्वमात्रमपेक्षितम् ॥ तत्कथासु विद्धात्यागमात्रस्यैव दर्शनात । विजयायां तु " शुक्ले वा ऽसितपक्षे वा यदा श्रवणयोगिनी ॥ विजयैकादशी नाम सर्वाशुभनिवारिणी । शुद्धामेकादशीं त्यक्त्वा श्रवणैकादशीव्रतम् ॥ कार्यं व्रतोत्तमं धीमन्मासे यत्र भवेदिदम् " इति विशेषवाक्याद्विद्धाया अपि त्यागः । यद्यप्येवं तथापि नित्यव्रतकर्तॄणां प्रथमायां श्रवणयोगेपि द्वितीयैवावश्यकी " निष्कामस्तूत्तरां वसेत् " इति पूर्वोक्तमार्कण्डेयवाक्यात् । एवमेवोन्मीलिन्यामपि पञ्चपञ्चाशद्वेधिनां तु निष्कामत्वविद्धात्वाभ्यां पूर्वात्याग इति विशेषः । व्यंजुल्यास्तु काम्यत्वात्पूर्वोक्तगारुडस्कान्दयोरशक्तपरत्वेनापि व्यवस्थापितुं शक्यत्वाच्चाविद्धात्यागो यद्यपि नायाति । तथापि पाद्मोत्तरखण्डे एकादशीद्वादश्योर्माहात्म्ये विधाने च पार्वत्या पृष्टे " शृणु देवि प्रवक्ष्यामि " इत्यादिभिः "एकादश्यां न भुञ्जीत " इत्यन्तैरेकादशीव्रतनित्यत्वं प्रतिपाद्य ततस्तद्विधानकथनप्रस्तावे । "तस्मादेकादशीं

शुद्धामुपवासं समाचरेत् ॥ दशमीमिश्रितां तां तु प्रयत्नेन विवर्जयेत्। अरुणोदयवेलायां दशमी मिश्रिता भवेत् । तां त्यक्त्वा द्वादशीं शुद्धामुपोषेदविचारयन् ” इति विद्धात्यागशुद्धोपवासौ विधायाग्रे “ कलायामनुसंप्राप्ते सूर्यस्योदयनं प्रति ॥ त्रयोदश्यां तया देवि द्वादशी परिविद्यते । तथापि द्वादशीं शुद्धामुपवासो विधीयते । अरुणोदयवेलायां कृत्यं सर्वं समाचरेत् । कलायामपि द्वादश्यां पारणं तत्र चोदितम् । शुद्धामेकादशीं वापि त्यजेत्तत्र न संशयः । कलाप्येकादशी यत्र द्वादशीमुदिते रवौ । सर्वामेकादशीं त्यक्त्वा तत्रैवोपवसेत् द्विजः । एवं विधिं विनिश्चित्य समुपोष्यं हरेर्दिनम् ” इति शिवेन ‘ कलायाम् ’ इत्यादिभिः ‘ नसंशयः ’ इत्यन्तैर्द्वादश्याधिक्ये च ‘कलाप्येकादशी’ इत्यनेनैकादश्याधिक्ये च द्वादश्यात्मकस्यैव व्रतकालस्वरूपस्यैकादशीत्यागकथनपूर्वकं निर्णीतत्वादुन्मीलिन्यामिव व्यञ्जुलयामपि कालत्वाभावादेव त्यागः । न च श्रीमदाचार्यचरणोक्तिविरोधः । तस्याः पञ्चपञ्चाशद्विद्धात्यागमात्रपरत्वात् । प्रतिज्ञावाक्यस्य प्रसिद्धारुणोदयवेधरहितधर्मसंग्राहकत्वेनैव सार्थक्याच्च । एवं च ‘ अविद्धापि च विद्धास्यात्परतो द्वादशी यदि ’ इति

हेमाद्रिस्थपाद्मस्यापि संग्रहः। त्रिस्पृशा तु पूर्वोक्तरूपैव कार्या। न च 'विद्धाप्यविद्धा विज्ञेया परतो द्वादशी नचेत्' इति पूर्वार्द्धात्त्रिस्पृशायां विद्धाग्रहणं शङ्क्यम्॥ पाद्मे जान्हव्या "दशम्येकादशी भद्रा दिनैकस्मिन्यदा भवेत्। त्रिस्पृशा सा भवेद्देव न वेद्मि वद मे प्रभो" इति पृष्टे "आसुरी त्रिस्पृशा देवि या त्वया परिकीर्तिता॥ वर्जनीया प्रयत्नेन वृषहीनो यथा पतिः" इति प्राचीनमाधवेन तस्या आसुरीत्वकथनात्। विद्धाग्रहणस्य माधवेन स्मार्त्तपरताङ्गीकाराच्च॥ हेमाद्रिणाऽपि "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी॥ त्रिभिर्मिश्रा तिथिः प्रोक्ता सर्वपापहरा शुभा॥ तदोपवासः कर्त्तव्यो विष्णुसायुज्यमाप्नुयात्॥ उपवासः कृतस्तत्र मोक्षमेव प्रयच्छति" इति वाक्ये पापक्षयार्थिमोक्षार्थिविष्णुभक्तानां तस्या एव ग्राह्यत्वव्यवस्थापनात्। "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी॥ उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः" इति वाक्यस्य पापक्षयार्थ्यादिव्यतिरिक्तगृहस्थपरत्वव्यवस्थापनेन पूर्वोक्तवाक्यपूर्वार्द्धस्यापि तत्परत्वावसायाच्चेति दिक्। पक्षवर्द्धिन्यास्तु स्वरूपं पूर्वं सामान्यत उक्तमपि कथोपसंहारे "अमा वा यदि वा पूर्णमासी पूर्णा भवेद्यदा॥ भूत्वा तु

षष्टिघटिका वर्द्धते प्रतिपद्दिने ॥ प्रतिपदं समारभ्य यावद्भवति द्वादशी ॥ तावद्वृद्धिं समायाति सा भवेत्पक्षवर्द्धिनी " इति विशिष्योक्तम् ॥ तेन न पूर्वपक्षान्त्यवृद्धिमात्रेण सेति फलति। हरिवल्लभसुबोधदये तु " पौर्णमासी यदा शुक्ले कृष्णे दर्शश्च वर्द्धते ॥ भूत्वा तु षष्टिघटिका दृश्यते प्रतिपद्दिने । षडहं शोधयेत्प्राज्ञः समुपोष्य हरेर्दिनम् ॥ कुलकोटिं समुद्धृत्य नरकाद्व्रजते दिवि। पर्वाच्युतजगद्वृद्धावीशदुर्गान्तकक्षये ॥ संपूर्णैकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्' इति पाद्मवचनमेतद्व्रतकथायामुक्तम् ॥ तत्र पर्व प्रसिद्धमेव । अच्युतो द्वादशी जगत्-एकादशी । विश्वेदेवदेवताकत्वात् । ईशदुर्गान्तकाः अष्टमीनवमीदशम्यः । पाद्मोत्तरखण्डे भगवदर्जुनसंवादे तु भगवता स्वरूपान्तराण्यप्युक्तानि- " पुरा चैवावसाने च तिथीनां समता भवेत् । चतस्त्रस्तिथयो वृद्धाः प्रत्येकं दशमीमुखाः । घटिकार्द्धं तु दशमी हरेःस्यात्सार्द्धनाडिका ॥ सार्द्धत्रयं भवेच्चान्या कामस्तदधिका भवेत् । एवं वृद्धिसमायुक्ता प्रोच्यते पक्षवर्द्धिनी ॥ १ ॥ प्राक् समा दशमी यावच्छेषा वृद्धिसमागताः ॥ परिवृद्धा हि यास्तासां सा ग्राह्या पक्षवर्द्धिनी ॥ २ ॥ यस्मिन् पक्षे हि तिथयो वृद्धिं

यास्तास्तु षोडश ॥ तासां षोडशमी ग्राह्या सर्वसिद्धिप्रदायिनी ॥ ३ ॥ चन्द्रवृद्धौ तु यो वृद्धः पक्षः पापप्रणाशनः ॥ तस्मिन्वृद्धिमुपेता या सा प्रोक्ता पक्षवर्द्धिनी " इति ॥ ४ ॥ एवं षोढा भवति ॥ अमा वा पूर्णिमा वा वृद्धा प्रतिपदं स्पृशति ततो द्वादश्यन्तम् वृद्धौ प्रथमा ॥ १ ॥ अमा पूर्णिमा वा वृद्धा प्रतिपदं स्पृशति ततो ऽष्टम्यादित्रयक्षये एकादशीद्वादश्योर्वृद्धिस्तदा द्वितीया ॥ २ ॥ प्रतिपदमारभ्य नवम्यन्ताः समाः दशम्या अर्द्धघटिवृद्धिरेकादश्याः सार्द्धघटिका द्वादश्याः सार्द्धत्रिघटिका त्रयोदश्यास्तदधिका तदा तृतीया ॥ ३ ॥ प्रतिपदमारभ्य दशम्यन्ताः समाः एकादशीमारभ्य वृद्धास्तदा तुरीया ॥ ४ ॥ प्रतिपदमारभ्य षोडशानां वृद्धौ या दशमीवेधरहिता सा पञ्चमी ॥ ५ ॥ द्वितीयामारभ्य वृद्धे पक्षे या वर्द्धते सा षष्ठी ॥ ६ ॥ एते च पक्षा अस्मिन् कल्पे न संभवन्तीति ज्योतिर्विद आहुः तत्रैषोपपत्तिः । सूर्याचन्द्रमसोर्द्वादश द्वादशांशान्तरेण तिथिरेकैकोत्पद्यते ॥ तयोः स्पष्टगत्यन्तरस्यामान्तादमान्तात्मकचान्द्रे भगणैकभोगसत्वात् । तिथेर्वृद्धिह्रासौ तु पुष्पवतोर्गत्यन्तरभेदेन ॥ तथा हि ॥ एकस्मिन् सावने यदा द्वादशांशकलाप्रमाणं

खाश्विशैला ७२० त्मकं गत्यन्तरं तदा तिथिसाम्यम्। यदा खाश्विशैलकलातोन्तरं न्यूनम् तदा न साम्यम्। सावनैककालेन चान्द्रैकस्योत्पन्नत्वाभावात्। किन्तु। किंचिदधिकसावनघटीयुक्तसावनैकदिनेन तद्भोगः। एवं तिथिवृद्धिः॥ यदा तु खाश्विशैलकलातोन्तरमाधिकं तदा तिथिर्‍हास इति बोध्यम्॥ अत्रानुपाताः॥ यद्येतावतीभिर्गत्यन्तरकलाभिः सावनाः षष्टिघट्यस्तदा खाश्विशैलकलाभिः केति। यथा सूर्यगतिः ५९।८ चन्द्रगतिः ७९०।३५ एतयोर्गत्यन्तरम् ७३१।२७ अनयोरेतावत्यां सावनैकदिनेगत्यां चान्द्र दिनमेकं काश्विद्घट्यश्च जाताः। गत्यन्तरविकलाभाजकः षष्टिघटिकाया द्वादशांशविकलागुणकः न्यासो यथा ४३८८७ प्रमाणम्॥ ६० फलम् । ४३२०० इच्छागुणितफलम् प्रमाणेन भक्तं लब्धमिच्छायाः फलम्॥ एवं प्रत्यहं गत्योर्विसदृशत्वेन गत्यन्तरस्य विसदृशत्वान्न साम्यम्। गतिफलं तूच्चतुल्ये ग्रहे परमम्। तत्रापचीयमानमृणात्मकं प्रथमपदे। उपचीयमानं धनात्मकं च द्वितीयपदे। तृतीयपदे त्वपचीयमानं धनात्मकम्। चतुर्थपदे तूपचीयमानमृणात्मकम्। एवं कर्कादिकेन्द्रधनं मृगादिकेन्द्रऋणमिति सिद्धम्

स्फुटमिदं मध्यकक्षायां प्रतिमण्डलतो रेखान्तरं न्यूनमधिकं च भङ्ग्यां दृश्यते । एवं चन्द्रस्येदं सर्वमपि माससमध्ये संभवति । एवं मासेमासे तिथेर्वृद्धित्वं च संभवति । एवं प्रायो दशैकादशदिनपर्यन्तं तिथेर्वृद्धित्वं प्राप्य किंचिद्घटिकामात्रेण दिनद्वयं साम्यं भूत्वा ह्रासप्राप्तिः ॥ ह्रासता ऽपि प्रायः पञ्चदशादिनपर्यन्तम् । पुनस्तथैव साम्यं भूत्वा वृद्धिः । यद्यप्यत्र सूर्यमन्दोच्चस्य कालान्तरे भेदो भविष्यति तथापि सूर्यस्य गतिस्वल्पत्वेन न किंचिद्बाधकम् । सर्वमिदं स्फुटतरं सिद्धान्तज्ञज्योतिर्विदाम् । एवं कदाचिदपि नवदशतिथीनां साम्यं तिथिचतुष्टयस्यैव वृद्धिः पुनः पक्षावसाने साम्यम् ॥ तथा च ॥ षोडशातिथिनां वृद्धिरित्यादिकं नोत्पद्यते । पुराणप्रोक्तत्वात्कल्पान्तरे त्वस्तु । अस्मिन्कल्पे तु न । अलं भूयसेति ॥ स्मृतिकौस्तुभकालतत्वविवेककारादयस्तु ब्रह्मवैवर्तवचनान्युपन्यस्य तत्र द्वादशीमुपक्रम्य जयादिभेदानां कथनाद्द्वादशीविशेषत्वमेतासामिच्छन्ति । नृसिंहपरिचर्याकारस्तु द्वादशीव्रतत्वमङ्गीकुर्वन् " न करिष्यन्ति ये लोके द्वादश्यो ऽष्टौ ममाज्ञया ॥ तेषां यमपुरे वासो यावदाभूतसंप्लवम् " इति हिरण्याक्षवधाय

प्रार्थितस्य भगवतो मार्कण्डेयं प्रत्युक्तेनाष्टमहाद्वादशीसाधारणेन पाद्मवाक्येन नित्यत्वमपीच्छति । वयं तु पूर्वोक्तपाद्मसन्दर्भे त्रिविधैकादशीविशिष्टविष्णुपञ्चकस्य सावधारणं सर्वथा अत्याज्यत्वकथनादष्टवासरव्रतस्य काम्यत्वकथनाच्च जयादिषूक्तस्य फलस्य कामनायां सत्यां पातिव्रत्यव्रतिना तादृशफलार्थमष्टवासरव्रतं त्यक्त्वाऽन्यस्य करणे त्यागनिषेधोल्लङ्घनात्समुच्चयेन करणे अवधारणोल्लङ्घनाच्च प्रत्यवायः । पातिव्रत्यव्रतभङ्गश्च भवति न तु कामनाया अभावेऽपि त्याग इति सिध्यति ॥ अन्यथा काम्यतोक्तिवैयर्थ्यापत्तेः ॥ तेन तादृक्कामनासत्व एव नित्यत्वं न तु प्रावाहिकव्रतवदिति वदामः ॥ किंच ज्ञानाज्ञानादिना पापसंभवे विद्धैकादश्युपोषणादौ च प्रायश्चित्तमावश्यकम् ॥ तत्र व्यञ्जुल्यां "हत्यायुतविनाशिनी" इत्यादिकथनात्पञ्चसूनाऽपनोदकवैश्वदेववदपि कर्तव्यता ॥ "हत्या नश्यति काश्यां तु गयायां पैतृकं ऋणम् ॥ दशमीवेधजं पापं न काश्यां न गयापुरे ॥ दशमीवेधजं पापं व्यपोहयति व्यञ्जुली ॥ तत्र युक्तो महीपाल पुनर्न कुरुते यदि ॥ दशमीवेधजं विष्णोर्वासरं हरिवल्लभम् ॥ दिनं तदा व्यञ्जुली

च पूर्वपापं व्यपोहति" इत्यादिवाक्यैश्च तथेति प्रासङ्गिकमेतदुक्तम् ॥ अथ प्रकृतमेवानुसरामः + ॥ प्रबोधिन्यां जागरणमाश्यकम् ॥ "प्रबोधिनीं नरः कृत्वा जागरेण समन्विताम् ॥ न मातुर्जठरे याति अपि पापान्वितो नरः" इति हेमाद्रौ नारदीयात् । "इदं च मलमासेऽपि कार्यम्" इत्युक्तं दिनकरोद्द्योते । मलमासोऽत्रांहस्पति (बोध्यः ।) रेव प्रायो ज्ञेयः । * जागरदिनस्थितं शृङ्गारादिकं द्वितीयदिवसे अवश्यं स्थापनीयम् । तदुक्तं हरिवल्लभसुधोदये नृसिंहपरिचर्यायाम् । "श्रीविष्णोर्जागरे पूजां यो नरो द्वादशीदिने ॥ तामेवोत्तारयेत्तार्क्ष्य स याति नरकं ध्रुवम् ॥ एकादश्यां कृतां पूजां यो मूढः काममोहितः । द्वादश्यां तु वृथा कुर्यात्स पापी नरकं व्रजेत्" इति ॥ * अथ पारणाविचारः ॥ हेमाद्रौ भविष्ये । "आभाकासितपक्षस्य मैत्रश्रावणरेवतीसंगमे नैव भोक्तव्यं द्वादश द्वादशी र्हरेत्" इति ॥ तत्रैव विष्णुधर्मे । "मैत्राद्यपादे स्वपितीह विष्णुः पौष्णान्त्य (न्त) पादे प्रतिबोधमेति ॥ श्रुतेश्च

+ ८६ पृष्ठस्थ "किंचैता एवेत्यादिग्रन्थमारभ्य 'अथप्रकृतमेवानुसरामः' इत्यन्तः उन्मीलिन्यादि-विचारग्रन्थोऽयम् केषुचित्पुस्तकेषु नास्ति ॥

* * एतच्चिन्हमध्यगतः पाठः कचित्पुस्तकेषु नास्ति ॥

मध्ये परिवृत्तिमिति सुप्तिप्रबोधपरिवर्त्तनमेव वर्ज्यम् ” इति । एवं च भविष्यवाक्यस्य विष्णुधर्मवाक्येनोपसंहारान्न सर्वनक्षत्रनिषेधः ॥ किंतु तत्तदाद्यपादादिनिषेधः ॥ “ मध्यशब्दश्च द्वितीयतृतीयपादपरो मध्यमविंशतिदण्डपरो वा” इति दिनकरोद्द्योतः ॥ तत्रापीदं ध्येयम् । यदि विद्धाधिकाद्वादशी प्रथमं क्षीयते । ऋक्षान्त्यपादश्चानुवर्त्तते तदा द्वादशीयुतत्रयोदश्यां पारणनिषेधस्य जागरूकत्वात् द्वादशीमध्ये ऽद्भिः पारणीयम् । “ आपो वा अशितमनशितं च ,, इति श्रुतेः । यदापि युगपदुभयोः क्षयस्तदापीयमेव व्यवस्था । त्रयोदश्यां पारणनिषेधश्च कौर्मे मात्स्ये च । “ एकादशीमुपोष्यैव द्वादश्यां पारणं स्मृतम् ॥ त्रयोदश्यां न तत्कुर्यात् द्वादश द्वादशीक्षयात् ” इति । त्रयोदश्यामिति द्वादशीविद्धत्रयोदश्याम् । अन्यथा । “ त्रयोदश्यां तु शुद्धायां पारणे पृथिवीफलम् । शतयज्ञाधिकं वायो नरः प्राप्नोत्यसंशयम् ” इति नारदीयस्य “ एकादशी कलां प्राप्ता येन द्वादश्युपोषिता ॥ पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणम् ” इति विष्णुरहस्य + स्य “ द्वादश्यैकादशी यत्र तत्र सान्नि-

+ + एतच्चिन्हमध्यगतः पाठः केषुचित्पुस्तकेषु नास्ति ॥

हिते हरिः। तत्र क्रतुशतं पुण्यं द्वादश्यां पारणे कृते ॥ एकादशीव्रते यत्र परतो द्वादशी मता ॥ तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणे। दशम्यैकादशीमिश्रा नोपोष्या नरकप्रदा ” इत्याग्नेय + स्यापि विरोधापातादिति ॥ इतिकार्त्तिकोत्सवः ॥

मार्गशीर्षे तु ॥ “ मार्गशीर्षे शुभे पक्षे षष्ठ्यां प्रावरणोत्सवम् । कृत्वा दृष्ट्वा नरो भक्त्या वैष्णवं लोकमाप्नुयात् ” इत्यादिना स्कान्दे प्रावरणोत्सवो विहितः। स च शीतबाहुल्याद्देशान्तरे प्रबोधिन्यामेव विधीयत इति न कोपि विचारः ॥

पौषकृष्णनवम्यां श्रीमत्प्रभूणामुत्सवः ॥ स चौदयिक्यामेव कार्यः ॥ विद्धाक्षये तु विद्धायामेव। एतत्करणावश्यकत्वं तु श्रीमदाचार्योत्सवे विवेचनीयम् ॥

अथ माघोत्सवाः ॥ तत्र तावत् मकरसंक्रमे पर्वात्मकः उत्सवः कार्यः ॥ तदुक्तं स्कान्दे पुरुषोत्तममाहात्म्ये ॥ “ मृगराशिं संक्रमति यदा भास्वान् द्विजोत्तमाः ।

उत्तराशां जिगमिषुस्तदा स्यादुत्तरायणम् । तस्य संक्रमणादूर्ध्वं यावत्स्याद्विंशतिः कलाः । महापुण्यतमः कालः पितृदेवद्विजप्रियः । तत्र स्नात्वा विधानेन तीर्थराजजले नरः ॥ नारायणं समभ्यर्च्य कल्पवृक्षं प्रणम्य च" इत्याद्युक्त्वा "दृष्ट्वोत्तरायणे देवं देहबन्धाद्विमुच्यते" इति । अत्र च पुण्यकाल एव पूजाकाल इति तेनैव निर्णयः । एतेनैव मेषसंक्रमोऽपि व्याख्यातो ज्ञेयः ॥

* " वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश " इति स एव कालो ग्राह्यः " *

माघशुक्लपञ्चम्यां वसन्तोत्सवः ॥

तदुक्तं निर्णयाऽमृते पुराणसमुच्चये । " माघमासे नृपश्रेष्ठ शुक्लायां पञ्चमीतिथौ । रतिकामौ तु संपूज्य कर्त्तव्यः सुमहोत्सवः ॥ दानानि च प्रदेयानि तेन तुष्यति माधवः " इति । अत्रोत्सवादिना भगवत्तोषोक्तेर्भगवदीयैः साक्षान्मन्मथमन्मथरूपः सलक्ष्मीको भगवानेव पूज्यः । यद्यप्यत्र पूजोपकरणं नोक्तं तथापि शिष्टाः दोलोत्सवस्थमेव गृण्हते । तच्चाग्रे विवेच्यम् । पूजाकालस्तु प्रातिस्विकवाक्ये ऽनुक्तत्वात्सामान्यवाक्योक्त एव । स च " त्रेधाविभक्तदिवसे प्रातः काले

सुरार्चनम् । मध्यान्हे तीर्थकार्यं च सायं रक्षाकरी क्रिया " इति दिनकरोद्योते हेमाद्रिस्थमहापञ्चरात्रोक्ते मुहूर्तपञ्चकात्मकः पूर्वाण्ह एव ग्राह्यः ॥ न तु "पूजाव्रतेषु सर्वेषु मध्यान्हव्यापिनी तिथिः " इति बोधायनोक्तो मध्यान्हः । तत्र पूज्या [जा] नुल्लेखेन संदिग्धत्वात् । अतिथ्यादिपूजादौ तस्य सावकाशत्वाच्च तेन पूर्वोक्तपूर्वाण्हव्यापिनी तिथिर्ग्राह्या । दिनद्वये तदेकदेशव्याप्तौ परैव । 'देवकार्ये तिथिर्ग्राह्या यस्यामभ्युदितो रविः' इति "शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः" इति च वृद्धयाज्ञवल्क्यमार्कण्डेययोर्वचनात् । "युग्माग्नियुगभूतानाम् " इति निगमस्य युग्मवाक्यस्य " प्रतिपत्पञ्चमी भूता सावित्रीवटपूर्णिमा ॥ नवमी दशमी चैव नोपोष्या परसंयुता " ॥ इति ब्रह्मवैवर्तेन पूर्वसंयुताया उपवासविषयत्वावगमात् । यत्तु चतुर्थीसंयुता कार्या पञ्चमी परया न तु ॥ दैवे कर्मणि पित्र्ये च शुक्ले चैव तथा सिते" इति वाक्यम् । तदपि निर्णयसिन्धावुपवास एवोपसंहृतमिति पूर्वोक्तैव व्यवस्था ॥ क्षये तु पूर्वैव । गत्यन्तराभावात् । पूर्णवृद्धौ

तु पूर्वैव ❁। 'षष्टिदण्डात्मिकायास्तु तिथेर्निष्क्रमणं परे॥ अकर्मण्यं तिथिमलं विद्यादेकादशीं विना" इति ज्योतिर्निबन्धवाक्यात्। यदि च निर्णयसिन्धूक्तमनुपपन्नमिति "कर्मणि" इति पदप्रयोगाद्भाति। तदा तु सुखेन पूर्वविद्धैव यथासम्भवं सदा कार्या॥ * अतिवृद्धावपि पूर्वैवेति *। इत आरभ्य प्रत्यहं फाल्गुनोत्सवं कुर्वन्ति शिष्टाः॥ वैधं तु "फल्गूत्सवं प्रकु [र्वन्ति] र्वीत पञ्चाहानि त्र्यहानि वा॥ फाल्गुन्याः पूर्वतो विप्राः" इति स्कान्दे पुरुषोत्तममाहात्म्ये वचनात्। पञ्चाहं त्र्यहं वा बोध्यं तेनाऽशक्तौ तावत्तु कार्यमेवेति दिक्॥ इति माघोत्सवाः॥

अथ फाल्गुनकृष्णसप्तम्यां श्रीमद्गोवर्द्धनोद्धरणागमनोत्सवः॥ स च भक्तिमार्गीय एवेति औदयिक्यामेव कार्यः॥ शिष्टाचारात्॥ क्षये तु तत्रैव। गत्यन्तरविरहात्॥ वृद्धौ तु पूर्वैव। औचित्यादिति॥

❁ अत्र केषुचित्पुस्तकेषु "परैव। "यथा मलिम्लुचः पूर्वो दैवो मासस्तथोत्तरः त्याज्या तिथिस्तथा पूर्वा वृद्धौ ग्राह्या तथोत्तरा" इतिवाक्यात्। इत्यधिकं दृश्यते। षष्टिदण्डात्मिकाया इत्यादि ज्योतिर्निबन्धवाक्यात् इत्यन्तं च न दृश्यते॥

* * इयं पंक्तिः केषु चित्पुस्तकेषु नास्ति॥

* अथ फाल्गुनपूर्णिमायां पर्वात्मको होलिकोत्सवः॥
तत्र होलिकाप्रदीपनं भद्रां विहाय रात्रौ पूर्णमासीमध्ये कार्यम् ॥ "तपस्ये पौर्णमास्यां तु रजन्यां होलिकोत्सवः"। इति भविष्यवाक्यात् ॥ दिनार्द्धात्परतोऽपि स्यात्फाल्गुनीपूर्णिमा यदि ॥ रात्रौ भद्रावसाने तु होलिकां तत्र दीपयेत्" इति भविष्योत्तराच्च ॥ "राका यामद्वयादूर्ध्वं चतुर्दश्यां यदा भवेत्। होलां भद्रावसाने तु निशीथान्तेपि दीपयेत्" इति पुराणसमुच्चयाच्च। एतद्व्यतिरिक्तकाले होलादीपने दोषश्रवणाच्च। तथा हि। "प्रतिपद्भूतभद्रासु याऽर्चिता होलिका दिवा। संवत्सरं च तद्राष्ट्रं पुरं दहति सा द्रुतम्" इति नारदवाक्यात्। भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा॥ श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी" इति। "भद्रायां दीपिता होली राष्ट्रभङ्गं करोति वै॥ नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेत्" इति पुराणसमुच्चयवाक्याच्च। "नन्दायां नरकं घोरं भद्रायां देशनाशनम्। दुर्भिक्षं च चतुर्दश्यां करोत्येव हुताशिनी" इति ज्योतिर्निबन्धे विद्याविनोदाच्च। "न कर्त्तव्यो

---

* अयम् "अथेत्यादि" १०६ पृष्ठस्थ "इति दिक्" इत्यन्तो होलिकानिर्णयग्रंथः एकस्मिन् पुस्तकेऽस्ति ॥

दिवा विष्ट्यां रिक्तायां प्रतिपत्स्वपि " इति भविष्याच्च । " न दिवा पूजयेत् ढुण्ढां पूजिता दुःखदा भवेत् " इति दिवोदासीयाच्च । ननु नारदवाक्ये " प्रदोषव्यापिनी ग्राह्या पूर्णिमा फाल्गुनी सदा " इति । ग्रन्थान्तरे च ॥ " सायान्हे होलिकां कुर्यात्पूर्वाण्हे क्रीडनं गवाम् " इत्यादिवाक्येषु प्रदोषग्रहणात् ॥ " सार्द्धयामत्रयं वा स्याद् द्वितीयदिवसे यदा । प्रतिपद्वर्द्धमाना तु तदा सा होलिका स्मृता " इति भविष्यवचनादपि प्रदोषकालस्यार्थादुपलब्धेश्चेति पूर्वेद्युर्भद्रारहितप्रदोषालाभे परेद्युः प्रदोषे कार्यमिति चेन्न । एतद्वाक्यानां भिन्नविषयत्वात् । तथा हि ॥ नारदवाक्ये " प्रदोषव्यापिनी " इत्युक्त्या ह्युदयव्यापिन्या अप्राशस्त्यमुच्यते ॥ " श्रावणी दुर्गनवमी दूर्वा चैव हुताशिनी । पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम् " इत्यादेः ॥ " चतुर्दश्या च पूर्णिमातिथ्योर्युग्मं महाफलम् ॥ एतद्व्यस्तं महादोषं हन्ति पुण्यं पुराकृतम् " इति युग्मवाक्यस्य चानङ्गीकारे महादोषश्रवणाच्च । संपूर्णरात्रौ भद्रारहितपूर्णालाभे प्रदोषैकमुख्यकालज्ञापने एतद्वाक्यपर्यवसानाच्च । " भद्रायां विहितं कार्यं होलिकायाः सुपूजनम् " इति । यच्च " मध्यरात्रमति-

क्रम्य विष्टेः पुच्छं यदा भवेत् । प्रदोषे ज्वालये द्वन्हिं सुखसौभाग्यदायकम् ॥ प्रदोषान्मध्यरात्रान्तं होलिकापूजनं शुभम् " इति च कैश्चिदलेखि तद्नाकरमिति मयूखकारोक्तेश्च ॥ कैश्चित्प्रदोषशब्दस्य रजनीपरत्वेन व्याख्यातत्वाच्च । " सार्द्धयाम " इति वाक्यस्य चायं विषयः ॥ तथा हि । फाल्गुनसितषष्ठ्यां प्रायो मीनार्के जाते समानत्वेन त्रिंशद्घटिकामितदिवसे वर्तमाने चतुर्दश्याः एकोनषष्टिघटिकात्मके सर्वभोगकाले । पूर्णायाः पञ्चपलोनषष्टिघटिकात्मके प्रतिपद एकषष्टिघटिकात्मके । सूर्योदयाच्चतुर्दश्यास्त्रिंशद्घटिकात्मके पूर्णायां च पञ्चपलोनत्रिंशद्घटिकात्मके भोग्यकालेहीति ॥ अन्यथा रात्रौ भद्रारहितपूर्णायाः लाभेऽपि तां विहाय वर्द्धमानप्रतिपदि होलादीपने " वन्हौ वन्हिम्परित्यजेत् " इति भविष्यद्वाक्यमपि विरुद्ध्येत ॥ यदा तु पूर्वदिने चतुर्दशी प्रदोषव्यापिनी परदिने च पूर्णिमान्यूनवशात् प्रदोषात् प्रागेवसमाप्यते तदा पूर्वदिने संपूर्णरात्रौ भद्रासत्त्वात् भद्रायां च होलिकानिषेधात् । भद्रामुखं विहाय पूर्वदिने एव कार्यम् ॥ " प्रदोषव्यापिनी न स्याद्यदा पूर्वदिने तदा ॥ भद्रामुखं वर्जयित्वा होलि-

कायाः प्रदीपनम् " इति नारदवचनात् ॥ " यामत्रयोर्ध्वयुक्ताचेत्प्रातिपत्तु भवेत्तिथिः ॥ भद्रामुखं परित्यज्य कार्या होला मनीषिभिः " इति विद्याविनोदेऽभिधानाच्च भूतादिचतुष्टयव्यतिरिक्तकाले होलादीपनं कार्यम् ॥ तदभावे तु प्रातिपद्वर्धगामिनी चेत् तदाऽत्रैव ॥ तदभावेऽपि भद्रामुखं विहाय रात्रावेव कार्यमिति राद्धान्त इति दिक् * ॥

॥ अथ दोलोत्सवः ॥

फाल्गुनपौर्णमास्यां पूर्णिमासमीपे उत्तराफाल्गुन्यां वा दोलोत्सवः । तदुक्तम् ॥ " ब्रह्मपुराणे (ज्येष्ठीप्रशंसकाध्याये) । * " नरो दोलायितं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ॥ फाल्गुन्यां प्रयतो भूत्वा गोविन्दभुवनं व्रजेत् " इति । (स्कान्दे पुरुषोत्तममाहात्म्ये) * । " तपस्ये मासि राकायां यदोत्तराफाल्गुनी भवेत् ॥ तदा दोलोत्सवः कार्यस्तच्च श्रीपुरुषोत्तमे " (इति) स्कान्दे पुरुषोत्तममाहात्म्ये ॥ " फाल्गुन्यां क्रीडनं कुर्याद्दोलायां मम भूमिप । दोलायां येऽपि पश्यन्ति दक्षिणामुखपूजितम् ॥ ब्रह्महत्यादिभिः पापैर्मुच्यन्ते नात्र-

---

* १०३ पृष्ठस्थ 'अथेत्यादि' ' इतिदिक् ' इत्यन्तो होलिकानिर्णयग्रन्थोऽयम् एकस्मिन् पुस्तकेऽस्ति । * * एतच्चिन्हमध्यस्थः पाठः केषुचित्पुस्तकेषु नास्ति ।

संशयः" इति तथा तत्रैवाग्रे ॥ "फाल्गुने मासि कुर्वीत दोलारोहणमुत्तमम् ॥ यत्र क्रीडति गोविन्दो लोकानुग्रहणाय वै" इति । अत्राग्रे "चतुर्दश्यां निशामुखे वन्ह्युत्सवं प्रकुर्वीत" इत्युक्त्वा "प्रातर्यामे चतुर्दश्यां गोविन्दप्रतिमां शुभाम्" इत्यादिना प्रत्यर्चापूजनादिकं दोलासमीपनयनम् "फलपुष्पावनम्रैश्च शाखिभिः परिकल्पिते । वृन्दावनान्तरे रम्ये मत्तभ्रमरचारिणि ॥ कोकिलारावमधुरे नाना पक्षिगणाकुले ॥ नानोपशोभारचिते कालागुरुसुधूपिते" इत्यादिना वृन्दावन करणं दोलायाञ्च भगवतः स्थापनं ततः "उपवेश्याथ गोविन्दम्पूजयेदुपचारकैः । बल्लवीवृन्दमध्यस्थं कदम्बतरुमूलगम् ॥ हास्यलास्यविलासैश्च क्रीडमानं वनान्तरे ॥ गोपिकाभिश्च गोपालैर्लीला (लां) दोलितयानगम् ॥ चिन्तयित्वा जगन्नाथं विकिरेद्गन्धचूर्णकैः ॥ सकर्पूरैः पीतरक्तशुक्लैर्दिक्षु समन्ततः ॥ आंदोलयेद्दोलिकायां सप्तवारान् शनैः शनैः ॥ त्रिरेवदोलयेद्देवं सर्वपापापनोदनम् । भक्त्यानुग्राहकं पुंसां भुक्तिमुक्त्येककारणम् ॥ लीलाविचेष्टितं यस्य प्रथमं सहजन्तथा ॥ अंहः सद्यः क्षयकरं मूलविद्यानिवर्तकम् ॥ पश्यन् द्वितीयं हरति गोहत्याद्युपपातकम् ॥ क्षयन्त्यशेषपापानि तृतीये

नात्रसंशयः" इत्यादिना च प्रकारः फलं चोक्तम्। तेनायमेव प्रकारः कालश्च यामिन्याः पश्चिमयाम इति निश्चीयते॥ एवं सति पुराणभेदेन तिथिद्वयस्योक्तत्वात् "राकायाम्" इति सामीप्यसप्तम्या च फाल्गुने राकासमीपे यदोत्तराफाल्गुनी तदा दोलोत्सवः कार्य इति वचनव्यक्तेश्च अपररात्रिव्यापिन्यामुत्तराफाल्गुन्यां दोलोत्सवः कार्यः न तु तिथावाग्रहः कर्त्तव्यः॥ नक्षत्रप्राबल्यस्य विजयदशम्यांदर्शितत्वादिति। न च सामीप्यार्थे विनिगमनाविरहः। फाल्गुनचैत्रादिसंज्ञानां तत्तन्नक्षत्रयुक्तपौर्णमासीवत्ताप्रयुक्तत्वेऽपि तद्योगस्याऽनियतत्वेन यदा तदभावस्तदापि तन्मासव्यवहारो नक्षत्रस्य तिथिसामीप्यमादायैव क्रियत इति प्रकृते तद्ग्रहणे दोषाभावात्। अत एव च मासादिपदस्थसप्तमीषु न सोऽर्थो गृह्यत इति न कोऽपि शङ्कालेश इति दिक्॥

अथात्र प्रसङ्गादिदं विचार्यते। शिवरात्रिव्रतं वैष्णवानाङ्कर्त्तव्यं न कर्त्तव्यं वेति। तत्र तावन्माधवीये स्कान्दे "परात्परतरं नास्ति शिवरात्रिः परात्परम्॥ न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम्॥ जन्तुर्जन्म-

सहस्रेषु भ्रमते नात्र संशयः" इत्यकरणे प्रत्यवायश्रुतेः "वर्षे वर्षे महादेवि नरो नारी पतिव्रता ॥ शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूजयेत्" इतिवीप्साश्रुतेः ॥ "अर्णवो यदिवा शुष्येत क्षीयते हिमवानपि ॥ चलन्त्येते कदाचिद्वै निश्चलं हि शिवव्रतम्" इति वचनाच्च सर्वेषां नित्यमिति माधवनिर्णयामृतसिन्धुप्रभृतयः। दिनकरोद्द्योतस्तु "वैष्णवो वाऽथ शैवो वा कुर्यादेकादशीव्रतम्" ॥ "वैष्णवो वाऽथ शैवो वा सौरो प्येतत्समाचरेत्" इति । शिवधर्मोक्तसौरोक्तवचनवत् जन्माष्टमीशिवरात्रिविधायकवाक्येषु विशेषवचनाभावान्न सर्वेषां नित्यं किन्तु केवलवैष्णवेभ्यो ये भिन्नास्तेषामेव नित्यं जन्माष्टमीव्रतं च शैवभिन्नानाम्" इत्याह ॥ * नृसिंहपरिचर्यायां तु "सौरो वा वैष्णवो वाऽन्यदेवतान्तरपूजकः । न पूजाफलमाप्नोति शिवरात्रिबहिर्मुखः" इति शिवद्वेषिवैष्णवस्य पदप्राप्तिनिषेधात् ॥ तथा तादृशतत्पूजाया हरिणा अग्रहादिस्मरणादित्यादरेण शिष्टवैष्णवपरिग्रहाच्च सर्वैरनुष्ठेयम्" इत्याह * । माध्वास्तु शिवं जीवकोटौ गणयन्तीति

---

* * एतच्चिन्हस्थोऽयं ग्रन्थः केषुचित्पुस्तकेषु नास्ति ॥

व्रतं सुतरान्न कुर्वन्ति (ये च कुर्वन्ति ते ऽपि शिवान्तर्गतविष्णुं पूजयन्ति "यास्त्वन्यदेवतितिथयस्तासु विष्णुं प्रपूजयेत्" इति वराहोक्तेरिति चाहुः) तदिदं सर्वमसंगतम् ॥ अहंकाराधिष्ठातुर्जीवत्वे ऽपि गुणावतारस्येश्वरकोटित्वात् । तथा हि । श्रीभागवते चतुर्थस्कन्धे । "शरणन्तम्प्रपद्येहं य एव जगदीश्वरः । प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन्" इति मनस्यभिसंधायाऽत्रिणा प्रजार्थतपः करणे "तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना ॥ निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः ॥ अप्सरोमुनिगन्धर्वविद्याधरमहोरगैः ॥ विगीयमानयशसस्तदाश्रमपदं ययुः" इत्यन्तेन "विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः । ते ब्रह्मविष्णुगिरिशाः प्रणतोस्म्यहं वस्तेभ्यः क एव भवतां म इहोपहूतः" इत्यत्रिस्तुत्यादिना च त्रयाणामीश्वरत्वमवगम्यते । दशमस्कन्धे ऽपि "त्रिष्वधीशेषु" इत्युक्तया च । द्वादशस्कन्धे "वरदेशा वयं त्रयः" इत्युक्तयाच ॥ कूर्मपुराणेच "लीलया परमेश्वराः" इतिवचनाच्च । नचैवं सत्यनेकेश्वरापत्तिरिति वाच्यम् ॥ परात्परस्य कृष्णस्य

( ) एतदन्तर्गतोऽपिग्रन्थः केषुचित्पुस्तकेषु नास्ति ॥

भगवत एकस्यैवेश्वरेश्वरत्वात् । अत एव चतुर्थस्कन्धे दक्षाध्वरध्वंसोत्तरं ब्रह्मस्तुतौ “ जाने त्वामीश विश्वस्य जगतो योनिबीजयोः । शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरन्तरम् ” इत्यादि पद्यद्वयेन शिवस्य परमशिवत्वमुक्त्वा “ भवांस्तु पुंसः परमस्य मायया दुरन्तयाऽस्पृष्टमतिः समस्तदृक् ॥ तथा हतात्मस्वनुकर्मचेतस्वनुग्रहं कर्त्तुमिहार्हतिप्रभो ” इति कथनात्परमशिवस्यापि परपुरुषानुगृहीतत्वमेव प्रतिपादितं न तु परमपुरुषत्वम् । परमपुरुषस्य कृष्णत्वं “ कृषिर्भूवाचकः ” इत्यादिश्रुत्या “ त्वमेक आद्यः पुरुषो द्वितीयस्तुर्यः स्वदृग्घेतुरहेतुरीशः ” इत्यादिश्रीभागवतवाक्यैरवसेयम् ॥ इदमत्र संक्षेपतो निरूपितम् । विशेषस्तु बालबोधटीकायां विवेच्यः प्रहस्ते भिंदिपाले विवेचितश्च तस्माज्जीवत्वकथनमनुचितमेव ॥ व्रतन्तु न कार्यमेव “ भवव्रतधरा येच येच तान्समनुव्रताः ॥ पाषंडिनस्ते भवन्तु सच्छास्त्रपरिपंथिनः ॥ नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः ॥ विशंतु शिवदीक्षायां यत्र दैवं सुरासवम् । ब्रह्म च ब्राह्मणांश्चैव यद्यूयम्परिनिन्दथ । सेतुं विधरणं पुंसामतः पाषंडमाश्रिताः । एष एव हि लोकानां शिवः पन्थाः सनातनः ॥ यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः । तद्ब्रह्म परमं शुद्धं सतां वर्त्म सनातनम् । विगर्ह्य यात पाषंडं

दैवं वो यत्र भूतराट् " इति श्रीभागवते चतुर्थस्कन्धे निन्दाश्रवणात् ॥ न च व्रतविधायकवाक्यानामनवकाशप्रसङ्गः । तेषां शापपूर्वकालविषयत्वात् । अक्षतागोपद्मादिविधायकवाक्यवत् । न च भवव्रतशब्देन पाशुपतव्रतमुच्यत इति वाच्यम् । संकोचे मानाभावात् । न च " सच्छास्त्रपरिपंथिनः " इति शप्तव्यविशेषणमेव मानमिति वाच्यम् । तस्योत्तरावधिगमकत्वात् ॥ अन्यथा " नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः । विशन्तु शिवदीक्षायां यत्र दैवं सुरासवम् " इत्यादिश्लोकत्रयोक्तशापद्वयवैयर्थ्यापत्तिः । सच्छास्त्रपरिपन्थित्वेनैव सर्वसंभवात् । अतस्तस्योत्तरावधिगमकत्वमेव ॥ नचैवं शिवद्वेषापत्तिः ॥ अनुवादित्वात् । + अत एव " परात्परतरं यान्ति नारायणपरायणाः । न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरम् " इति वाक्योक्तदोषोपि न + ॥ व्रताकरणं व्रतस्य निषिद्धत्वादेव न तु शिवद्वेषात् जैनमन्दिरप्रवेशवत् । अन्यथा जिनस्याप्यवतारत्वेन तन्मन्दिरप्र-

+ + एतचिन्हान्तर्गतः पाठः क्वचिन्नास्ति ॥

वेशेऽपि दोषानुत्पत्तिप्रसङ्गः ॥ * अवतारत्वेऽपिदेवान्तरस्याक्षते स्तद्व्रतकरणेऽविधिपूर्वक भजनापत्तिः। 'येप्यन्यदेव ताभक्ताः' इत्यादि भगवद्वाक्यात् * । तस्माद्भगवान् शिवोऽवतारत्वाद्वैष्णवमुख्यत्वाद्वैष्णवधर्मोपदेष्टृत्वाद्वेदरूपत्वात्सर्वविद्येश्वरत्वात्सर्वदेहीशानत्वाच्च नमस्य एव मान्य एव । व्रतन्तु निन्दितत्वादेवाकरणीयामिति दिक् ।

अथ प्रसङ्गादिदमुच्यते । उपरागे संभवति + भोगसमर्पणादिकं कथं कार्यमिति । तत्रोत्तरं स्वमार्गे स्नेहस्य प्राधान्याद्यो बालेषु न्यायः स आदर्त्तव्यः । तत्र ग्रहणे बालवृद्धातुराणां ग्रहयामात्पूर्वमेको यामो निषिद्धः । "सायान्हे ग्रहणं चेत्स्यादपराण्हे न भोजनम् । अपराण्हे न मध्यान्हे मध्यान्हे न तु सङ्गवे । भुञ्जीत सङ्गवे चेत्स्यान्न पूर्वं भोजनक्रिया" इति मार्कण्डेयोक्तेरित्याहुः । तच्चिन्त्यम् । उक्तवाक्ये सायान्हादिपदैः पञ्चधा विभक्तदिवसपञ्चमांशद्वये भोजननिषेधलाभेन ग्रहणसामान्ये उक्तरीत्या यामद्वयत्यागस्य (व्याख्येय) वाक्यविरुद्धत्वात् । किंतु सूर्यग्रहे पञ्चमांशद्वयं निषिद्धमिति तावदेव त्याज्यम् । चन्द्रग्रहे तु विशेषवाक्यानुपलंभान्न्यायसाम्य-

---

* * एतच्चिन्हमध्यवर्त्ती ग्रन्थः क्वचित्पुस्तके दृश्यते ॥ + 'भोगसमर्पणादिकम्' इत्यारभ्य ११४ पृष्ठस्थ 'विशेषमिति दिक्' इत्यन्तो ग्रन्थः केषुचित् पुस्तकेषु नास्ति ॥

मादरणीयम् । यद्यपि रात्रेः पञ्चधा विभागो न प्रसिद्धस्तथापि शास्त्रस्य शक्तविषयत्वादर्थापत्त्या तदादरणमुचितम्॥ "ग्रहणं तु भवेदिन्दोः प्रथमादधियामतः॥ भुञ्जीतावर्त्तनात्पूर्वं प्रथमे प्रथमादधः" इति वाक्ये ग्रहयामत्यागलाभाद्रात्रेर्यामो दिवसस्यैकः पञ्चमांश इति वा । वस्तुतस्तु "ग्रहणं तु भवेदिन्दोः" इत्यस्य "चन्द्रग्रहे तु यामाँस्त्रीन्" इत्यनेन शक्तविषय उपसंहारे कृते "बालवृद्धातुरैर्विना" इति या तदनुज्ञा सा ग्रहणयामातिरिक्तं कालं बालादिष्वऽनिषिद्धं बोधयिष्यतीति ग्रहयाम एव बालादिभिर्न भोक्तव्यमिति युक्तम् इत्येवं पृथङ्निर्णय उचितः । तेन सूर्यग्रहे दिवसपञ्चमांशद्वयात्प्राक्चन्द्रग्रहे तु प्रथमयामे चन्द्रग्रहे सूर्यास्तात्पूर्वं भगवते घृतपक्वान्नादिकं समर्पणीयम् । द्वितीयादियामे तु सूर्यास्तोत्तरमप्यदोषः । तथापि शयनावसरसंकोचाद्दिवस एव कृत्वा शयनारार्त्तिकं विधेयमिति दिक् ॥

(अथ) कथमुत्सवः कार्यः (इति शङ्काऽवशिष्यते) तत्रोत्तरम् "आरनालं पयस्तक्रं दधि स्नेहाज्यपाचितम्॥ मणिकस्थोदकं चैव न दुष्येद्राहुसूतके" ॥ "वारि

तक्रारनालादि तिलदर्भैर्न दुष्यति" इत्यादिवाक्यैस्तथाकृतौ सामग्र्यदोषे सर्वदैव कार्य इति। इयान्परं विशेषः। यदा चन्द्रस्य ग्रस्तास्तस्तदैव चेत्तदा मुक्तिमवधार्य स्नात्वा शुद्धीभूय स्वल्पश्रृङ्गारादि कृत्वा शीघ्रतया गौणकाले कार्यः। नचात्र मानाभावः। "ग्रस्ते चास्तङ्गते त्विन्दौ ज्ञात्वा मुक्त्यवधारणम्॥ स्नानहोमादिकङ्कार्यं भुञ्जीतेन्दूदये पुनः" इति निर्णयसिन्धुदिनकरोद्योतभगवद्भास्करलिखितोशनोवाक्ये आदिपदेन तस्यापि सङ्ग्राह्यत्वात्। ग्रहणमध्येऽपि सुरार्चनस्य विहितत्वाच्चेति। अनेनैव न्यायेन दीपोत्सवेऽपि कार्यम्। भगवतो नैवेद्यसामग्री च स्नेहपक्वातिरिक्ता श्रृता तदहोरात्रे न कार्या। श्रृतान्नस्य ग्रहणान्तरितस्य वाक्यान्तरेत्यागस्योक्तत्वात् शेषं यथास्थितमिति
१ ⁘ ॥ चन्द्रग्रस्तास्ते मुक्तिमवधार्य शुद्ध्यनन्तरं पाकोपि कार्य एव। भगवदर्थत्वात्। स्वार्थन्तु न कार्य एव कृष्णलेष्ववघातस्येव भोजनसम्बद्धस्य

---

१ ⁘ अत्र केषुचित्पुस्तकेषु "पाकोऽपि कार्यएव। उदये भोजनस्य विधानादनुदये तदनुज्ञाप्राप्तेरिति दिक्॥ प्रस्तुतमनुसरामः। इतिफाल्गुनोत्सवाः॥ इत्यन्त एव ग्रन्थोदृश्यते नत्वयम् "चन्द्रग्रस्तास्ते" इत्यारभ्य ११७ पृष्ठस्थ 'तच्छोधकवचनाभावादितिदिक्' इत्यन्तोग्रंथो दृश्यते॥

पाकस्य द्वारलोपाल्लोपस्य न्याय्यत्वात्॥ वस्तुतस्तु उदये भोजनस्य विधानादनुदये परिवेषणादेरेव निवृत्तिरुचिता ॥ नत्वारादुपकारकस्य पाकस्यापि सम्भारतुल्यत्वादेव तदनुज्ञाप्राप्तेरिति । सूर्यग्रस्तास्ते तु "नाश्नीयात्पूर्वं याम चतुष्टयम् 'इति वाक्येन ग्रासात्पूर्वं यामचतुष्टयस्य त्याज्यत्वात् 'ग्रस्तावेवास्तमानन्तु रवीन्दू प्राप्नुतो यदि ॥ परेद्युरुदये दृष्ट्वा स्नात्वाऽभ्यवहरेन्नरः" इति माधवीये ऽन्यत्र च भृगुवाक्येन मुक्तिदर्शनोत्तरं स्नात्वा भोजनस्योक्ततया पूर्वं भोजनाभावाच्चाष्टयामिक उपवासः समर्थस्य ॥ बालवृद्धातुरैस्तु "सायान्हे ग्रहणञ्चेत्स्यात् " इति पूर्वलिखितमार्कण्डेयवाक्यात् पञ्चधाविभक्तादिवसस्य च यस्मिन् भागे ग्रहणं स भागस्तस्मात्पूर्वश्च भागस्त्याज्यः ॥ तेन मध्यान्हे सङ्गवे वा भोजनङ्कार्यम् । इममेव न्यायमाश्रित्य मध्यान्हे ततः पूर्वं वा भगवते राजभोगः समर्पणीयः । स च प्रसादो घृतपक्वव्यतिरिक्तो गोभ्यो देयः॥ तथा शिष्टाचारात् ॥- अस्तानन्तरं तु मुक्त्यवधारणोत्तरं (तु) स्वयं स्नात्वा शुद्धं जलमानीय भगवन्तं स्नापयित्वा ततः शुद्धजलेन घृतपक्वां सामग्रीं कृत्वा तां दुग्धादिकं च समर्प्य भगवान् स्वापनीयः॥ संध्यावन्दनादिकं च कार्यम् । यद्यप्यत्र

चन्द्रगूस्तास्तवद्विशेषवचनन्नास्ति तथाप्युशनोवाक्ये इन्दुपदं रवेरप्युपलक्षणं तुल्यन्यायत्वात् ॥ अन्यथा सायंसंध्यादेर्लोपप्रसङ्गाच्च ॥ तेनोभयत्र मुक्तिस्नानं विनापि संध्यादिकं कार्यमिति वचनतात्पर्यम् ॥ केचित्तूदयोत्तरमेव सर्वं कुर्वन्तीति भगवद्भास्करे न्यायसाम्यादरणादेशेव इत्याहुः ॥ मम तु किञ्चिदन्यदपि प्रतिभाति ॥ बालवृद्धातुराणां ग्रहणात्पूर्वमिव ग्रस्तास्तोत्तरम्भोजनव्यवस्थाया अनुक्तत्वात्तदर्थमपि न्यायसाम्यादरणमावश्यकम् । अन्यथा तदनिर्वाहात् । एवं सति न्यायसाम्याद्दता शुद्धिस्तदर्थैव न तु शक्ताशक्तसाधारणा ॥ तेन रात्रौ यद्भगवदर्थं कृतं तद्भ्योभ्यो देयं बालादिभिश्चोपयोक्तव्यम् ॥ तत उदिते सूर्ये स्नात्वा शुद्धीभूय ततः शुद्धजलेन सर्वं पाकादिकं कार्यम् (न तु रात्र्याहृतेन जलेन) तच्छोधकवचनाभावादिति दिक् ॥ प्रस्तुतमनुसरामः ॥

इति फाल्गुनोत्सवाः ॥

चैत्रशुद्धनवम्यां श्रीरामोत्सवः । तदुक्तम् हेमाद्रावगस्त्यसंहितायाम् । “ चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ ॥ उदये गुरुगौरांश्वोः स्वोच्चस्थे

श्रीमद्विठ्ठल दीक्षित (श्रीगुसांईजी) विरचितो रामनवमी निर्णयः

श्रीकृष्णाय नमः ॥ अगस्त्यसंहितायां ॥ चैत्र शुद्धा तु नवमी पुनर्वसुयुता यदि ॥ सैव मध्यान्हयोगेन महापुण्यतमा भवेत् ॥ १ ॥ रामार्चनचन्द्रिकायाम् ॥ विद्धाचेद्दत्तसंयुक्ता व्रतं तत्र कथं भवेत ॥ विद्धानिषेधश्रवणान्नवमी चेति वाक्यतः ॥ २ ॥ अत्र निर्णयमाह ॥ नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ॥ उपोषणं नवम्यां वै दशम्यामेव पारणम् ॥ ३ ॥ ननु व्रतस्य पारणांगत्वबोधक प्रमाणे नैव व्रतविध्यन्यथानुपपत्त्या चैकादशीपूर्वदिनप्राप्तेर्दशम्यामेवेति वचनवैयर्थ्यं स्यादतो नियमविधिरयम् ॥ तेन नवमीसत्वेपि दशमीक्षये विद्धैव कार्येति सिद्धम् ॥ न च निषेधवागनुरोधेन नैवं वाच्यमिति वाच्यम् ॥ दशमीवृद्धिविषयत्वात्तस्या इति चेत् । मैवम् ॥ निषेधानियमवदुक्तानियमविधिरपि वैष्णवमात्रविषयको ऽथवा साधारणजनविषयकः ॥ उपक्रमानुरोधादाद्य एवाभिमतश्चेत्तदा 'उपोषणं नवम्याम्' इतिव्यर्थम् उत्पत्तिवाक्यत्वाभावात् ॥ विद्धानिषेधविधिमारभ्याधीतत्वात् ॥ सामान्यप्राप्तावेव विशेषविधिनिषेधयोः संभवात् ॥ तथा च विद्धानिषेधे सत्युत्तरदिनकर्तव्यत्वे प्राप्ते सति यत्पुनर्नवम्युपोषणविधानं तत्रापि निश्चयवाचकाव्ययकथनेन नियमकथनपूर्वकं तेन दशम्यवृद्धावपि नवमीवृद्धौ तस्यामेवोपोषणं कार्यं नवम्यवृद्धौ तु विद्धैवोपोष्येत्यवसीयते ॥ अन्यथा दशमीपारणनियमविधिनैव नवम्युपोषणस्यापि प्राप्तेः पुनस्तदुक्तिर्व्यर्थी स्यात ॥ यद्यप्येवं पारणविधेर्वैयर्थ्यमायाति तथाप्युपोषण विधेर्मुख्यत्वात्पारणाविधिवाक्यस्या मुख्यत्वेनैकादशीपूर्वदिनपरत्वं कल्प्यते ॥ इति श्रीविठ्ठल, दीक्षितविरचितो रामनवमी निर्णयः ॥

---

१ अयमपि निर्णयः प्रसंगादत्र मुद्रितः—उपयुक्तश्चाग्रे प्रताने । मङ्गलश्लोकस्तु पुस्तके न दृश्यत इति तथैवोद्धृतः ॥

गृहपञ्चके । मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये । आविरासीत्सकलया कौशल्यायां परः पुमान् । तस्मिन्दिने तु कर्तव्यमुपवासव्रतं सदा । केवलापि सदोपोष्या नवमी शब्दसंग्रहात्" इति । अन्यच्च तत्रैव । "चैत्रशुक्ला तु नवमी पुनर्वसुयुता यदि । सैव मध्यान्हयोगेन महापुण्यतमा भवेत्" इति । अत्र सैवेति विशिष्टपरामर्शान्मध्यान्हे पुनर्वसुयोगे महापुण्यतमत्वम् । मध्यान्हादन्यत्र योगे पुण्यतमत्वम् । अयोगे (तु) पुण्यत्वमात्रमिति दिनकरोद्द्योतः । अत्र "अह्नो मध्ये वामनो समरामौ" इति पुराणसमुच्चयात् कर्कलग्नोक्तेश्च मध्यान्हः प्रादुर्भावकाल इति स एव च पूजाकाल इति तद्व्यापिनी तिथिः सर्वैः कार्येति बहवः । तत्वं तु वैष्णवभिन्नैरेवैवङ्कार्या ॥ वैष्णवैस्तु पारणदिवसे दशमीलाभे विद्धा त्याज्यैवेति । "नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः । उपोषणं नवम्यां वै दशम्यामेव पारणम्" इति माधवधृतवचनात् । क्वचित्तु "दशम्याम्पारणम्भवेत्" इति पाठः । नचेदं दिनद्वये मध्यान्हव्याप्त्यव्याप्तिसमैकदेशव्याप्तिविषयमिति वाच्यम् । तादृशस्थले द्वितीयदिने दशम्या अनुक्तसिद्धत्वेन पारणविधिवैयर्थ्यापातात् ।

एतेनैव च दिनद्वये मध्यान्हे पुनर्वसुयोगायोगप-रत्वं वदन्प्रतापमार्त्तण्डोऽपि प्रत्युक्तो ज्ञेयः ॥ एकादश्यां जलेन पारणमप्येतेनैव दत्तोत्तरं-ज्ञेयम् । यत्तु ॥ " दशम्यादिषु वृद्धिश्चेद्विद्धात्याज्यैव वैष्णवैः ॥ तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितम् " इति रामार्चनचन्द्रिकायामगस्त्यसंहितावचनमुक्तम् ॥ हेमाद्रिमाधवाभ्यामलिखनात्तन्निर्मूलमिति दिनकरोद्-द्योतः ॥ तत्वन्तु " नवमीचाष्टमीविद्धा " इति वाक्ये निषेधविधिवन्नवम्युपोषणविधिरप्युपक्रमानुरोधाद्वैष्ण-वमात्रविषयक इति दशमीसाम्येऽपि नवमीवृद्धौ दश-मीक्षयेऽपि नवमीवृद्धौ नवम्यामुपोषणप्राप्त्या विद्धा-त्याग एवाशयगोचर इति ॥ वचनञ्च सर्वसम्मतमिति तेन चारितार्थ्यादेव दशमीवृद्धिवचनमनुवादकमिति । तदेतत्सर्वं हृदिकृत्य श्रीमत्प्रभुचरणैरुक्तम् । तथा च विद्धानिषेधे सत्युत्तरदिनकर्त्तव्यत्वे प्राप्ते यत्पुनर्नवम्यु-पोषणविधानं तत्रापि निश्चयवाचकाव्ययकथनेन नियमपूर्वकन्तेन दशम्यवृद्धावपि नवमीवृद्धौ तस्यामे-वोपोषणङ्कार्यम् । नवम्या वृद्धौ तु विद्धैवोपोष्येत्यव-सीयते । अन्यथा दशमीपारणनियमाविधिनैव नवम्यु-पोषणस्यापि प्राप्तेः पुनस्तदुक्तिर्व्यर्था स्यात् ॥

यद्यप्येवम्पारणाविधेर्वैयर्थ्यमायाति । तथाप्युपोषणविधेर्मुख्यत्वात्पारणाविधिवाक्यस्याऽमुख्यत्वेनैकादशीपूर्वदिनपरत्वङ्कल्प्यत इति । अत्रैकादशीपदन्तिथिपरं न तु व्रतपरम् । व्याख्येयवाक्ये दशम्याम्पारणाविधानात् । * अत्र यद्यपि " नवमी चाष्टमीविद्धा " इति वाक्ये भगवद्भक्तानां विद्धात्यागमादायैव सर्वैर्निर्णयः क्रियते । वेधस्वरूपन्तु न पृथक् विचार्यते । तथा सति " त्रिभिर्मुहूर्त्तैर्विध्यन्ति " इति सामान्यवाक्यात्त्रिमुहूर्त्तवेध एव आयाति कथञ्चित्तदनुकल्पो द्विमुहूर्त्तवेधो वा । तेन अष्टम्यास्त्रिमुहूर्त्तत्वस्य द्विमुहूर्त्तत्वस्य वाऽभावे नवम्या विद्धत्वं न भवतीति तादृशस्थले पूर्वैवोपोष्येत्यायाति ॥ तथापि सांप्रदायिका एतादृशस्थले द्वितीयामेवाद्रियन्ते ॥ तत्र तेषामयमाशयः ॥ विद्धात्यागे बीजन्तावत् भगवत्प्रादुर्भावदिनेऽष्टम्यभाव एव ॥ अन्यथा वामनद्वादश्यामेकादशीवेधस्येवात्राष्टमीवेधस्यापि दूषकता न स्यात् । तथा सति स्वल्पस्यापि

* अत्र केषुचित्पुस्तकेषु " तेनायं निष्कर्षः । विद्धाक्षये विद्धा गत्यन्तराभावात् । पारणार्थं दशम्यलाभे पूर्वा । दशम्यां पारणस्यावश्यकत्वात् । अन्यदा तु परैवेति दिक् " ॥ इत्यन्त एव श्रीरामनवमीनिर्णयो दृश्यते । नतु " अत्र यद्यपि " इत्यादि १२४ पृष्ठस्थ " स्मृतर्नैवल्यादिति ' इत्यन्तो ग्रन्थो दृश्यते ॥

संसर्गस्य दूषकत्वं निर्बाधम् ॥ अतो जन्माष्टम्यामिवात्र कलाकाष्ठादिवेधत्यागवचनाभावेपि संसर्गमात्रात् त्यागो युज्यते ॥ न्यायसाम्यात् । "युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ॥ रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता" इत्यस्य विशेषवाक्येन वर्षवृद्धौ सूर्योदयव्याप्तेरेवोक्ततया ऽवतारसामयिकव्यवहारस्य तदैव प्राप्तेस्तन्न्यायेनापि उदयव्यापिन्या एव ग्राह्यत्वस्य युक्तत्वाच्च । एतेनैव "वसुरन्ध्रयोः" इति युग्मवाक्यमपि दत्तोत्तरम् । विद्धानिषेधस्य प्रातिस्विकत्वाच्च । न च जन्मसमये तिथ्यभावे पूजाकालाव्याप्त्या द्वितीयग्रहणस्य दुष्टत्वं शङ्क्यम् । विद्धात्यागेनैव तस्य निरासात् । एवं चौदयिकग्रहणबोधकानां सर्वेषां सामान्यवाक्यानामप्यानुगुण्याच्चेति । नचैवं न्यायप्राप्तग्रहणे सति जन्माष्टम्यामपि विद्धाक्षये विद्धाकरणस्य प्राप्तेस्तदनुकल्पत्वेन शुद्धनवमीग्रहणमयुक्तं स्यादिति वाच्यम् । कल्पनीयन्यायापेक्षया एकादश्यतिदेशवाक्यस्य बलिष्ठत्वात् । एवमत्रापि दशमीपारणवाक्यस्य बलिष्ठत्वात् यादृशविद्धाधिकास्थले ऽग्रेपारणादिनं न लभ्यते तादृशविद्धाधिकास्थले एव वर्षवृद्धिन्यायबाधो नान्यत्रेत्येतादृशस्थले द्वितीयदिनस्य न्यायप्राप्तत्वात्पू-

र्वदिने नवम्या विद्धात्वाभावेपि विद्धात्यागबीजविचारेण पूर्वां विहाय द्वितीयदिने व्रतकरणमुपपन्नम् । माधवेनैतादृशस्थले गौरीतृतीयायां द्वितीयप्रापकाभावेऽपि केवलशिष्टाचारस्यैव शरणीकरणाच्च ॥ एतावान् परं विशेषो गौरीतृतीयायाः पूर्वविद्धात्वे द्वितीयदिने कर्मकाले रहिताया ग्रहणम् । अत्र तु पूर्वविद्धात्वाभावेऽपि विद्धात्यागबीजविचाराद्दर्षवृद्धिन्यायाच्चेति । तेनायं निष्कर्षः । विद्धाक्षये विद्धा गत्यन्तराभावात् । पारणार्थं दशम्यलाभेऽपि विद्धा ॥ दशम्यां पारणविधानबलात् । अन्यथैकादश्यामद्भिः पारणेनापि व्रतसमाप्तिसंभवे पारणविधानस्य वैयर्थ्यस्यापरिहार्यत्वात् । अन्यदा तु परैवेति दिक् ॥ अयमेव न्यायो नृसिंहचतुर्दशी स्थले द्रष्टव्यः ॥ माध्वास्तु ॥ " सर्वासां तु जयन्तीनां श्रेष्ठा कृष्णाष्टमी मता ॥ यस्मात्सान्निहिताऽत्यन्तं तत्रैवोपवसेन्नरः । सर्वास्वपि जयन्तीषु पूजा कार्या विशेषतः ॥ सान्निध्य एव कर्त्तव्य उपवासो न दूरगः " इति स्मृत्यर्थ सागराख्ये स्वानिबन्धे भरद्वाजसंहितावचनात् । " चैत्रे मासि नवम्यां तु प्रादुर्भावो हरेर्यदा ॥ रामपूजां नरः कुर्याद्ब्राह्मणैः सहभोजनम् । तथैव नारसिंहस्य मत्स्यकूर्म्मादि-

कस्य च ॥ अवतारदिने सम्यक् ब्राह्मणैः सह भोजनम्। कृते तु नारसिंहं तु त्रेतायां राममेवच ॥ द्वापरे वामनं प्रोक्तं कलौ कृष्णाष्टमी स्मृता " इति गारुडात्। " कृष्णजन्माष्टमीं त्यक्त्वा ये ऽन्यं व्रतमुपासते ॥ नाऽऽप्नुवन्ति फलं किंचिदिष्टापूर्त्तमथापि वा।कृष्णाष्टमीं विना नैव जयन्ती क्वापि वैष्णवैः ॥ कर्त्तव्या यदि कुर्वीत तामसं तदुपोषणम् " इति स्कान्दाच्चेत्याहुः। तन्नाऽस्माकं संमतम् ॥ श्रीरामस्य पुरुषोत्तमत्वेन विमृष्टत्वात्। अनुपोषणे शिष्टाचारविरोधात्। कलौ तत्प्राबल्यस्य व्यवस्थापितत्वेन तदपेक्षया स्मृतेर्नैर्बल्यादिति। * अथेदं विचार्यते ॥ चैत्रीयदोलादमनोत्सवौ कुतो न क्रियेते इति। तत्रोत्तरम् ॥ सर्वदेवतासाधारणत्वादिति। तदुक्तं व्रतदिनकरोद्द्योते वायवीये ॥ "संवत्सरकृतार्चायाःसाफल्यायाऽखिलान् सुरान् ॥ दमनेनाऽर्चयेच्चैत्र्यां विशेषेण सदाशिवम् " इति। हेमाद्रौ व्रतदिनकरोद्द्योते च। भविष्योत्तरे ब्राह्मे च " धर्मराज निबोधेह दमनादिमहोत्सवम्" इत्युपक्रम्य कयाचिद्विद्याधर्या कृतां दोलां वीक्ष्योमया प्रार्थने शिवेन दोलाकर-

---

* १२१ पृष्ठस्थ " अत्र यद्यपि " इत्यादि " स्मृतेर्नैर्बल्यादिति " एतदन्तो ऽयं ग्रन्थः केषुचित् पुस्तकेषु नास्ति ॥

णं शिवयोस्तदारोहणं शक्रं प्रति प्रतिवत्सरं शिवदोलामहोत्सवाज्ञापनं चोक्त्वा " प्राप्ते वसन्तसमये सुरसत्तमानामान्दोलनं सुरवरा ननु कुर्वते ये। ते प्राप्नुवन्ति भुवि जन्मतपःफलानि " इत्याद्युक्तम् । तेन " ऊर्जे व्रतं मधौ दोलां श्रावणे तन्तुपूजनम् ॥ चैत्रे दमनकारोपमकुर्वाणो व्रजत्यधः " इत्यपि तु सर्वदेवपूजकपरं ज्ञेयम् । तेन केवलवैष्णवानां न तदकरणे दोषः ॥ नन्वेवं सति तन्तुपूजने किमत्याग्रह इति चेत् भक्तिरत्नप्रदायकत्वेनोक्तत्वादिति वदामः ॥ यद्वा ॥ मधुपदं वसन्तपरमिति तत्र दोला तु पूर्वमुक्तैव । मीनार्केऽपि वसन्तत्वस्य ज्योतिर्निबन्धे सिद्धान्तशिरोमणावभिमतत्वात् । अत एत पुनश्चैत्रोक्तिर्युज्यते । दमनकानारोपस्तु तदभावात् ॥ उत्तमदमनकस्योत्कलदेश एवोपलम्भात् ॥ सार्वदेशिकस्तूग्रगन्धो मरुबक एवेति न दोषलेश इति दिक् ॥ इति चैत्रोत्सवाः ॥

वैशाखकृष्णैकादश्यां श्रीमदाचार्यचरणोत्सवः ॥ स च स्वामिन्युत्सववदौदयिक्यां कार्यः । विद्धाक्षये तु विद्धायामेव । * शुद्धाधिकायां तु पूर्वस्यामेव ॥ शिष्टाचारादिति । एतदादय उत्सवाश्चैतन्मार्गीयाणामावश्यका एव ॥ " आचार्यं मां विजानीयान्नाव मन्येत कर्हिचित् । न मर्त्त्यबुध्या सेवेत सर्वदेवमयो गुरुः " इत्येकादशस्कन्धे भगवद्वाक्यात् ॥ " गुरोर्यत्र परीवादो निन्दा यत्र प्रवर्त्तते ॥ कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः । ब्रह्मैवाचार्यरूपेण स्वरूपेणावतिष्ठते " इति शङ्कराचार्यकृतभारतीयसहस्रनामटीकायां व्यासोक्तेश्च । " यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इति श्रुतेश्च ॥ ये ऽपि यन्मतानुवर्त्तिनः स्वाचार्योत्सवादिकं न कुर्वते तेऽश्रद्धालवो वा एतद्वचनापर्यालोचका वेति ध्येयम् ॥

---

* अत्रैकस्मिन्पुस्तके " अत्रैकादश्यां अरुणोदयवेधत्वात् तादृशविद्धाधिकायां उत्तरस्याः अप्येकादश्यास्तिथिमलत्वाभावेन कर्मण्यत्वात उत्तरस्यामेवोत्सवः कार्यः । न तु पूर्वस्यामिति ज्ञेयम् । यतः एकादश्यास्तिथेः अरुणोदयारम्भः । ' प्रतिपत्प्रभृतयः सर्वा उदयादुदयाद्रवेः । सम्पूर्णा इति विख्याता हरिवासरवर्जिताः, इति स्कान्दात् ,, एतावान् ग्रन्थः आधिको दृश्यते ॥

वैशाखशुक्लतृतीयायां चन्दनयात्रोत्सवः ॥ तदुक्तं स्कान्दे पुरुषोत्तममाहात्म्ये ॥ " वैशाखशुक्लपक्षे तु तृतीया ऽक्षयसंज्ञिता ॥ तत्र मां लेपयद्गन्धलेपनैरतिशोभनैः" इति। ÷ ब्रह्मपुराणे च पञ्चतीर्थीमाहात्म्ये ॥ यः पश्यति तृतीयायां कृष्णं चन्दनरूषितम् ॥ वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम्" इति। ÷ अत्रैतदारभ्य यावदुष्णकालं व्यजनादिकमर्पणीयम् ॥ " व्यजनैश्चामरैश्छत्रैर्वन्यैर्नानोपहारकैः ॥ संतोषयन् जगन्नाथं तृतीयादौ विलेपयेत्" इति तत्रैवोक्तेः ॥ अत्र विशेषतः कालानुक्तेः पञ्चमुहूर्त्तात्मकं प्रातरेव पूजाकालः स च वसन्तपञ्चम्यां विवेचित इति ततोऽवधेयः। अत्र तिथिद्वैधे दिनद्वये तदेकदेशव्याप्तौ परैव कार्या ॥ युग्मवाक्ययोर्विरोधेऽपि " रंभाख्यां वर्जयित्वैकां तृतीयां द्विजसत्तम ॥ तृतीया सर्वकार्येषु गणयुक्ता प्रशस्यते" इति ब्रह्मवैवर्त्तेन " कला काष्ठाऽपि वा यत्र द्वितीया संप्रदृश्यते। सा तृतीया न कर्त्तव्या कर्त्तव्या गणसंयुता" इति स्कान्देन च व्यवस्थापनात्। विद्धाक्षये तु विद्धैव कार्या। गत्यन्तराभावादिति।

÷ ÷ एतच्चिन्हमध्यस्थः पाठः क्वचित्पुस्तकेषु नास्ति ॥

वैशाखशुक्लचतुर्दश्यां श्रीनृसिंहोत्सवः। तदुक्तं नृसिंहपुराणे स्कान्दे च॥ "वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे। मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनम्॥ वर्षे वर्षे तु कर्त्तव्यं मम संतुष्टिकारणम्" इति। "वैशाखस्य चतुर्दश्यां सोमवारेऽनिलर्क्षके॥ अवतारो नृसिंहस्य प्रदोषसमये द्विजाः" इति॥ अत्र प्रदोषादिशब्दाः पारिभाषिकमपि कालं यद्यपि विषयीकर्त्तुं शक्नुवते तथापि हिरण्यकशिपुवरानुरोधात्सायं सन्ध्यापरा एव ज्ञेयाः। साऽपि मुख्यैव ग्राह्या। उक्तयुक्तेरेव। तत्स्वरूपं च वराहेणोक्तम्। "अर्द्धास्तमयात्सन्ध्या व्यक्तीभूता न तारका यावत् तेजःपरिहानिवशात्" इति। तस्मात्तादृशी सन्ध्या वा। "प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते" इति प्राचोक्तः प्रदोषो वा प्रादुर्भावकाल इति दिनकरोद्द्योतः॥ अन्ये तु प्रदोषं कालमुक्त्वा गच्छन्ति न तु निर्णयं तस्य कुर्वन्ति। द्वैतनिर्णयकारस्तु। "वैशाखशुक्लपक्षस्य चतुर्दश्यां विवस्वति॥ अस्तंगामिनि सर्वेषां पुरस्तम्भस्य मध्यतः॥ प्रबभूव महाविष्णुर्नरसिंहाकृतिर्नृप॥ इत्यादिनृसिंहपुराणवचनम्॥ सायंकाले प्रादुर्भावबोधकं भविष्यवचनं प्रदोषबोधकं स्कान्दं चोक्त्वा नृसिंहपुराणे घटिकानुक्तेः

स्कान्देन निर्णय इति चोक्त्वा तत्रत्यप्रदोषपदार्थं सायंपदेन निर्णिनाय ॥ सायं च "नक्षत्रस्पर्शनात्सन्ध्या सायं तत्परतः स्थितम्" इति लक्षितवान् । ततस्त्रि-घटिकात्मकं सूर्यास्तोत्तरं कालं जन्मकालत्वेनाङ्गीचका-र॥ युक्तं तु विवस्वदस्तसामीप्यमारभ्याऽऽसन्ध्यमित्येव। हिरण्यकशिपुहननात्पूर्वमेव प्रादुर्भावकालत्वस्यो चित-त्वादिति ॥ अत्र च तिथिद्वैधे सर्वैः प्रदोषव्याप्तित्वेनैव सर्वेषां निर्णयः क्रियते । युक्तं तु अविद्धात्वेन वैष्णवानां इतरेषां प्रदोषव्याप्तित्वेनेति । " अनङ्गेन समायुक्ता न सोपोष्या चतुर्दशी । पूर्णायुक्तां तु कुर्वीत नरसिंहस्य तुष्टये । यः करोति नरो मोहात्कामाविद्धां चतुर्दशीम् ॥ धनापत्यैर्वियुज्येत तस्मात्तां परिवर्जयेत् ॥ इति गोविन्दार्णवे समयमयूखे च ब्राह्मात् ॥ "केवलं च प्रकर्त्तव्यं मद्दिनं फलकाङ्क्षिभिः ॥ वैष्णवैस्तु न कर्त्तव्या स्मरविद्धा चतुर्दशी" ॥ इति नारसिंहाच्च ॥ एतदुत्तरार्द्धं बहवो न लिखन्ति ॥ तथा सति सर्वेषा-मेवाविद्धात्वेन निर्णय उचितः प्रतिभाति । विशेषशा-स्त्रत्वात् । न च विद्धानिषेधवाक्यं दिनद्वये प्रदोष व्याप्त्यऽव्याप्तिसमैकदेशव्याप्तिविषयमिति वाच्यम् ॥ जन्मकालस्य पूर्वमुपपादितत्वेन तादृशकाले ऽनङ्गसं-

बन्धस्य स्वल्पतया द्वित्रमुहूर्त्तात्मकताभावाद्वेधस्वरूपाभावेन वाक्यवैयर्थ्यापातात् । न च प्रादुर्भावकालस्य त्रिमुहूर्त्ताद्यात्मकत्वं वक्तुं शक्यम् । दूषितचरत्वात् । नापि वेधस्य कलाकाष्ठाद्यात्मकत्वम् । तादृग्वचनाभावात् । अतो युग्मवाक्यानुगुण्यात् " शुक्ला चतुर्दशी ग्राह्या परविद्धा सदा व्रते ,, इति व्यासव्याक्याच्च प्रातःकामवेधरहितैवादरणीया क्षयाभावे ॥ क्षये त्वगत्या विद्धैव ॥ जन्माष्टमीरितिस्त्वत्रानुसर्त्तुमशक्यैव ॥ श्रीमदाचार्यैस्तत्र नवम्यामुत्सवाधिकरणत्वस्य दार्शितत्वात् ॥ पौर्णमास्यां च तज्ज्ञापकाभावे + न मुख्यतर्कानुगृहीतत्त्वात् । मुख्यत्वं चोत्सवान्ते पारणविधानेन व्रतस्य तदङ्गत्वबोधना + दिति दिक् ॥ इदं च व्रतं प्रायिकत्वेन प्रभूणामभिमतम् । 'चेत्' इत्युक्तेः ॥ + तत्र बीजं तु माध्वलिखितानि वचांसि ॥ तानि तु रामनवमीस्थल एवोदाहृतानि । + तदाशयश्च सर्वनिर्णयप्रकाशे विवेच्यः ॥

इति वैशाखोत्सवाः ॥

+ + एतच्चिन्हगतः पाठः केषुचित्पुस्तकेषु नास्ति ॥

ज्येष्ठशुक्लपूर्णिमायां तत्समीपे वा ज्येष्ठायां ज्येष्ठाभिषेकोत्सवः ॥ तदुक्तं ब्राह्मे "ज्येष्ठे मासि च संप्राप्ते नक्षत्रे चेन्द्रदैवते ॥ पौर्णमास्यान्तदा स्नानं सर्वकालं हरेर्द्विजाः" इति ॥ तथा "स्वर्णघर्मानुवाकेन स्नापयेत्पुरुषोत्तमम्" इति ॥ "पौर्णमास्यां सूक्ततन्त्रैः स्नापयेद्विधिवद्विभुम्" इति च ॥ अत्र च पौर्णमास्यामिति सामीप्यसप्तमी । तेन दोलोत्सववदेवैतद्व्यवस्था ज्ञेया ॥ तिथिनक्षत्रयोगश्चेत्प्रशस्ततरत्वं ज्ञेयम् ॥ "ज्यैष्ठ्यां ज्येष्ठर्क्षयुक्तायां यः पश्येत्पुरुषोत्तमम् । कुलैकविंशमुद्धृत्य विष्णुलोकं स गच्छति" इति ब्राह्मात् ॥ यत्तु स्कान्दे इन्द्रद्युम्नं प्रति भगवद्वाक्यम् ॥ "ज्यैष्ठ्यामहं चावतीर्णस्तत्पुण्यं जन्मवासरम् । तस्यां मे स्नपनं कार्यं महास्नानविधानतः ॥ प्रत्यर्चायां महाराज साधिवासं समृद्धिमत्" इति ॥ तत्तु तत्क्षेत्रस्थस्वस्वरूपपरमेवेति प्रतिभाति ॥ "न्यग्रोधादुत्तरे कूपः सर्वतीर्थमयोऽस्ति वै । स्नानाय पूर्वं निर्माय किंचिदाच्छादितो भुवा ॥ अवतीर्णस्त्वहं पश्चात्तं विविच्य प्रकाशय । संस्कार्यः स चतुर्दश्यां बलिं दत्वा विधानतः" इति कूपाविवेचनलिङ्गात् । एतेनैव-"ऋक्षाभावे पूर्णमास्यां

यो विधिः स तथैव च ॥ कार्यः प्रसादनार्थं हि देवस्य पुरुषोत्तमे" इति ब्राह्मम् ॥ "पौर्णमास्यां प्रकुर्वीत स्नानं श्रीपुरुषोत्तमे ॥ यदा ऋक्षं न लभ्येत तदा ग्राह्या तु पूर्णिमा" इति स्कान्दं च व्याख्यातं ज्ञेयम् । क्षेत्रनिर्देशादिति । यदि च नेदमभ्युपेयते तदा नक्षत्रं तिथिश्चोभयमपि कालोऽस्तु ॥ व्यवस्था तु शिष्टाचारानुसारात् । कलौ तस्य बलीयस्त्वात् । तदुपपादितं प्राक् ॥ * स्नानावशिष्टं जलं च सर्वाङ्गेष्वभ्युक्षणीयम् । "स्नानशेषेण कृष्णस्य तोयेनात्माभिषिच्य वै । वन्ध्या मृतप्रजा या वै दुर्भगा ग्रहपीडिताः । राक्षसाद्यैर्गृहीता वा तथा रोगैः ससंयुताः । सद्यः स्ताः स्नानशेषेण उदकेनाभिषेचिताः । प्राप्नुवन्तीप्सितान् कामान् कामं वाञ्छन्ति चेप्सितम् । पुत्रार्थी लभते पुत्रान् सौभाग्यं च सुखार्थिनी । रोगार्त्ता मुच्यते रोगाद्धनं च धनकाङ्क्षिणी । पुण्यानि यानि तोयानि तिष्ठन्ति धरणीतले । तानि स्नानावशेषस्य कलां नार्हन्ति षोडशीम् । तस्मात्स्नानावशेषं यत्कृष्णस्य सलिलं द्विजाः । अभ्युक्षेत्सर्वगात्राणि सर्वकामप्रदं हि तत् इति ब्राह्मात् * ॥ इति ज्येष्ठोत्सवः ॥

* * एतचिन्हान्तर्गतः पाठः केषुचित्पुस्तकेषु नास्ति ॥

अथाषाढे रथोत्सवः। तदुक्तं स्कान्दे " गुण्डिचाख्यां महायात्रां प्रकुर्वीथाः क्षितीश्वर ॥ यस्याः संकीर्त्तनादेव नरः पापाद्विमुच्यते ॥ माघमासस्य पञ्चम्यामष्टम्यां चैत्रशुक्लके ॥ एते कालाः प्रशस्ता हि गुण्डिचाख्यमहोत्सवे ॥ विशेषान्मोक्षदाऽऽषाढद्वितीया पुष्यसंयुता ॥ ऋक्षाभावे तिथौ कार्या सदा सा प्रीतये मम ॥ आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता। तस्यां रथे समारोप्य रामं मां भद्रया सह। महोत्सवं प्रवर्त्याथ प्रीणयेत द्विजान् बहून् ॥ गुण्डिचामण्डपं नाम यत्राऽहमजनं पुरा" इत्यादिना च मण्डपप्रशंसामुक्त्वा " दिनानि नव यास्यामि यथा तस्माद्दिहाऽऽगतः" इत्यादिना। तेन रथारोहणं गुण्डिचामण्डपगमनार्थं तत्यात्राङ्गभूतं च॥ शिष्टास्तु केवलमपि प्राधान्येन कुर्वन्ति। तत्र बहूनां कालानामुक्तत्वान्नक्षत्रप्राधान्यस्योपपादितत्वाच्च ज्येष्ठाभिषेकवदेव निर्णय इत्यलं विस्तरेण ॥ अत्र शुक्लैकादश्यां द्वादश्यां च शयनोत्सव उक्तः॥ स च संप्रदायाभावान्न क्रियत इति न विविच्यते। कश्चिच्छ्रद्धयाऽऽचरति चेन्निर्मले करोतु एकादशीं च प्रबोधिनीवद् गृण्हात्विति दिक्॥ इत्याषाढोत्सवः॥

॥ अथ श्रावणशुक्लैकादश्यां पवित्रारोपणोत्सवः ॥

स च हेमाद्रौ विष्णुरहस्ये उक्तः ॥ "श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे॥ द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतम्। द्वादश्यां श्रवणे वाऽपि पञ्चम्यामथ वा द्विज ॥ आनुकूल्येषु कर्त्तव्यं पञ्चदश्यामथापि वा ॥ मुख्यालाभे हि सर्वत्र यावन्नोत्तिष्ठते हरिः ,, इति। सर्वत्रेति सर्वमासेष्वित्यर्थः। अत्र " कर्कटस्थे दिवाकरे ,, इति मलमाससंग्राहकम्। परं शिष्टा नाद्रियन्ते। अन्यगति सद्भावात्। न च काचिच्छङ्कापि। एकदेशविकृतत्वादिति॥ अत्र प्रथमो द्वादशीशब्दः +'सूतके मृतके वापि न त्याज्यं द्वादशीव्रतम्' इत्यत्रेव समुदायशक्त्या + एकादशी परः अन्यथा पुनस्तदुक्तिवैयर्थ्यापातात ॥ न च लक्षणापत्तिः "पक्षे पक्षे नृपश्रेष्ठ विधिवत् द्वादशीव्रतम्। दशमीवेधराहितं कुरुषे जागरान्वितम्। चक्षुर्हीनो यथा देहः पतिहीना यथाङ्गना। द्वादशी दशमीविद्धा तथा राष्ट्रमवैष्णवम् ,, इत्यादिभिर्हरिवल्लभसुधादयस्थपाद्मवचनैः " दशम्यनुगता हन्ति द्वादशी द्वादशीफलम् ,, इति निर्णयसिन्धुस्थकौर्मेण तथा-

---

+ + एतच्चिन्हस्थं क्वचिन्न।

विधेर्वाराहवचनेश्चैकादशीपर्यायत्वनिश्चयात्॥ *फलानुपलम्भेन विप्रतिपन्नत्वेन च लक्षणां वक्तुमशक्यत्वाच्च। अस्तु वा लक्षणा। तथापि नास्माकं हानिः। तथाप्येकादशीपरत्वप्राप्तेः* न च पाद्मोन्मीलिनीद्वादशीप्रकरणस्थत्वान्नेदं साम्प्रतमिति वाच्यम्। लिङ्गेन प्रकरणबाधस्य शाक्यवचनत्वात्। किञ्च। "सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ उन्मीलिनीति सा प्रोक्ता" इतिलक्षणकायां तस्यां दशमीवेधसम्भावनाराहित्येन अरुणोदयादिवेधादरणे चैकादशीवाचकत्वस्यैव पर्यवसानेन न कोपि शङ्कालेश इति॥ न चैवमतिप्रसङ्ग इति वाच्यम्। लिङ्गपुनरुक्त्यादिसत्त्व एव तथाङ्गीकारात्॥ तथापि द्वितीयद्वादशीशब्दस्याऽनुवादकत्वं साम्प्रतम्। प्रमाणाभावात्। + यत्तु द्वितीयद्वादशीपदे श्रवणसम-

---

* एतच्चिन्हगं क्वचिन्न॥

अत्र किंचिद्भेदेन पाठद्वयं दृश्यते यत्वित्यादिमासत्यागापत्तिश्चेत्यन्तो ग्रन्थश्च न दृश्यते॥

"विधेयान्तराभावे केवलस्य विध्यनुवादस्य क्वाप्यदर्शनात्। निषेधस्थलेऽपि देवताविग्रहवादिमतेऽनुवादानङ्गीकारात्। जैमिन्यपेक्षया व्यासस्योभयथाऽपि गुरुत्वात्। आचार्यचरणैरपि तथाङ्गीकारात्। अहिलतयाऽङ्गीकारेऽप्यनुवादलक्षणस्याप्रामाण्यस्यापत्तेश्च" इति। "तस्यादर्शनात्। न चान्तरिक्षे न दिवीत्यादिवन्नित्यानुवादरूपत्वम्। देवताविग्रहवादादरणेन तत्रापि तदनङ्गीकारात्। अत एवाचार्यचरणैरपि व्यासाविरोधेनैव जैमिनेः प्रामाण्यमङ्गीकृतमतो न कोपि शङ्कालेशः अनुवादलक्षणस्याप्रामाण्यस्यापत्तेश्च" इति।

भिन्याहारात्तस्य श्रवणद्वादशीपरत्वं तस्याश्च मुख्यत रत्वमित्यङ्गीकृत्य प्रथमस्य तस्य द्वादशीपरत्वं तस्याश्च प्रथमोद्दिष्टत्वान्मुख्यतमत्वमिति कश्चिदाह । तदप्यवि-चारचारु। "सैव मध्यान्हयोगेन महापुण्यतमा भवेत् " इत्यादि वन्मुख्यतमादिपदाभावेनात्र तादृक्कल्पनायां मानाभावात्। प्रथमद्वादश्यतिरिक्तेषु मासत्यागापत्तेश्च। अनुवादलक्षणस्याप्रामाण्यापत्तेश्च"॥ विधेयान्तराभावे केवलस्य विध्यनुवादस्य क्वाप्यदर्शनान्निषेधस्थलेऽपि देवताविग्रहवादिमते ऽनुवादानङ्गीकाराज्जैमिन्यपेक्षया व्यासस्योभयथापि गुरुत्वात् । आचार्यचरणैरपि तथा-ङ्गीकारात् । तस्मादेकादशी मुख्यः कालः । तदलाभे च द्वादश्यादय इत्येव युक्तम् । * "एवंच श्रवणपर्यन्तं यथासम्भवं माससंग्रहः। अतो"* ये चैवं नाद्रियन्ते ते बोधविधुरा एवेति दिक् । आनुकूल्यं चात्र दशमीवे-धराहित्यरूपं ज्ञेयम् । यद्यपि तदुपवास एवावश्यकः । तथापि विष्णुधर्मोत्तरे नारदेन वेधदोषकारणे पृष्टे भगवता " दशम्यामसुरा जाता एकादश्यां सुरास्त-था॥ यत्तु जन्मदिनं येषां तत्तेषामेव वर्द्धनम् "इत्यादिना वेधत्याज्यता बीजमुक्तम् । तस्मात्पुण्यकार्यान्तरेऽपि

---

* * एतच्चिन्हगं क्वचिन्न ॥

तुल्यमिति प्रकृतेऽपि तद्विवक्षितमेव। अन्यथा आनुकूल्येष्विति न शिष्यात्। हरिवासरत्वेन भगवदानुकूल्यं त्वत्रैव पर्यवस्यति। फलानुकूल्यमप्यत्रैवेति न कोपि शङ्कालेशः। एतेनैव भद्रारादित्यमपि संगृहीतं ज्ञेयम्। एवं द्वादश्यादिष्वप्यूह्यम्। पवित्रारोपणं नित्यं काम्यं च॥ तदुक्तं दिनकरोद्द्योते हेमाद्रौ ब्राह्मे। "ब्राह्मणः क्षत्रियो वैश्यस्तथा स्त्रीशूद्र एव च॥ स्वधर्मनिरताः सर्वे भक्त्या कुर्युः पवित्रकम्। न करोति विधानेन पवित्रारोपणं तु यः। तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम॥ तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः। वर्षे वर्षे प्रकर्त्तव्यं पवित्रारोपणं हरेः" इति। तथा "पवित्रारोपणं विष्णोर्भक्तिरत्नप्रदायकम्। स्त्रीपुंकीर्तिप्रदं पुण्यं सुखसंपद्धनावहम्" इति। तत्प्रकारश्च रामार्चनचन्द्रिकायां* प्रयोगसारोक्तः। "पवित्रो नाम नागो वासुक्यवरजः दिव्यशतवर्षतपसा शिवं तोषयित्वा कण्ठाभरणतां वव्रे॥ तदा शिवस्तथेत्युक्त्वा कण्ठे धारयन् वरान्तरं ददौ "ये त्वां न बहुमन्यन्ते यथा संभावितो मया। जपहोमादिजं

---

* एतच्चिन्हमध्यस्थः- "प्रयोगसारोक्त इत्यारभ्य १२८ पृष्ठस्थ "तथा" इत्यन्तो ग्रन्थः केषु चित्पुस्तकेषु नास्ति॥

तेषां फलं त्वामेतु निश्चयात् ॥ अत्रैव श्रावणे मासि नक्षत्रे चापि वैष्णवे । तस्मादाराधयन्तु त्वां नित्यनैमित्तकोद्यताः । वैदिकाः सक्तुहोमेन प्रज्ञां कुर्वन्तु तेऽनघ ॥ त्वत्सादृश्यानुकारेण निर्वीतेनैव तान्त्रिकाः । आराध्यारोप्य पूज्यायै देवतायै पवित्रकम् ” इति पवित्रोत्पत्तिमुक्त्वा तत आगमोक्तप्रकारेण सूत्रशुद्ध्यादिरूपां कर्त्तव्यतामुक्त्वा बहुभिर्वचनैरुक्तः । स तान्त्रिकाणामेवावश्यको न तु केवलभक्तानाम् । अतो यावदावश्यकं तावदेव संगृह्यते। तत्र भावस्य गुणक्षोभेण नवविधत्वात्त्रिसूत्रत्रिवृत्करणं तत्र सांवत्सरपूजासाङ्गत्वाय क्रियमाणत्वात्सूत्रसंख्या नागाकारत्वाय ग्रन्थयः देवसांनिध्यायाधिवासनं चेत्यावश्यकम् । तत्र “ हैमरौप्यैस्ताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः ॥ कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्त्तितैः शुभैः॥कन्याया वा पवित्रं स्यान्न पुंश्चल्यादिभिः कृतैः ॥ कृते मणिमयं कार्यं त्रेतायां हेमसंभवम् ॥ द्वापरे पट्टसूत्रं च कलौ कार्पासमुच्यते । स्नात्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् । अभिषिञ्चेत्पञ्चगव्यैरद्भिः प्रक्षालयेत्ततः ” इति तथा *“तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः ॥

---

* १२७ पृष्ठस्थ “ प्रयोग सारोक्त ” इत्यारभ्य “ तथा ” इत्यन्तो ग्रन्थः केषुचित्पुस्तकेषु नास्ति ॥

सप्तत्या सहितं द्वाभ्यां पवित्रं मध्यमं स्मृतम् । साशीतिना शतेनैव कनिष्ठं तत्समाचरेत् ॥ ÷ "साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् ॥ उत्तमं तु शतग्रन्थि पञ्चाशद्ग्रन्थि मध्यमम् ॥ कनिष्ठं तु पवित्रं स्यात्षड्विंशद्ग्रन्थि शोभनम् ॥ षड्विंशच्च चतुर्विंशत् द्वादशेति च केचन ॥ चतुर्विंशत् द्वादशाष्टावित्येके मुनयो विदुः" इति । हेमाद्रौ विष्णुरहस्ये (तु) " अष्टोत्तरशतं कुर्याच्चतुः पञ्चाशदेव वा ॥ सप्तविंशतिरे (वाथ) व स्यात् ज्येष्ठमध्यकनीय (स) सामिति" । * वाराहे चातुर्मास्यमाहात्म्ये तु " पूर्णिमायां ततः कुर्यात्पवित्राणां समर्पणम् ॥ नानावर्णैः पट्टसूत्रैर्निर्मितानि समर्पयेत् ॥ पवित्राणि ततो दद्याद्दक्षिणाभिः सहैव तु ॥ ब्राह्मणेभ्यः स्वयं चापि भक्त्या कण्ठेऽथवा करे ॥ बिभृयाद्ब्राह्मणेभ्यश्च दत्तं भवति चाक्षयम्" इत्युक्तम् । रामार्चनचान्द्रिकायाम् ॥ " अङ्गुष्ठपर्वमात्रं तु कुर्याद् ग्रन्थिमथोत्तमम् ॥ तदर्द्धेन तदर्द्धेन मध्यमे च कनिष्ठके ॥ ग्रन्थीन् कुर्वीत सर्वत्र सुवृत्तान् सुमनोहरान् ॥ न

÷ अत्र केषु चित्पुस्तकेषु "पवित्रारोपणं विष्णोः कर्तव्यं श्रद्धयान्वितैः ॥ सम्पूर्णा जायते यस्मात्पूजा सांवत्सरी कृता ॥ " इति वचनं अधिकं दृश्यते ॥

* ' वाराहे , इत्यारभ्य १४० पृष्ठस्थ ' शङ्कालेश इतिदिक् , इत्यन्तो ग्रन्थः केषु चित्पुस्तकेषु नास्ति ॥

वै विषमसंख्याकान् ग्रन्थीन् कुर्वीत कुत्रचित ॥ विशोभसूत्रादानेन कर्त्तुः स्यादशुभं फलम् ॥ पवित्रं परया भक्त्या तस्मात्कुर्वीत शोभनम् ॥ कुङ्कुमं रोचनं चैव कर्पूरेण विमिश्रितम् ॥ तेन संरंजयेत्सूत्रम्" इत्युक्तम् । तथा । "मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ॥ देवे तं सूत्रसन्दर्भं देशकालविवक्षया" ॥ इति । तथा "ततः पवित्रं गुरवे दद्याद्गन्धादिपूर्वकम् ॥ अथैनं पूजयेद्भक्त्या स्वर्णवस्त्रानुलेपनैः" इति ॥ तथा "पवित्रारोपणं काले न करोति कथंचन ॥ तद्दा ऽयुतं जपेन्मन्त्रं पुनः स्तोत्रं समाचरेत्" इति प्रायश्चित्तमपि प्रमादेनाकरण उक्तम् । अधिवासनं गन्धमाल्याद्यैः संस्कारः । सूत्रादिदेवतास्तु प्रायो न संमता मार्गान्तरीया इति । अधिवासनं तु सूत्रात्मना ऽनुस्यूतत्वात्सामान्येनारोपितायाः वार्षिकपूजाया एवाधिदैविकत्वायेति ज्ञातव्यम् ॥ तेन न को ऽपि शङ्कालेश इति दिक् * ॥

———

* १३९ पृष्ठस्थ 'वाराहे' इत्यारभ्य 'शङ्कालेश इतिदिक्, इत्यन्तोग्रन्थः केषु चित्पुस्तकेषु नास्ति ॥


॥ श्रावण्यां पौर्णमास्यां रक्षाबन्धनोत्सवः ॥

स च भद्रारहितायां (तस्यामेव) कार्यः ॥

" भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा ।
श्रावणी नृपतिं हन्ति राष्ट्रं हन्ति च फाल्गुनी " ॥
इति वाक्यात् । " नन्दाया दर्शने रक्षा बलिदानं दशासु च । भद्रायां गोकुलक्रीडा स देशो वै विनश्यति " इति वाक्याच्चेति दिक् ॥ इति श्रावणोत्सवाः ॥

आलोच्य श्रीमदाचार्यश्रीमत्प्रभुसरस्वतीम् ॥
सम्प्रदायं च निश्चित्य प्रभुपौत्रीयनिर्णयैः ॥ १ ॥
तत्कृपाबलमाश्रित्य संक्षिप्तवरयुक्तिभिः ॥
सम्प्रदायाज्ञजनताकृतशङ्काकुले जने ॥ २ ॥
पद्धतिं निर्मलीकर्त्तुं व्रजराजैर्विनिर्मिताम् ॥
संवत्सरोत्सवानेहोनिर्णयोऽयं मया कृतः ॥ ३ ॥
प्रभवस्तेन तुष्यन्तु यन्मयोक्तमबोधतः ॥
तत्क्षाम्यन्तु यथा मन्तुनिचयो न भवेन्मयि ॥ ४ ॥

इति श्रीमत्प्रभुपदारविन्दमकरन्दप्राप्तिप्राप्तपुरुषोत्तमाभिधानेन विरचितः संवत्सरोत्सवकालनिर्णयप्रतानः सम्पूर्णः ॥ शुभम्भवतु ॥   ॥ छ ॥   ॥ छ ॥



॥ श्रीहरिः ॥

मुम्बईवारे श्रीजीवनजी महाराज कृत व्रजभाषामे-

उत्सव निर्णयः

श्रीबालकृष्णोजयति ॥ श्रीबालकृष्णपत्कंजेमानसस्थंसुखप्रदम् ॥ प्रणम्य तत्प्रेरणया ग्रन्थोऽयंक्रियतेमया ॥ १ ॥ दोहा । वल्लभनन्दन पदयुगल बन्दन करि सुखदान ॥ निजमारगनिरनय निरखि लिखिहूं ताहिप्रमान ॥ १ ॥ अथ प्रथम श्रीमहाप्रभुननें श्रीभागवततत्वदीपनिवन्धकेविषें ॥ एकादश्युपवासादिकर्तव्यंवेधवर्जितम ॥ या कारिकाविषें एकादशीसूं निर्णयको क्रम लियोहें तेसें ॥ अब हूं एकादशीसूं आरम्भ करिकें निर्णय लिखितहूं. ॥

१ ये उत्सवनिर्णय प्रतानकी टीकारूप नही समझनो क्योंकि प्रतानतो अतिविस्तृत शास्त्रार्थ युक्तहे परंतु सारांशसूं सर्वोत्सवदिग्दर्शनयामे कियो हे तासूं उपयोगी समझके इहां मुद्रित कियो हे.

॥ भारत मार्तण्ड श्रीगट्टूलालजी कृत टिप्पणी ॥

२ अब गोस्वामि श्रीजीवनजीमहाराजनें दैवीजीवनपे कृपा करिकें स्वमार्गीयउत्सवनको निर्णय व्रजभाषामें कियोहे क्यों जो अनेकवैष्णव भगवत्सेवाके आग्रही हें ओर संस्कृतग्रंथनको ज्ञान विनकूं नाहि ओर स्वमार्गीयसंस्कृतग्रंथ देखिकें यथार्थ निर्णय कहिवेवारे हू आजकाल सर्वत्र मिलें नाहि कहींक ही होय तासूं भाषाके ग्रंथविना विन सब वैष्णवनकूं उत्सवनको ज्ञान होयसके नहि ओर उत्सवनके ज्ञानविना सेवा सर्वथा बनिसके नहि ओर ग्रंथनसूं विरुद्धउत्सव मानेजांय तो प्रभुनको बडो ही अपराध पडे तासूं यह अपराध दूर करिवेकूं ओर सेवा सांग करवायकें अज्ञजीवनकूं हू परमफलप्राप्ति करवायवेकूं गोस्वामि श्रीजीवनजीमहाराजने यह भाषामें उत्सवनको

॥ अथ एकादशी निर्णयः ॥ दशमी जो पचपन ५५ घडी होय तो वा एकादशीको त्याग करनो ओर पलमात्र हू जो पचपन घडीमे ओछी होय तो वह एकादशी न छोडनी एसें श्रीकल्याण-रायजीनें हू अपने एकादशीको निर्णय कियोहे तामें लिख्योहें ओर जो ज्योतिषी पास न होय ओर वेधको संदेह मनमे रेहेतो होय तो शुद्धद्वादशीके दिन व्रत करनो एसो वाक्य हे ओर दो एकादशी होय तो दूसरीएकादशीके दिन व्रत करनो ओर दो द्वादशी होयतो शुद्दएकादशी होय तो हू पेहेली द्वादशीके दिन व्रत करनो. १ ॥

॥ अथ जन्माष्टमी निर्णयः ॥ भाद्रपद वदि अष्टमी जन्माष्टमी ॥ सो वह अष्टमी सप्तमीविद्धा न लेनो सप्तमीको वेध सूर्योदयसूं लेनो एकादशीकी नाई पचपन ५५ घडिको वेध न लेनो ओर अष्टमी जो सप्तमीविद्धा होय तो औदायिक अष्टमीके दिन उत्सव

॥ भारत मार्तण्ड श्रीगट्टूलालजी कृत टिप्पणी ॥

निर्णय कियोहे या ग्रंथकी टिप्पणी श्रीजीवनजीमहाराजकी आज्ञासूं घनश्याम भट्टसुत गट्टूलाल या नामसूं प्रसिद्ध पंचनदि गोवर्द्धनलालनें कीनी हे अब श्रीजीवनजीमहाराज या उत्सवार्निर्णयमें विघ्ननिवारण करिवेकूं एकश्लोकतें मंगलाचारण करतहें ता श्लोकको अर्थ अपुने ठाकुरजी श्रीबालकृष्णजीके चरणरूपकमलकूं प्रणाम करिकें अंतः करणमें बिनकी प्रेरणातें यह ग्रंथ में करतहूं अब चरणकूं कमल कह्यो याको अभिप्राय यह जो जेसें कमल कोमल होतहें तापहरतहें शीतलता करत हे तेसें चरणारविंद हू कोमल हे संसारताप हरिकें शीतलता करत हे ओर यह चरणारविंद केसोहे मानस जो भक्तनको मन तामें रहत हे जेसें कमल हू मानस जो मानसरोवर तामें रहे ओर चरणारविंद सुखप्रद हे सो अगणितानंद देवेवारो हे जेसे कमल हू सुगंधादिकतें आनन्द देतहें.

माननो ओर अष्टमीको क्षय होंय तो हू शुद्धनवमीके दिन उत्सव मा-
ननो। ओर दो अष्टमी होंय तो पेहेली अष्टमीके दिन उत्सव माननो २

॥ अथ राधाष्टमी निर्णयः ॥ भाद्रपद सुदि अष्टमी राधाष्टमी.
सो अष्टमी उदयात लेनी। ओर दो अष्टमी होंय तो पेहेली अष्टमीके
दिन उत्सव माननो। ओर अष्टमीको क्षय होयतो विद्धाअष्टमीके ही
दिन उत्सव माननो. ॥ ३ ॥

॥ अथ दानएकादशी निर्णयः ॥ भाद्रपद सुदि एकादशी
दानएकादशी ॥ सो जा दिन व्रत करनो तादिन दानको उत्सव
माननो। व्रतको प्रकार तो प्रथम एकादशीनिर्णयमें लिख्योहे। ओर
यह उत्सव कितनेक औदयिक एकादशीके दिन करतहें। ओर ए-
कादशीको क्षय होय तो विद्धाएकादशीके दिन ही करतहें परंतु
मुख्यपक्ष व्रतके दिन उत्सव करनो यह ही हे. ॥ ४ ॥

॥ अथ वामनद्वादशी निर्णयः ॥ भाद्रपद सुदि द्वादशी
वामनद्वादशी ॥ सो द्वादशी मध्यान्ह व्यापिनी लेनी। मध्यान्हको
लक्षण जितनी दिनमानकी घडी होंय तिनको बराबर मध्यभाग सो
मध्यान्ह यह मुख्यपक्ष। ओर जितनी दिनमानकी घडी होंय तिनके
पांच भाग करने तामे तीसरो भाग मध्यको जितनी घडीको आवे
ता कालको नाम मध्यान्ह काल यह दूसरोपक्ष हे ओर एकादशीके
दिन विष्णुशृंखल योग होय तो एकादशीके दिन उत्सव माननो
विष्णुशृंखल योगको प्रकार एकादशीमें श्रवणनक्षत्र बेठे ओर
द्वादशी श्रवणनक्षत्रहीमें उपरांत आवे ता योगको नाम विष्णुशृंखल

यह योग एकादशीके दिन सूर्योदयसूं लेकें सूर्यास्तसूं पहिलें चाहे-तब आवतो होय तो एकादशीके दिन उत्सव माननो। ओर रात्रिमें यह योग आवतो होय सो उपयोगी नहीं। ओर एकादशीके दिन विष्णुशृंखलयोग न होय केवल श्रवणनक्षत्र होय ओर द्वादशीके दिन श्रवणनक्षत्र न होय तो हू एकादशीके दिन उत्सव माननो। ओर विद्धा एकादशीके दिन श्रवणनक्षत्र होय तो वा दिन उत्सव माननो नहीं॥ द्वादशीके दिन माननो। ओर दोई दिन श्रवणनक्षत्र न होय ओर द्वादशी मध्यान्हसमयके विषे दोई दिनआवती होय तो एकादशीके दिन उत्सवमाननो। ओर मध्यान्हसमें दोई दिन द्वादशी न आवती होय तोहू एकादशीके दिन उत्सव माननो। ओर एका-दशी तथा द्वादशी दोई दिन श्रवणनक्षत्र आवतो होय तो द्वादशीके दिन उत्सव माननो। ओर दो द्वादशी होंय तो पेहेली द्वादशीके दिन श्रवणनक्षत्र होय तो पेहेली द्वादशीके दिन उत्सव माननो। ओर दूसरीद्वादशीके दिन श्रवणनक्षत्र होय तो दूसरी द्वादशीके दिन उत्सव माननो। ओर दो द्वादशीनमें श्रवणनक्षत्र होय तो जा दिन मध्यान्हसमें श्रवणनक्षत्रकी व्याप्ति होय ता दिन उत्सव माननो। ओर दोई दिन श्रवणनक्षत्र होय परंतु मध्यान्हव्याप्ति दोई दिन नहीं होय तो जा दिन उदयात श्रवणनक्षत्र होय ता दिन उत्सव माननो ॥ ५ ॥

॥ अथ नवरात्रप्रारंभ निर्णयः ॥ आश्विन सुदि प्रतिपदासूं नवरात्रको आरंभ होय सो प्रतिपदा उदयात लेनी। ओर दो प्रतिपदा होय तो पहली प्रतिपदा लेनी ओर प्रतिपदा को क्षय होय तो विद्धा प्रतिपदा लेनी ॥ ६ ॥

॥ अथ विजयादशमी निर्णयः ॥ आश्विन शुद्ध दशमी विजयादशमी सो दशमी संध्याकालव्यापिनी लेनी। सो दशमी दो प्रकारकी श्रवणयुक्त ओर श्रवण रहित। तामें श्रवण रहित दशमी च्यारप्रकारकी। पेहेले दिन संध्याकालव्यापिनी। दूसरे दिन संध्याकालव्यापिनी। दोई दिन संध्याकालव्यापिनी। ओर दोई दिन संध्याकालमें न होय एसी। तामें पेहेले दिन संध्याकालव्यापिनी होय तो पेहेले दिन माननी। दूसरे दिन संध्याकालव्यापिनी होय तो दूसरे दिन माननी। ओर दोई दिन संध्याकालव्यापिनी होय तो पेहेले दिन माननी ओर दोई दिन संध्याकालव्यापिनी न होय तो दूसरी दशमीके दिन माननी ॥ अब श्रवणनक्षत्रसहित विजयादशमीको प्रकार। पेहेले दिन दशमी श्रवणनक्षत्रयुक्त संध्याकालव्यापिनी होय तो पेहेले दिन माननी। ओर दूसरे दिन संध्याकालसमय श्रवणनक्षत्रयुक्त होय तो दूसरे दिन माननी। ओर दशमीके दिन श्रवणनक्षत्र उदयात होय ओर संध्याकालविषें श्रवणनक्षत्रकी व्याप्ति आवती न होय तो हू वाही दिन माननी। ओर पेहेले दिन संध्याकालव्यापिनी दशमी न होय ओर दूसरे दिन संध्याकालसूं पेहेलें दशमी ओर श्रवणनक्षत्र दोई समाप्त होतेहोंय तो दूसरे दिन माननी। ओर सूर्योदयसमें थोड़ी दशमी होय ओर श्रवणनक्षत्रकी व्याप्ति संध्यासमे होय तो हू वा ही दिन माननी ॥ ७ ॥

॥ अथ शारदपूर्णिमा निर्णयः ॥ आश्विन सुद पून्यो सरदपून्यो सो। चंद्रोदयव्यापिनी लेनी। ओर दोईदिन पून्यो चंद्रोदयव्यापिनी होय तो पेहेली लेनी ओर दोई दिन चंद्रोदयव्यापिनी न होय तो हू पेहेली लेनी ॥ ८ ॥

अथ धनत्रयोदशी निर्णयः॥ कार्त्तिक वदि त्रयोदशी धनत्रयोदशी॥ सो त्रयोदशी उदयात लेनी। दो त्रयोदशी होय तो पेहेली लेनी॥ और त्रयोदशीको क्षय होय तो विद्धा लेनी चहिये॥ ९॥

॥ अथ रूपचतुर्दशी निर्णयः ॥ कार्त्तिकवदि चतुर्दशी रूपचतुर्दशी यह । चतुर्दशी चन्द्रोदयव्यापिनी लेनी। और दो दिना चन्द्रोदयव्यापिनी होय तो पूर्व लेनी। और दोई दिना चंद्रोदयसमय अथवा अरुणोदयसमय चतुर्दशी क्षयवशसूं न आवती होय तो। विद्धा लेनी। यद्यपि निर्भयरामभटजीने यह चतुर्दशी सूर्योदयव्यापिनी लिखीहे तथापि संवत्सरोत्सवकल्पलता उत्सवमालिका प्रभृति प्राचीनग्रंथनको तो पहिलें लिख्यो सो ही संमतहे ॥

॥ दीपोत्सवनिर्णयः ॥ कार्तिक वदि अमावस दिवारी सो अमावस प्रदोषव्यापिनी लेनी। प्रदोषको लक्षण तो सूर्य अस्त होयवे लगें तबसूं सो छ घडी रात जाय ता कालको नाम प्रदोषकाल पेहेले दिन प्रदोषव्यापिनी होय तो पेहले दिन माननी ॥ ओर दूसरे दिन प्रदोष व्यापिनी होय तो दूसरे दिन माननी। ओर दोई दिन प्रदोषव्यापिनी होय तो पेहेले दिन माननी । ओर दोई दिन प्रदोष व्यापिनी न होय तो हू पेहेले दिन माननी ॥ ११ ॥

॥ अथ अन्नकूटोत्सव निर्णयः ॥ अन्नकूटको उत्सव दिवारी के दूसरे दिन माननो। ओर वा दिन कछू अडचडाटसूं अन्नकूट न बनिसके तो कार्तिकसुदी पूर्णिमातांई जब बने तब करनो ॥ १२ ॥

॥ अथ भ्रातृद्वितीया निर्णयः ॥ कार्तिक सुदि दूज भाईदूज सो दूज मध्यान्हव्यापिनी लेनी। मध्यान्हको लक्षण पेहेले वामन द्वादशीके निर्णय में लिख्योहे। ओर मध्यान्हव्यापिनी न होय तो उदयात होय तादिन माननी ॥ १३ ॥

॥ अथ गोपाष्टमी निर्णयः कार्त्तिक सुदि अष्टमी गोपाष्टमी सो अष्टमी उदयात लेनी। दो अष्टमी होंय तो पेहेली लेनी। ओर क्षय होय तो विद्धा लेनी ॥ १४ ॥

॥ अथ प्रबोधिनी निर्णयः ॥ कार्तिक सुदि एकादशी प्रबोधिनीएकादशी सो जा दिन व्रत करनो ता दिन भद्रा[1]रहितसमेमें देवोत्थापन करनो व्रतको प्रकार प्रथम एकादशीके निर्णयमे लिख्यो हे १५

॥ अथ श्रीगिरिधराणांजन्मोत्सव निर्णयः ॥

कार्तिक सुदि द्वादशीके दिन श्रीगिरिधरजीको जन्मउत्सव। सो द्वादशी उदयात लेनी। ओर दो द्वादशी होंय तो पेहेली द्वादशीके दिन उत्सव माननो। ओर द्वादशीको क्षय होय तो विद्धाद्वादशीके दिन उत्सव माननो ॥ १६ ॥

॥ अथ श्रीमद्विठ्ठलनाथजन्मोत्सव निर्णयः ॥

पौष कृष्ण नवमी श्रीगुसांइजीको जन्मोत्सव। सो नवमी उदयात लेनी

---

१ भद्रा सो विष्टि सो पंचांगमें स्फुट लिखी होयहे ओर। दशमीकी समाप्तिसूं लेकें द्वादशीके आरंभताईं एकादशीकी जितनी घडी सिद्ध होंय तिनमें दो विभाग करिकें दूसरो विभाग भद्रा जाननो। जेसें अट्ठावन घडी एकादशी होय तो पेहेली गुनतीस घडी आछी ओर दूसरी गुनतीस घडी भद्रा जाननी

ओर दो नवमी होंय तो पेहेली नवमीके दिन उत्सव माननो । ओर नवमीको क्षय होय तो विद्धानवमीके दिन उत्सव माननो ॥ १७ ॥

॥ अथ मकरसंक्रांति निर्णयः ॥ मकरसंक्रांतिको पुण्यकाल संक्रांति बेठेपीछें बीसघडीताई जाननो । सो सूर्यास्तसं पेहेले जो संक्रांति बठे तो वादिन पुण्यकाल जासेंमें आवतो होय तासमें तिलवाभोग धरने । दानादिक करने । ओर सूर्यास्तसूं पीछें संक्रांति बेठे तो दूसरे दिन प्रातः कालके विषें तिलवाभोग धरने । दानादिक करने । ओर संक्रांतिके पेहेले दिन भोगीको उत्सव माननो ॥ १८ ॥

॥ अथ वसंतपंचमी निर्णयः ॥ माघ सुदि पंचमी वसंत पंचमी । सो पंचमी उदयात लेनी । ओर दो पंचमी होंय तो पेहेली पंचमीके दिन उत्सव माननो । क्षय होय तो विद्धा पंचमीके दिन उत्सव माननो ॥ १९ ॥

॥ अथ होलिका दंडारोपण निर्णयः ॥ माघ सुदि पून्यो होरीदंडारोपणपर्वात्मक उत्सव । सो होरीदंडारोपण भद्रारहितकालमें करनो । संध्याकालके विषे अथवा प्रातः कालके विषे सांझको भद्रारहित पौर्णिमा न आवती होय तो आवतीपिछली रातकूं प्रतिपदामें दंडारोपण करनो । ओर वा दिन ग्रहण होय ओर ग्रस्तोदय होय तो ग्रहण छूटेपीछें दंड़ारोपण करनो । ओर ग्रस्तोदय न होय तो ग्रहण लगें पेहेले दंड़ारोपण करनो ॥ २० ॥

---

१ भद्रा सो विष्टि ताको स्वरूप राखीपून्योके निर्णयमें में लिखूंगो ॥

॥ अथ श्रीमद्गोवर्धनधरागमनोत्सव निर्णयः ॥ फाल्गुन कृष्ण सप्तमी श्रीनाथजीको पाटउत्सव । सो सप्तमी उदयात लेनी ओर दो सप्तमी होय तो पेहेली सप्तमीके दिन उत्सव माननो ओर सप्तमीको क्षय होय तो विद्धासप्तमीके दिन उत्सव माननो ॥ २१ ॥

॥ अथ होलिकोद्दीपन निर्णयः ॥ फाल्गुन सुदि पून्यो होलिकोत्सव सो पून्यो प्रदोषव्यापिनी लेनी । तादिन होरी भद्रारहित कालमें प्रगटनी । संध्याकालके विषे सूर्यास्तसूं पीछे अथवा प्रातःकालके विषे सूर्योदयसूं पेहलें ओर पहिले दिन आखीरात भद्रा होय ओर दूसरे दिन सायंकालसूं पहिलें पून्यो समाप्त होताहोय तो दूसरे दिन सूर्यास्त पीछें प्रतिपदामे ही होरी प्रगटनी । अथवा भद्रा बेठेपीछें पांच घडीतांई भद्राको मुख ताको त्याग करिकें बाकीभद्रामें ही प्रगटनी अथवा भद्राकी तीन घडी छेली सो भद्राको पुच्छ तामे होरी प्रगटें तो हू चिंता नही । ओर वा दिन ग्रहणहोय ओर ग्रस्तोदय होय तो ग्रहण छूटे पीछें होरी प्रगटनी ओर ग्रस्तोदय न होय तो ग्रहण लगे पहलें होरी प्रगटनी । परंतु कबहू होरी दिनमें प्रगटनी नही । रात्रीमें ही प्रगटनी । ओर जा रात्रीमें होरी प्रगटीजाय तासूं पहीलें दिनमें होरीको उत्सव माननो ॥ २२ ॥

॥ अथ दोलोत्सव : ॥ फाल्गुन शुद्धपूर्णिमाके दिन अथवा उत्तराफाल्गुनी नक्षत्र जा दिन होय ता दिना दोलोत्सव माननो सो उत्तराफाल्गुनी नक्षत्र पीछली पेहेररात मूलेकें सूर्योदय होय तहांतांई चाहे तब आयो चहिये केवल उदयात नक्षत्रको आग्रह नही । ओर

पूर्णिमापेहेली उत्तरा फाल्गुनी नक्षत्र आवतो होय तो शुद्धपूर्णिमाके दिन दोलोत्सव माननो। ओर दो पून्यो होय तो पेहेलीपून्योके दिन उत्तराफाल्गुनी नक्षत्र होय तो वा दिन दोलोत्सव करनो। ओर दूसरी पूर्णिमाके दिन उत्तरफाल्गुनी नक्षत्र होय तो तादिन दोलोत्सव करनो। ओर दोई पूर्णिमाके दिन उदयात नक्षत्र होय तो पेहेले दिन दोलोत्सव माननो। ओर पूर्णिमाको क्षय ओर वा दिन उत्तराफाल्गुनी नक्षत्र होय तो वा दिन दोलोत्सव करनो। ओर पूर्णिमापीछें प्रतिपदाप्रवृत्तिमें उत्तराफाल्गुनी आवे तो ता दिन दोलोत्सव माननो। ओर सो नक्षत्र दोदिन उदयात होय तो पहिलेदिन उत्सव माननो। ओर उत्तरा फाल्गुनी नक्षत्रको क्षय होय तो क्षयके ही दिन दोलोत्सव माननो। ओर पूर्णिमाके दिन ग्रहण होय ओर उत्तराफाल्गुनी नक्षत्र दूसरे दिन होय तो पूर्णिमाके दि दोलोत्सव करनो। ग्रहण होय तब नक्षत्र को आग्रह नही ॥ २३ ॥

॥ अथसंवत्सरारंभनिर्णयः ॥ चैत्रशुद्ध प्रतिपदा संवत्सरोत्सव सो प्रतिपदा उदयात लेनी। ओर दो प्रतिपदा होय तो पेहेली प्रतिपदाके दिन उत्सव माननो। ओर प्रतिपदाको क्षय होय तो विद्धा-प्रतिपदाके दिन उत्सव माननो। ओर दो चैत्र होय तो पेहेलेचैत्रकी शुद्धप्रतिपदाके दिन उत्सव माननो। एसो निर्णयसिंध्वादिग्रंथनको आशय हे। ओर दूसरेचैत्रकी शुद्धप्रतिपदामें उत्सव माननो एसो समयमयूखप्रभृतिनको अभिप्राय हे। तासूं जादेशनें जेसो शिष्टाचार होय तहां तेसो माननो। याबाबत स्वमार्गीयग्रंथनमें कछु विशेष लेख नहीहे ॥ २४ ॥

॥ अथ श्रीरामनवमी निर्णयः ॥ चैत्रशुद्ध नवमी रामनवमी सो नवमी उदयात लेनी, ओर दो नवमी होंय तो पेहेलीनवमीके दिन उत्सव माननो, ओर नवमीको क्षय होय तो विद्धानवमीके दिन उत्सव माननो, ओर दशमीको क्षय होयके व्रतके दूसरे दिन पारणाकेलियें दशमी न रहती होय तो हू विद्धानवमीके दिन उत्सव माननो ॥ २५ ॥

॥ अथमेषसंक्रांतिनिर्णयः ॥ मेषसंक्रांतिको पुण्यकालसंक्रांति जाबिरियां बेठे तासूं दशघडी पहिलें ओर दशघड़ी बेठेपीछें जाननो तामें हू जो जो घड़ी संक्रांतिके पासकी होय सो सो अधिकी अधिकी पुण्यकाल जाननो, ओर जो सूर्यास्तभयेपीछें संक्रांति अर्द्धरात्री सूं पहिलें बेठती होय तो वादिना मध्यन्हपीछें पुण्यकाल जाननो, ओर अर्द्धरात्रसूं पीछें बेठती होय तो दूसरे दिन मध्यान्हसूं पहिलें दो प्रहर पुण्यकाल जाननो, ओर बरोबर मध्यरात्रिकेसमें संक्रांति बेठती होय तो पहिलेदिना मध्यान्हसू पीछें दो प्रहर पुण्यकाल-ओर दूसरे दिन मध्यान्हसूं पहिलें दो प्रहर पुण्यकाल, एसें दोउदिना पुण्यकाल बरोबर जादिना सौकर्य होय तादिना माननो ॥ २६ ॥

॥ अथ श्रीमदाचार्याणांप्रादुर्भावोत्सवनिर्णयः ॥

वैशाखकृष्ण एकादशी श्रीमहाप्रभुनको जन्मोत्सव सो एकादशी उदयात लेनी, ओर दो एकादशी होंय तो पेहेली एकादशीके दिन उत्सव माननो, एकादशीको क्षय होय तो विद्धाएकादशीके दिन

उत्सव माननो, जा दिन व्रत करनो ताही दिन उत्सव माननो, एसो आग्रह नही याही प्रमाणे सातोंबालकनके तथा सब गोस्वामि बालकनके जन्मदिन उत्सवकी सब तिथी लेनी ॥ २७

॥ अथ अक्षयतृतीया निर्णय : ॥ वैशाख शुद्ध तृतीया अक्षयतृतीया सो तीज उदयात लेनी, ओर दो तीज होय तो पेहेली तीज माननी, ओर तीजको क्षय होय तो विद्धातीजके दिन उत्सव माननो २८

॥ अथ नृसिंहचतुर्दशी निर्णय : ॥ वैशाखशुद्ध चतुर्दशी नृसिंहचतुर्दशी सो चतुर्दशी उदयात लेनी, ओर दो चतुर्दशी होय तो पेहेली चतुर्दशीके दिन उत्सव माननो, ओर चतुर्दशीको क्षय होय तो विद्धाचतुर्दशीके दिन उत्सव माननो ॥ २९ ॥

१ अब वैष्णवनकों जानिवेकेलिये सातों बालकनके उत्सव लिखतहूं श्रीगिरिधरजीको उत्सव कार्तिकसुदि द्वादशी, श्रीगोविंदरायजीको उत्सव मार्गशिर वदि अष्टमी, श्रीबालकृष्णजीको उत्सव आश्विन वदि त्रयोदशी, श्रीगोकुलनाथजीको उत्सव मार्गशीर्ष सुदि सप्तमी, श्रीरघुनाथजीको उत्सव कार्तिक सुदि द्वादशी, श्रीयदुनाथजीको उत्सव चैत्र सुदि षष्ठी, श्रीघनश्यामजीको उत्सव मार्गशिर वदि त्रयोदशी, श्रीमहाप्रभुनके ज्येष्ठ पुत्र श्रीगोपीनाथजीको उत्सव आश्विन वदि द्वादशी, इनसबजन्मोत्सवनमें तिथि उदयात लेनी । ओर वह तिथि दोदिना सूर्योदयसमें होय तो पहिले दिन उत्सव माननो । ओर वा तिथिको क्षय होय तो क्षयके दिन ही उत्सव माननो। यह निर्णय तो मूलग्रंथमे दिखायो ही हे, ओर इनसबउत्सवनमें कछु विशेष निर्णय नही हे, तासूं ये उत्सव संस्कृतनिर्णयग्रंथनमें हू जुदे लिखे नहीं हें, ओर मूलपुरुषादिकनमें प्रसिद्ध हू हे। याहीसूं श्रीजीवनजीमहाराजने या ग्रंथमे जुदेजुदे नही लिखे.

॥ अथ गंगादशहरा निर्णयः ॥ ज्येष्ठशुद्ध दशमी श्रीगंगाजीको दशहरा सो दशमी उदयात लेनी । ओर दो दशमी होय तो पेहेली दशमीके दिन उत्सव माननो । ओर दशमीको क्षय होय तो विद्धा दशमीके दिन उत्सव माननो ॥ ३० ॥

॥ अथ ज्येष्ठाभिषेकोत्सव निर्णयः ॥ ज्येष्ठशुद्धपूर्णिमाके दिन अथवा जा दिन सूर्योदयसूं पेहेले पिछलीरातकूं स्नानसमें ज्येष्ठा नक्षत्र होय ता दिन स्नानयात्राको उत्सव माननो ॥ सो पून्यो उदयात लेनी । ओर ज्येष्ठानक्षत्र पिछलीपेहेररातसूं लेकें सूर्योदय होय तांहांताई चाहेतब आयो चहिये ॥ ओर दोपून्यो होय तो पेहेली पून्योके दिन स्नानसमें पिछलीरातकूं ज्येष्ठानक्षत्र आवतो होय तो वा दिन उत्सव माननो ॥ ओर दूसरी पून्योके दिन स्नानसमें पिछलीरातकूं ज्येष्ठानक्षत्र आवतो होय तो तादिन उत्सव माननो । ओर दोई दिन पिछलीरातकूं स्नानसमें ज्येष्ठानक्षत्र आवतो होय तो पेहेलेदिन उत्सव माननो । ओर पून्योको क्षय होय ओर वा दिन आवती पिछलीरातकूं स्नानसमें ज्येष्ठानक्षत्र आवे तो वादिन उत्सव माननो । ओर पून्योके दिन ज्येष्ठानक्षत्र न होय तो जादिन सूर्योदयसूं पहिले स्नानसमें ज्येष्ठानक्षत्र आवे तादिन उत्सव माननो यामें पूर्णिमाको आग्रह नहीं । ओर ज्येष्ठानक्षत्रको क्षय होय तोहू दूसरे दिन स्नानसमें ज्येष्ठानक्षत्र आवतो होय तो ता दिन उत्सव माननो । ओर स्नानसमयसूं पहिलें ही ज्येष्ठानक्षत्र समाप्त होतोहोय तो केवल पूर्णिमाके दिन उत्सव माननो । ओर पून्योकी

आवतीपिछलीरातकूं ज्येष्ठानक्षत्र होय ओर ग्रहण होय तो पेहेली पिछलीरातकूं नक्षत्रबिनाहू केवल पूर्णिमामे स्नान करावनो ॥ ३१ ॥

॥ अथ रथोत्सव निर्णयः ॥ आषाढ शुद्ध प्रतिपदासूं लेकें जा दिन पुष्यनक्षत्र होय ता दिन रथयात्राको उत्सवमाननो । सो पुष्यनक्षत्र सूर्योदयव्यापी लेनो। ओर दोईदिना नक्षत्र सूर्योदयव्यापी होय तो पहिलेदिना। रथयात्राको उत्सव माननो ओर नक्षत्रको क्षय होय तो क्षयके दिन हि पुष्यनक्षत्रमें उत्सव करनो अथवा केवल द्वितीयाके दिन उत्सवमाननो ॥ ३२ ॥

॥ अथ षष्ठीपंडगु निर्णयः ॥ आषाढशुद्धषष्ठी कसूंबाछट्ट। सो छट्ट उदयात लेनी । ओर दो छट्ट होय तो पेहेली छट्ट लेनी । ओर छट्टको क्षय होय तो विद्धाछट्ट लेनी ॥ ३३ ॥

॥ अथ आषाढ शुद्ध पूर्णिमा निर्णयः ॥

आषाढ सुदी पून्यो पर्वात्मक उत्सव। सो पून्यो उदयात लेनी। दो पून्यो होय तो पेहेली पून्यो लेनी । ओर पून्योको क्षय होय तो विद्धापून्यो लेनी ॥ ३४ ॥

॥ अथ हिंदोलांदोलनारंभ निर्णयः ॥ श्रावणकृष्ण प्रतिपदासूं लेकें जा दिन दिनशुद्धी होय श्रीठाकूरजीकी वृषराशीकूं अनकूल चंद्र होय ता दिनसूं श्रीठाकुरजीकूं हिंडोरा झुलावने ॥ ३५ ॥

॥ अथ श्रावणशुक्ल तृतीया निर्णयः ॥ श्रावणसुदि तीज ठकरानीतीज। सो तीज उदयात लेनी। ओर दो तीज होंय तो पेहेली तीज लेनी ओर तीजको क्षय होय तो विद्धा तीज माननी ॥ ३६ ॥

॥ अथ नागपंचमी निर्णयः ॥ श्रावणशुद्ध पंचमी नागपंचमी । सो पंचमी उदयात लेनी । ओर दो पंचमी होंय तो पेहेली लेनी । ओर क्षय होय तो विद्धा लेनी ॥ ३७ ॥

अथ पवित्रैकादशी निर्णयः ॥ श्रावणशुद्ध एकादशी पवित्राएकादशी । सो जादिन व्रत करनो तादिन भद्रा[1]रहितसमेंमें श्रीठाकुरजीकूं पवित्रा धरावने । व्रतको प्रकार प्रथम एकादशीनिर्णयमें लिख्योहे ॥ ३८ ॥

॥ अथ रक्षाबंधन निर्णयः ॥ श्रावण सुदी पून्यो राखीपून्यो सो पून्यो राखी धरें तासमे भद्रा[2]रहित चहियें ओर सबेरें तथा सांझकूं भद्रारहितपूर्णिमा मिले तो सांझकूं रक्षा धरावनी ॥ ३९ ॥

---

१ भद्राको स्वरूप प्रबोधिनीके निर्णयमें लिख्योहे । विशेष रक्षानिर्णयमें लिखूंगो.

२ भद्राको स्वरूप ज्योतिः शास्त्रमें कह्यो हे 'राकाष्टमीप्राग्दलेविद्प्रांत्यकृतरुद्रयोरबहुले कृष्णेनिरेकेष्विह, याको तात्पर्यार्थ कृष्णपक्षमे तृतीयाके ओर दशमीके दूसरे आधेभागमें भद्रा रहे । ओर सप्तमीके ओर चतुर्दशीके पहिलेआधेभागमे भद्रा होय । ओर शुक्लपक्षमें चतुर्थीके ओर एकादशीके दूसरे आधेभागमें भद्राहोय ओर अष्टमीके तथा पूर्णिमाके पहिलेआधेभागमे भद्रा होय । जेसें चतुर्दशीकी समाप्ति भयेसूं लेकें प्रतिपत्के आरंभ तांई छप्पनघड़ी पून्योहोय तो पहिलीअट्ठाईसघडी भद्रा जाननी । ये भद्रा पंचांगमें हू स्फुट लिखीहोयहे होरीके निर्णयमें हू याही प्रमाणे जाननी ।

॥ अथ हिंदोलांदोलनविजय निर्णयः ॥ श्रावण सुदि पून्योसूं लेके ओर तीजतांई जा दिन दिनशुद्धि होय श्रीठाकुरजीकी बृषराशिकूं अनुकूल चंद्र होय शनैश्चरवार बुधवार न होय तादिन हिंडोराविजय करनो। ओर कछू अडबड़ाट होयतो जन्माष्टमीतांई हू हिंड़ोरा झूलें। ओर पवित्रा हू तहांतांई धरे एसो सदाचारहे ॥ ४० ॥

इति श्रीवल्लभाचार्य पादांबुजषडंघ्रिणा ॥
जीवनेन कृतःसम्यक् निर्णयो ब्रजभाषया ॥१॥
उत्सवानां कल्पलतां प्रतानं निर्णयांस्तथा ॥
आलोक्याऽर्थविचार्याऽपि प्रयत्नेन यथामति ।२।

---

१ जन्माष्टमीतांई पवित्रा धरिसके एसो सदाचार हे । ओर कछु बड़े अड़बडाटसूं जन्माष्टमीतांई हू न बनिसके तो प्रबोधिनीतांई हू पवित्रा धरायवेको काल ग्रंथनमें लिख्योहे । परंतु वैष्णवनकें सर्वथा पवित्रा धराये विना रहनो नहि। क्यों जो पवित्रा धराये विना आखेवर्षकी सेवा निष्फल होत हे।

२ अब यारीतसों सबउत्सवनको निर्णय कारिकें गोस्वामि श्रीजीवनजीमहाराज या ग्रंथकी संपूर्णता एकश्लोकमें दिखावतहें ता श्लोकको अर्थ 'श्रीप्रभुनके चरणरूप कमलके भ्रमर इतने जेसें भ्रमर कमलमें अत्यन्त आसक्त होतहें तेसें श्रीप्रभुनके चरणारविंदमें अत्यन्त आसक्त ऐसे जे श्रीजीवनजीमहाराज तिनने आछीरीतसों यह निर्णय ब्रजभाषामें कियो.

३ अब सबनकूं विनाश्रम तुरत उत्सवनको ज्ञान होयवेके लिये यह ग्रंथ भाषामें कियो हे । तासूं यामें बचन लिखे नहीं हे यातें कोईकूं निर्मूल पनेको संदेह होय ता संदेहको निवारण दूसरेश्लोकमें। करतहें ताश्लोकको अर्थ 'प्राचीन श्लोकबद्ध संवत्सरोत्सव-कल्पलता ओर अनेक ग्रंथकार श्रीपुरुषोत्तमजीकृत उत्सवप्रतान ओर कल्याणरायजी

भगवत्सेवकानांच तदज्ञानवतांसदा ॥
सौकर्यायहिसेवायां प्रयत्नोयंमयाकृतः ॥ ३ ॥
यदशुद्धंभवेत्किंचित्पौनरुक्त्यंभ्रमात्तदा ॥
क्षंतव्यंविबुधैर्यस्ते गुणानांग्रहयालवः ॥ ४ ॥

निर्भयरामभट्टप्रभृतिनके उत्सवनिर्णय इन सब ग्रंथनकूं मेरी बुद्धिप्रमाणें यत्न करिकें देखिकें ओर संपूर्ण विचार करिकें यह ग्रंथ कियोहे । यातें या ग्रंथमें जो निर्णय लिख्यो हे तामें प्रमाण वचन चाहिये तो विन ग्रंथनमें देखमें । ओर मेरी बुद्धि प्रमाणे यह कियो ऐसें कह्यो यातें दीनता दिखाई । ओर या श्लोकमें अथशब्द कात्स्न्यार्थक हे सो अमरकोशादिकनमें प्रसिद्ध हे ॥ २ ॥

१ अब या ग्रंथको प्रयोजन तीसरे श्लोकमें कहत हें ता श्लोकको अर्थ ' जे सदा भगवत्सेवा करतहें ओर उत्सव कैसें माननो यह ज्ञान जिनकूं नाहीं एसें जे वैष्णव हें तिनकूं सर्वदा सेवामे सौकर्य होयवेके लियेंही इतने वर्ष दिनपर्यंतकी सब सेवा सुखसूं करीजाय याहीकेलियें यह प्रयत्न मेनें कियोहे या श्लोकमें हिशब्दको अवधारण अर्थ हे.

२ अब या मार्गमें दीनता मुख्य साधन हे ओर परिपूर्णविद्वान् होतहें ते गर्व रहित सरल होतहे। ताहीसूं चोथेश्लोकमें नम्रता दिखावतहें। ता श्लोकको अर्थ या ग्रंथमें मेरी भ्रांतिसूं जो कछु अशुद्ध होय ओर जो पुनरुक्ति होय इतने जो बात एक बिरियां लिखी होय सो ही वृथा दूसरीबिरियां लिखी गई होय तो सो सब सुज्ञपंडितनके क्षमा करनो ।क्यों जो वे गुणनकें ही ग्रहणकरिवेवारे होतहे ग्रहयालु एसो ग्रहणकरिवेवारे को नाम अमर प्रसिद्ध हे ' ग्रहयालुर्ग्रहीतारि.

चंद्रेंदुग्रहशुभ्रांशु १९-११ मितेब्देकार्तिकेऽसिते ॥
नवम्यामर्कवारेऽयंप्रबंधः परिपूरितः ॥ ५ ॥

इति श्रीगोकुलोत्सवात्मज श्रीजीवनाख्येन विरचितोऽयमुत्सवनिर्णयः समाप्तिमगमत् ॥ ॥ ॥ ॥

---

१ अब यह ग्रंथ कोनसे संवत्में कोनसे दिन संपूर्णभयो सो पांचमे श्लोकमे लिखतहैं। ता श्लोकको अर्थ 'चंद्र सो १ भू सो पृथ्वी १ ग्रह सो ९ शुभ्रांशु सो चंद्र १ यासंख्याके वर्षमें इतने अंकानांवामतोगतिः या न्यायसूं विक्रमशकानुसारि गुन्नीससें ग्यारह १९११ के वर्षमें कार्तिकमहीनामें असित सो कृष्णपक्षमें नवमी आदित्यवारके दिन यह ग्रंथ संपूर्ण कियो ॥ दोहा ॥ घनश्यामसुतपंचनदिगोवर्द्धनकविचारु ॥ सुच्छम उच्छवलेखकीटिप्पणिरचीविचारु ॥ १ ॥ वसुलोचनग्रहवसुमती१९-२८मितसंवत्मेसार ॥ पूर्णभयीयहपौषवदिनवमीदिनभृगुवार ॥ २ ॥ इति श्रीवल्लभाचार्यमतवर्त्तिनामोक्षगुरुस्वमातामहगोस्वामिश्रीव्रजवल्लभचरणैकतानेनपंचनदिघनश्यामभट्टात्मजेनपितृलब्धविद्येनगोवर्द्धनशीघ्रकविना विरचितं उत्सवनिर्णयटिप्पणंसंपूर्णम् ॥ ॥ ॥ ॥

॥ इति शुभम् ॥



सूचना.

संवत्सरोत्सवकल्पलता गोस्वामि श्रीव्रजरायजी कृत-गोस्वामि श्रीकल्याणरायजी गोस्वामि श्रीदेवकीनन्दनजी गोस्वामि श्रीगिरधरजी प्रभृति अनेक गोस्वामि बालकन कृत उत्सव निर्णय-तथा गोकुलचंद्रजी कृत उत्सवमालिका निर्भयरामजी कृत उत्सवनिर्णय-रामकृष्णभट्टजी कृत उत्सवनिर्णय-गोवर्द्धनजी कृत विजयादशमीनिर्णय-तथा अन्य भी कितनेक उत्सवनिर्णय इहां मुद्रित होंयगे इन सर्व ग्रंथनको एकही पुस्तक सिद्धहोयगो उक्तनिर्णयनसू अतिरिक्त ओर भी निर्णयग्रंथ जिनमहाशयनके संग्रहमें होंय वे अमूल्यदुर्लभ ग्रंथन के प्रकाशार्थ निम्नलिखितस्थानमें भेजेगें

मु॰ श्रीनाथद्वारा.

ठि॰ विद्याविभाग.